

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 2000 विषय महाभारत

नाव. आश्वमेधिकपर्व

लेखक/लिपीकार शंकर पंडित

पृष्ठ 68 काळ — पूर्ण/~~अपूर्ण~~

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ [illegible] ॥ ४॥

इदमाश्वमेधिकं पर्वं मूलोप नामक शंकरस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
१

॥श्रीगणपतयेनमः॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमं।देवींसरस्वतींचैवततोजयमुदीरयेत्॥१॥ वैशं॰ ॥ कृतोदकंतुराजानंधृतराष्ट्रंयुधि
ष्ठिरः।पुरस्कृत्यमहाबाहुरुत्ततारकुलेंद्रियः।उत्तीर्यतुमहीपालोबाष्पव्याकुललोचनः।पपाततीरेगंगायाव्याधविद्धइवद्विपः।तंसीदमानं
जग्राहभीमःकृष्णेनचोदितः।मैवमित्यब्रवीच्चैनंकृष्णःपरबलार्दनः।तमार्तंपतितंभूमौनिःश्वसंतंपुनःपुनः।ददृशुःपार्थिवाराजन्धर्मात्मानं
युधिष्ठिरं।तंदृष्ट्वादीनमनसंगतसत्वमचेतनं।भूयःशोकसमाविष्टाःपांडवाःसमुपाविशत्।राजातुधृतराष्ट्रस्तंपुत्रशोकाभिपीडितः।वाक्यमा
हमहाबुद्धिःप्रज्ञाचक्षुर्नरेश्वरं।उत्तिष्ठकुरुशार्दूलकुरुकार्यमनंतरं।क्षत्रधर्मेणकौंतेयजितेयमवनिस्त्वया।तांभुंक्ष्वभ्रातृभिःसार्द्धंसुहृद्भिश्चजने
श्वर।नशोचितव्यंपश्यामित्वयाधर्मभृतांवर।शोचितव्यंमयाचैवगांधार्याचविशांपते।ययोःपुत्रशतंनष्टंस्वप्नलब्धंयथाधनं।अश्रुत्वाहितका
मस्यविदुरस्यमहात्मनः।वाक्यानिसुमहार्थानिपरितप्यामिदुर्मतिः।उक्तवानेषमांपूर्वंधर्मात्मादिव्यदर्शनः।दुर्योधनापराधेनकुलंतेविनशि
ष्यति।स्वस्तिचेदिच्छसे राजन्कुलस्यकुरुमेवचः।त्यज्यतामेषदुष्टात्मामंदोराजासुयोधनः।कर्णश्चशकुनिश्चैवनैनंपश्यतुकर्हिचित्।द्यूतसंपा
तमप्यप्रमत्तोनिवारय।अभिषेचयराजानंधर्मराजंयुधिष्ठिरं।सपालयिष्यतिवशीधर्मेणपृथिवीमिमां।अथनेच्छसिराजानंधर्मात्मानंयु
धिष्ठिरं।मेढीभूतःस्वयंराज्यंप्रतिगृह्णीष्वभारत।समंसर्वेषुभूतेषुवर्तमानंनराधिपं।अनुजीवंतुसर्वेत्वांज्ञातयोज्ञातिवर्द्धन।एवंवदतिकौं
तेयविदुरेदीर्घदर्शिनि।दुर्योधनमहंपापमन्ववर्त्तंवृथामतिः।अश्रुत्वातस्यधीरस्यवाक्यानिमधुराण्यहं।फलंप्राप्यमहद्दुःखंनिमग्नःशो

च

१

अतिथीनन्नपानेनकामैरन्यैरकिंचनान्॥३

कसागरे।वृद्धौहितेत्वपितरौपश्यपांडुःखितौनृप।नशोचितव्यंतंवतापश्यामीहनराधिप॥ इत्याश्वमेधिकेपर्वणि॥ वैशं॥ एवमुक्तस्तुराज्ञा
सधृतराष्ट्रेणधीमता।तूष्णींबभूवमेधावीतमुवाचाथकेशवः।अतीवमनसाशोकःक्रियमाणोजनाधिप।संतापयतिवैतस्यपूर्वप्रेतान्पिता
महान्।यजस्वविविधैर्यज्ञैर्बहुभिःस्वाप्तदक्षिणैः।देवांस्तर्पयसोमेनस्वधयाचपितॄनपि।त्वद्विधस्यमहाबुद्धेनैतदद्योपपद्यते।विदितंवेदितव्यंच
कर्तव्यमपितेकृतं॥श्रुताहिराजधर्मास्तेभीष्माद्भागीरथीसुतात्।कृष्णद्वैपायनाच्चैवनारदाद्विदुरात्तथा।नेमामर्हसिमूढानांवृत्तिंत्वमनुवर्त्तितुं।
पितृपैतामहींवृत्तिमास्थायधुरमुद्वह।युक्तंहियशसाक्षत्रंस्वर्गंप्राप्तुमसंशयं।नहिकश्चिद्धिशूराणांनिहतोत्रपराङ्मुखः।त्यजशोकंमहाराज
भवितव्यंहितत्तथा।नशक्यास्तेपुनर्द्रष्टुंयेत्वयानिहतारणे।एतावदुक्त्वागोविंदोधर्मराजं युधिष्ठिरं।विरराममहातेजास्तमुवाचयुधिष्ठिरः॥
॥युधिष्ठिरउवाच॥ गोविंदमयियाप्रीतिस्तवसाविदितामम।सौहृदेनतथाप्रेम्णासदामामनुकंपसे।प्रियंतुमेस्यात्सुमहत्कृतंचक्रगदाधर।श्री
मन्प्रीतेनमनसासर्वंयादवनंदन।यदिमामनुजानीयाद्भवान्गंतुंतपोवनं।नाहंशांतिंप्रपश्यामिघातयित्वापितामहं।कर्णंचपुरुषव्याघ्रंसं
ग्रामेष्वपलायिनं।कर्मणायेनमुच्येयंतस्मात्क्रूरादरिंदम।कर्मणस्तद्विधत्स्वेहयेनशुध्यतिमेमनः।तमेवंवादिनंव्यासस्ततःप्रोवाचधर्मजं।सां
त्वयन्सुमहातेजाःशुभंवचनमर्थवत्।अकृतातेमतिस्तातपुनर्बाल्येनवध्यसे।किमाकाशेवयंतातप्रलपामसुहुर्मुहुः।विदिताःक्षत्रधर्मास्ते
यांकृत्वानजीविकाः।यथाप्रवृत्तोनृपतिर्नपापेनयुज्यते।मोक्षधर्माश्चनिखिलायाथातथ्येनतेश्रुताः।असकृच्चैवसंदेहाश्छिन्नास्तेकामजामया
अश्रद्दधानोदुर्मेधालुप्तस्मृतिरसिध्रुवं।मैवंभवनतेयुक्तमिदमज्ञानमीदृशं।प्रायश्चित्तानिसर्वाणिविदितानिचतेनघ।राजधर्माश्चतेसर्वेदानध

आयोधनेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंते राजशार्दूल नराः दुष्कृतकर्मिणः । असुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाः । प्रयत्नं तेन महात्मानं [illegible] परायण [illegible] महात्मानो [illegible] सुराधिका [illegible] सुराः [illegible] देवाः
क्रियापन्ना दानवा नप्यधर्षयन् । राजसूयाश्वमेधौ च सर्वमेधं च भारत । नरमेधं च नृप ते त्वमाहर युधिष्ठिर ॥४

अश्व० २ मप्यतिते कृता ॥ सकथं सर्वधमज्ञः सर्वागमविशारदः । परिमुह्यसि नृप युत्रमज्ञानादिह भारत ॥ इत्याश्वमेधिके पर्वणि ॥ व्यासउवाच ॥ युधिष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः । नहि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियां । ईश्वरेण प्रयुक्तोऽसौ साध्वसाधु च मानद । करोति पुरुषः कर्म तत्र का परिदेवना ॥ आत्मानं मन्यसे चाथ पापकर्माणमंततः । शृणु तत्र यथा पापमपकृष्येत भारत । तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर । तरंति नित्यं पुरुषा ये स्म पापानि कुर्वते । यज्ञेन तपसा वापि दानेन च युधिष्ठिर । यजस्व वाजिमेधेन विधिवद्दक्षिणावता । बहुस्वर्णेन महाबाहो रामो दाशरथिर्यथा । यथा च भरतो राजा दौष्यन्तिः पृथिवीपतिः ॥ शाकुन्तलो महावीर्यस्तव पूर्वपितामहः ॥ युधिष्ठिर उवाच ॥ असंशयं वाजिमेधः पावयेत्पृथिवीमपि । [illegible] अभिप्रायस्तु मे कश्चित्तं त्वं श्रोतुमिहार्हसि । इमं ज्ञातिवधं कृत्वा सुमहान्तं द्विजोत्तम । दानमल्पं न शक्यामि दातुं वित्तं च नास्ति मे ॥ न च बालानिमान्दीनानुत्सहे वसु याचितुं । तथैवार्द्रव्रणान्कृच्छ्रे वर्तमानान्नृपात्मजान् । स्वयं विनाश्य पृथिवीं यज्ञार्थे द्विजसत्तम । करमाहारयिष्यामि कथं शोकपरायणान् ॥ दुर्योधनापराधेन वसुधा वसुधाधिपाः । प्रणष्टा योजयित्वास्मानकीर्त्या द्विजसत्तम । दुर्योधनेन पृथिवी क्षपिता वित्तकारणात् । कोशश्चापि विशीर्णोऽसौ धार्तराष्ट्रस्य दुर्मतेः ॥ पृथिवी दक्षिणा चात्र विधिः प्रथमकल्पितः ॥ विद्वद्भिः परिदृष्टोऽयं शिष्टो विधिविपर्ययः न च प्रतिविधिं कर्तुं चिकीर्षामि तपोधन । अत्र मे भगवन्सम्यक्साचिव्यं कर्तुमर्हसि । एवमुक्तस्तु पार्थेन कृष्णद्वैपायनस्तदा । मुहूर्तमनुसंचिंत्य राजानमिदमब्रवीत् । विद्यते द्रविणं पार्थ गिरौ हिमवति स्थितं । उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महीपतेः । तदानयस्व कौन्तेय पर्याप्तं तद्भविष्यति ॥ युधिष्ठिर उवाच ॥ कथं यज्ञे मरुत्तस्य द्रविणं तत्समागतं । कस्मिंश्च काले स नृपो बभूव वदतांवर ॥ व्यासउवाच ॥ यदि शुश्रूषसे [illegible] २

प१

दानधर्मरताः शान्ताः सततं ब्रह्मवादिनः ॥५

न्यो ४ श्लोकसंख्या ३

ने० २ शानि श्रो म्य

एककारंधमं नृपो कथयिष्यामि ते सर्वं यथा राजा महाधनाः ॥ इत्याश्वमेधिके पर्वणि संवर्त्तमरुत्तीये ३ ॥ युधिष्ठिर उवाच ॥ शुश्रुषे तन्न धर्मज्ञ राजर्षेः परिकीर्त्तनं । द्वैपायन मरुत्तस्य कथां तां ब्रूहि मेऽनघ ॥ व्यासउवाच ॥ [illegible] आसीत्कृतयुगे पूर्वं मनुर्दण्डधरांवरः । तस्य पुत्रो महेष्वासः प्रसंधिरिति विश्रुतः । प्रसंधेरभवत्पुत्रः क्षुप इत्यभिविश्रुतः । क्षुपस्य पुत्र इक्ष्वाकुर्महीपालोऽभवत्प्रभुः । तस्य पुत्रशतं राजन्नासीत्परमधार्मिकं । तांस्तु सर्वान्महीपालानिक्ष्वाकुरकरोत्प्रभुः । तेषां ज्येष्ठस्तु विंश इत्यासीत्प्रतिमानं धनुष्मतां । विंशस्य पुत्रः कल्याणो विविंशो नाम भारत । विविंशस्य सुता राजन्बभूवुर्दश पंच च । सर्वे धनुषि विक्रान्ता ब्रह्मण्याः सत्यवादिनः । तेषां ज्येष्ठः खनीनेत्रः स्वानुवर्णमपीडयत् । खनीनेत्रस्तु विक्रान्तो जित्वा राज्यमकण्टकं । नाशक्नोद्रक्षितुं राज्यं नान्वरज्यंत तं प्रजाः । तमपास्य च तद्राज्ये तस्य पुत्रं सुवर्चसं । अभ्यषिंचंत राजेन्द्र मुदिताश्चाभवंस्तदा । स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा । नियतो वर्तयामास प्रजाहितचिकीर्षया । ब्रह्मण्यः सत्यवादी च शुचिः शमदमान्वितः । प्रजास्तमन्वरज्यंत धर्मनित्यं युधिष्ठिर । तस्य धर्मप्रवृत्तस्य व्यशीर्यत्कोशवाहनं । तं क्षीणकोशं सामंताः समंतात्पर्यपीडयन् । स पीड्यमानो बहुभिः क्षीणकोशस्ववाहनः । आर्तिमार्च्छत्परां राजा सह भृत्यैः पुरेण च । न चैनं परिहन्तुं ते शक्नुवंति बलक्षये । सम्यग्वृत्तो हि राजा स धर्मनिष्ठो युधिष्ठिर । यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः । ततः प्रदध्मौ स करं प्रादुरासीत्ततो बलं । ततस्तानजयत्सर्वान्प्रातिसीमान्नराधिपान् । एतस्मात्कारणाद्राजन्विश्रुतः स करंधमः । तस्य कारंधमः पुत्रस्त्रेतायुगमुखेऽभवत् । इन्द्रादनवरः श्रीमान्देवैरपि सुदुर्जयः । तस्य सर्वे महीपाला वर्त्तंते स्म वशे तदा । स हि सम्राडभूत्तेषां वृत्तेन च बलेन च । अविक्षिन्नाम धर्मात्मा शौर्येणेन्द्रसमोऽभवत् । यज्ञशीलः कर्मरतो धृतिमान्संयतेन्द्रियः । तेजसादित्यसदृशः क्षमया पृथिवीसमः । बृहस्पतिसमो बुद्ध्या हिमवानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰ वसुर्द्धिरः। कर्मणा मनसा वाचा दमेन च शमेन च। मनोस्स्वारोचिषस्यासीत्प्रजानां स महीपतिः। स ईजे हयमेधानां शतेन विधिवत्प्रभुः। याजयामा
३ स यं विद्वान्स्वयमेवांगिराः प्रभुः। तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया। मरुत्तो नाम धर्मज्ञश्चक्रवर्त्ती महायशाः। नागायुतसमप्राणः साक्षाद्वि
ष्णुरिवापरः। स यक्ष्यमाणो धर्मात्मा शातकुंभमयान्युत। कारयामास शुभ्राणि भाजनानि सहस्रशः। मेरुं पर्वतमासाद्य हिमवत्पार्श्व उत्तरे। कां
४ पि चनः सुमहान्पादस्तत्र कर्म चकार सः। ततः कुंडानि पात्राणि पिठराण्यासनानि च। चक्रुः सुवर्णकर्त्तारो येषां संख्या न विद्यते। तस्यैव च समीपे स यज्ञ
वाटो बभूव ह। ईजे तत्र स धर्मात्मा विधिवत्पृथिवीपतिः। मरुत्तः सहितैः सर्वैः प्रजापालैर्नराधिपः॥ इत्याश्वमेधिके संवर्त्तमरुत्तीये ३ युधिष्ठिर उवाच॥
नू ६ कथंवीर्यः समभवत्स राजा वदतां वरः। कथं च जातरूपेण समयुज्यत स द्विज। क्व च तत्सांप्रतं द्रव्यं भगवन्नवतिष्ठति। कथं च शक्यमस्माभिस्त
दवाप्तुं तपोधन॥ व्यास उवाच॥ असुराश्चैव देवाश्च दक्षस्यासन्प्रजापतेः। अपत्यं बहुलं तात तेऽस्पर्द्धन्त परस्परं। तथैवांगिरसः पुत्रौ व्रततुल्यौ बभूव
तुः। बृहस्पतिर्बृहत्तेजाः संवर्त्तश्च तपोधनः। तावतिस्पर्द्धिनौ राजन्पृथगास्तां परस्परं। बृहस्पतिस्तु संवर्त्तं बाधते स्म पुनः पुनः। स बाध्यमानः सततं
भ्रात्रा ज्येष्ठेन भारत। अर्थानुत्सृज्य दिग्वासा वनवासमरोचयत्। वासवोऽप्यसुरान्सर्वान्निर्जित्य च निहत्य च। इंद्रत्वं प्राप्य लोकेषु ततो वव्रे पुरो
हितं। पुत्रमंगिरसो ज्येष्ठं विप्रश्रेष्ठं बृहस्पतिं। याज्यस्त्वंगिरसः पूर्वमासीद्राजा करंधमः। वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च। शतक्रतुरिवौज
स्वी धर्मात्मा संशितव्रतः। वाहनं यस्य योधाश्च द्रव्याणि विविधानि च। शयनानि च मुख्यानि महार्हाणि च सर्वशः।
शः॥ ध्यानादेवाभवद्राजन्मुखभावेन च सर्वशः। स गुणैः पार्थिवान्सर्वान्वशे चक्रे नराधिपः। संजीव्य कालमिष्टं च सशरीरो दिवं गतः। बभूव तस्य

तपोवळाह। ३ रा

पुत्रस्तु ययातिरिव धर्मवित्। अविक्षिन्नाम शत्रुजित्स वशे कृतवान्महीं। विक्रमेण गुणैश्चैव पितेवासीत्स पार्थिव। तस्य वासवतुल्योऽभून्मरुत्तो नाम
वीर्यवान्। पुत्रस्तमनुरक्ताऽभूत्पृथिवी सागरांबरा। स्पर्द्धते सततं सोऽपि देवराजेन पार्थिव। वासवोऽपि मरुत्तेन स्पर्द्धते पांडुनंदन। शुचिः स गुणवानासी
न्मरुत्तः पृथिवीपतिः। यतमानोऽपि यं शक्रो न विशेषयति स्म ह। सोऽशक्नुवन्विशेषाय समाहूय बृहस्पतिं। उवाचेदं वचो देवैः सहितो हरिवाहनः।
बृहस्पते मरुत्तस्य मा स्म कार्षीः कथंचन। दैवं कर्माथ पित्र्यं वा कर्त्तासि मम चेत्प्रियं। अहं हि त्रिषु लोकेषु सुराणां च बृहस्पते। इंद्रत्वं प्राप्तवानेकः प्र
ज्यः सर्वदिवौकसां। कथं ह्यमर्त्यं ब्रह्मंस्त्वं याजयित्वा सुराधिपं। याजयेर्मृत्युसंयुक्तं मरुत्तमविशंकया। मां वा वृणीष्व भद्रं ते मरुत्तं वा महीपतिं। परि
त्यज्य मरुत्तं वा यथाजोषं भजस्व मां। एवमुक्तः स कौरव्य देवराज्ञा बृहस्पतिः। मुहूर्त्तमथ संचिंत्य देवराजानमब्रवीत्। त्वं भूतानामधिपतिस्त्वयि
लोकाः प्रतिष्ठिताः। नमुचेर्विश्वरूपस्य निहंता त्वं बलस्य च। त्वमाजहर्थ देवानामेको वीरः श्रियं परां। त्वं बिभर्षि भुवं द्यां च सदैव बलसूदन। पौरोहित्यं कथ
कृत्वा तव देवगणेश्वर। याजयेयमहं मर्त्यं मरुत्तं पाकशासन। समाश्वसिहि देवेश नाहं मर्त्यस्य कर्हिचित्। ग्रहीष्यामि स्रुवं यज्ञे शृणु चेदं वचो मम॥ हि
रण्यरेता नोष्णः स्यात्परिवर्त्तेत मेदिनी। भासं च न रविः कुर्यान्मयि सत्यं चलेद्यदि। बृहस्पतिवचः श्रुत्वा शक्रो विगतमत्सरः। प्रशस्यैनं विवेशाथ स्वमे
व भवनं तदा॥ इत्याश्वमेधिके संवर्त्तीये ४ व्यास उवाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। बृहस्पतेश्च संवादं मरुत्तस्य च भारत। देवराजस्य
समयं कृतमांगिरसेन वा। श्रुत्वा मरुत्तो नृपतिः सत्रमाहारयत्तदा। संकल्प्य मनसा यज्ञं करंधमसुतात्मजः। बृहस्पतिमुपागम्य वाग्मी वचनमब्रवीत्।
भगवन्यन्मया पूर्वमभिगम्य तपोधन। कृतोऽभिसंधिर्यज्ञाय भवतो वचनाद्गुरो। तमहं यष्टुमिच्छामि संभाराः संभृताश्च ये। याज्योऽस्मि भवतः साधो तत्

वैव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संजीवितोस्मि सवताद्य वाक्येनानेन नारद

अश्व· ४

क्कं हि विधित्सव॥ बृहस्पतिरु०॥ नकामयेयाजयितुं त्वामहं पृथिवीपते॥ वृतोस्मि देवराजेन प्रतिज्ञातं च तस्य मे॥ ॥मरुत्त उवाच॥ ॥पित्र्यमस्मि भवत्कं ते
बहु मन्ये च ते भृशं॥ न चास्मि याज्यतां प्राप्तो याज्यमानं भजस्व मां॥ ॥बृहस्पतिरु०॥ ॥अमर्त्यं याजयित्वाहं याजयिष्ये न मानुषं। मरुत्त गच्छ वा मा वा निवृत्तोस्म्य
द्य याजनात्। न त्वां याजयिताम्यद्य वृणु त्वं यं इहेच्छसि। उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति॥ ॥व्यास उवाच॥ ॥एवमुक्तः स नृपतिर्मरुत्तः पीडितो न
वत्। प्रत्यागच्छत्स संविग्नो ददर्श पथि नारदं। देवर्षिणा समागम्य नारदेन स पार्थिवः॥ विधिवत्प्रांजलिस्तस्थावथैनं नारदोब्रवीत्। राजर्षे नातिहृष्टोसि क
च्चित्क्षेमं तवानघ। क्व गतोसि कुतो वेदमप्रीतिस्थानमागतं। श्रोतव्यं चेन्मया राजन्ब्रूहि त्वं पार्थिवर्षभ। व्यपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप॥ ॥वै
शं॥ ॥एवमुक्तो मरुत्तस्तु नारदेन महर्षिणा। विप्रलंभमुपाध्यायात्सर्वमेव न्यवेदयत्॥ ॥मरुत्त उ०॥ ॥गतोस्म्यंगिरसः पुत्रं देवाचार्यं बृहस्पतिं। यज्ञा
र्थमृत्विजं द्रष्टुं स च मां नाभ्यनंदत। प्रत्याख्यातश्च तेनाहं जीवितुं नाद्य कामये। परित्यक्तश्च गुरुणा दूषितश्चास्मि नारद॥ ॥व्यास उवाच॥ ॥एवमुक्तस्तु राज्ञा
स नारदः प्रत्युवाच ह। आविक्षितं महाराज वाचा संजीवयन्निव॥ ॥नारद उ०॥ राजन्नंगिरसः पुत्रः संवर्त्तो नाम धार्मिकः। चंक्रमीति दिशः सर्वा दिग्वासा
मोहयन्निव। तं गच्छ यदि राजंस्त्वां न वांछति बृहस्पतिः। प्रसन्नस्त्वां महाराज संवर्त्तो याजयिष्यति॥ ॥मरुत्त उवाच॥ ॥संजीवितोहं स वता वाक्येनानेन नारद।
पश्येयं क्व नु संवर्त्तं शंस मे वदतां वर। कथं च तस्मै वर्त्तेयं कथं मां न परित्यजेत्। प्रत्याख्यातश्च तेनापि नाहं जीवितुमुत्सहे॥ ॥नारद उ०॥ ॥उन्मत्तवेशं बिभ्रत्स
चंक्रमीति यथासुखं। वाराणसीं तु नगरीमभीक्ष्णमभिसेवते। तस्य द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्। तं दृष्ट्वा यो निवर्त्तेत स संवर्त्तो महीपते। तं पृष्ठतोनुव
र्तेथाः यत्र गच्छेत्स वीर्यवान्। तमेकांते समासाद्य प्रांजलिः शरणं व्रजेः। पृच्छेत्त्वां यदि केनाहं तवाख्यात इति स्म ह। ब्रूयास्त्वं नारदेनेति संवर्त्त कथितोसि मे। स चेत्त्वा

न सा ४

द्धं नारदेति त्वां पृच्छेद्वेश्मधाम्योगिरः सुतः। प्रत्यक्षं ते करिष्यामि स च वा [illegible] महामुनिः॥ व्यास उवाच॥ कांश्चिद्धितांश्चित्तां [illegible] त्थात्विधं स नारदः। अभिनायेधितां हूयता
प्रविवेश महामुनिः। निरीक्षमाणो गमनं संवर्त्तस्याश्रमेव च। संवर्त्तोपदिष्टं खेलां ध्यासोपापः सुमंदधीः। कथयेथास्त्वं वसं दिग्धं समारूढो हुताशनं। एतत्कर्त्तव्य
मित्युक्त्वा मरुत्तं गम्यतामिति। पृच्छितो मरुत्तो राजा शासनान्नारदस्य ह। गते मरुत्ते नृपतौ कौशमारं महामुनि। चित्तं मे तां परित्यज्य पृथिवी मे वा पवृक्ष्मे।
गते तु नारदे [illegible] ता तामग्निराहुतः। तत्काष्ठे विद्वली नृ तं गते तस्मिन् [illegible] हात्मनि। याचितो नर [illegible] पृथुस्तु योगात् नारदः।

मामिमुं जीवमम्मा अभिगमनेच्छया। शंसेथा वह्निमारूढं मामपि त्वमशक्नुयाः॥ ॥व्यास उवाच॥ ॥स तथेति प्रतिश्रुत्य पूजयित्वा च नारदं। अभ्यनुज्ञाय राजर्षिः पु
रीं वाराणसीं ययौ। तत्र गत्वा यथोक्तं स पुर्या द्वारे महायशाः। कुणपं स्थापयामास नारदस्य वचः स्मरन्। यौगपद्येन विप्रश्च स पुरीद्वारमाविशत्। ततः स कुणपं
दृष्ट्वा सहसा स न्यवर्त्तत। स तं निवृत्तमालक्ष्य प्रांजलिः पृष्ठतोन्वयात्। आविक्षितो महीपालः संवर्त्तमुपशिक्षितुं। स वर्त्तं विजने दृष्ट्वा [illegible] न
मालत्प्रांजलिः पृष्ठतोन्वयात्। आवीक्षितो महीपालः संपांसुभिः कर्दमेन वा श्लेष्मणा चैव राजानं ष्ठीवनेन समवाकिरत्। स तथा बाध्यमानो वै संवर्त्तेन महीपतिः
अन्वगादेव तमृषिं प्रांजलिः संप्रसादयन्। ततो निवृत्य संवर्त्तः परिश्रांत उपाविशत्। शीतलच्छायमासाद्य न्यग्रोधं बहुशाखिनं॥ ॥इत्याश्वमेधिके पर्वणि सं
वर्त्तमरुत्तीये ६॥ ॥संवर्त्त उवाच॥ ॥कथमस्मि त्वया ज्ञातः केन वा कथितोस्मि ते। एतदाचक्ष्व मे तत्त्वमिच्छसे चेत्प्रियं मम। सत्यं ते ब्रुवतः सर्वे संपत्स्यंते मनो
रथाः। मिथ्या तु ब्रुवतो मूर्द्धा सप्तधा ते स्फुटिष्यति॥ ॥मरुत्त उवाच॥ ॥नारदेन भवान्मह्यमाख्यातो गच्छता पथि। गुरुपुत्रो ममेति त्वां ततो मे प्रीतिरुत्तमा॥ ॥सं
वर्त्त उवाच॥ सत्यमेतद्भवानाह स मां जानाति सत्रिणं। कथयस्वैतदेतन्मे क्व नु संप्रति नारदः॥ ॥मरुत्त उवाच॥ त्वद्वर्त्तनं कथयित्वा स मम देवर्षिनारदः। ततो मामभ्य
नुज्ञाय प्रविष्टो हव्यवाहनं॥ ॥व्यास उवाच॥ ॥श्रुत्वा तु पार्थिवस्यैतत्तत्संवर्त्तः प्रमदं गतः। एतावदहमप्येनं कुर्यामिति तदब्रवीत्। ततो मरुत्तमुन्मत्तो वाचा
निर्भर्त्सयन्निव। रूक्षया ब्राह्मणो राजन्पुनः पुनरथाब्रवीत्। वातप्रधानेन मया स्वचित्तवशवर्त्तिना। एवं विकृतरूपेण कथं याजितुमिच्छसि। भ्राता मम समर्थश्च वास
वेन च सत्कृतः। वर्त्तते याजने चैव तेन कर्माणि कारय। गार्हस्थ्यं चैव याज्याश्च सर्वा गृह्याश्च देवताः। पूर्वजेन ममाक्षिप्ताः शरीरं वर्जितं त्विदं। नाहं तेनाननुज्ञातस्त्वामावी
क्षित कर्हिचित्। याजयेयं कथंचिद्वै स हि पूज्यतमो मम। स त्वं बृहस्पतिं गच्छ तमनुज्ञाप्य चाव्रज। ततोहं याजयिष्ये त्वां यदि यष्टुमिहेच्छसि॥ ॥मरुत्त उवाच॥ बृहस्पतिमहं

रिव परयामुदा। न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
५

पूर्वंगतंसंवर्त्ततच्छृणु। नमोकामयतेयाज्यमसौवासवकारणात्। सुरंपान्यंसमासाद्ययाजयिष्येनमानुषं। शक्रेणप्रतिषिद्धोहंमरुत्तंमास्मयाजय। स्पर्द्ध
तेत्वमयाविप्रसदावैमहिपार्थिवः एवमस्त्वितिवाप्युक्तोभ्रातातेबलवृत्रहा। समामभिगतंप्रेम्णायाज्यत्वेनपुरंदरः। देवराजमुपाश्रित्यत्वंविद्धिमुनिपुंगव। सो
हमिच्छामिभवतासर्वस्वेनापियाजितुं। कामयेममतिक्रान्तुंवासवंत्वत्कृतैर्गुणैः। नहिमेवर्त्ततेबुद्धिर्गन्तुंब्रह्मन्बृहस्पतिं। प्रत्याख्यातोस्मितेनाहंतथानपकृते
सति। ॥ संवर्त्तउवाच ॥ चिकीर्षसियथाकामंसर्वमेतत्त्वयिध्रुवं। यदिसर्वानभिप्रायान्कर्त्तासिममपार्थिव। याज्यमानंमयाहित्वांबृहस्पतिपुरंदरौ। द्वि
षेतांसमतिक्रुद्धावेतदेकंसमर्थय। स्थैर्यमत्रकथंतेस्यात्त्वंनिःसंशयंकुरु। कुपितस्त्वांनहीदानींभस्मकुर्यांसबांधवं। ॥ मरुत्तउवाच ॥ यावत्तपेत्सहस्रां
शुस्तिष्ठेरंश्चापिपर्वताः। तावल्लोकान्नलभेयंत्यजेयंसंगतिंयदि। माभूदपिशुभाबुद्धिःसर्वलोकेष्विहकर्हिचित्। विषयैःसंगतंवाहंत्यजेयंसंगतंयदि। ॥ सं
वर्त्तउवाच ॥ आविक्षितशुभाबुद्धिर्दीप्यतांतवकर्म्मसु। याजनंहिममाप्येवंवर्त्ततेत्वयिपार्थिव। संविधास्येचतेराजन्नक्षयंद्रव्यमुत्तमं। येनदेवान्सगंध
र्वान्शक्रंचाभिभविष्यसि। नचमेवर्त्ततेबुद्धिर्धनेयाज्येषुवापुनः। विप्रियंतुकरिष्यामिभ्रातुश्चेंद्रस्यचोभयोः। गमयिष्यामिचेंद्रेणसमतामपितेध्रुवं। प्रियं
चतेकरिष्यामिसत्यमेतद्ब्रवीमिते। ॥ इत्याश्वमेधिकेसंवर्त्तमरुत्तीये। संवर्त्तउवाच ॥ गिरेर्हिमवतःपृष्ठेमुंजवान्नामपर्वतः। तप्यतेयत्रभगवांस्तपोनित्य
मुमापतिः। वनस्पतीनांमूलेषुटंकेषुशिखरेषुच। गुहासुशैलराजस्ययथाकामंयथासुखं। उमासहायोभगवान्यत्रनित्यंमहेश्वरः। आस्तेशूलीमहातेजा
नानाभूतगणावृतः। तत्ररुद्राश्चसाध्याश्चविश्वेथवसवस्तथा। यमश्चवरुणश्चैवकुबेरश्चसहानुगः। भूतानिचपिशाचाश्चनासत्यावश्विनावपि। गं
धर्वाप्सरसश्चैवयक्षादेवर्षयस्तथा। आदित्यामरुतश्चैवयातुधानाश्चसर्वशः। उपासतेमहात्मानंबहुरूपमुमापतिं। रमतेभगवांस्तत्रकुबेरानुचरैःसह।

५

स्थूलोदंतविनाशायशमनायशिवायच। काम्यायाव्यक्तकेशायसहृनेत्रांकरायच। ह्रेभ्यायहरिकेशायगुरवेबहुरूपायच। ४

विकृतैर्विकृताकारैःक्रीडन्निशपृथिवीपते। श्रियाज्वलन्दृश्यतेवैबालादित्यसमद्युतिः। नरूपंशक्यतेतस्यसंस्थानंवाकथंचन। निर्देष्टुंप्राणिभिःकैश्चित्प्राकृतैर्मांसलोचनैः।
नोष्णंनशिशिरंतत्रनवायुर्नचभास्करः। नजरानक्षुत्पिपासेवानमृत्युर्नभयंनृप। तस्यशैलस्यपार्श्वेषुसर्वेषुजयतांवर। धातवोजातरूपस्यरश्मयःसवितुर्यथा। र
क्ष्यंतेतेकुबेरस्यसहायैरुद्यतायुधैः। चिकीर्षद्भिःकुबेरस्यप्रियंराजन्महात्मनः। तस्मैभगवतेकृत्वानमःसर्वायवेधसे। रुद्रायशितिकंठायसुरूपायसुवर्च्चसे। कपर्द्दि
नेकरालायहर्यक्ष्णेवरदायच। हरिकेशायमुंडायकृशायोत्तरणायच। भास्करायसुतीर्थायदेवदेवायरंहसे। बहुरूपायसर्वायप्रियायप्रियवाससे। उष्णीषिणे
सुवक्त्रायसहस्राक्षायमीढुषे। गिरिशायप्रशांतायपतयेचीरवाससे। बिल्वदंडायसिद्धायसर्वदंडधरायच। मृगव्याधायमहतेधन्विनेतपनायच। लेलिहानायगोम्ना
सिद्धमंत्रायवर्द्धसेहिरण्यबाहवेराजन्नुग्रायपतयेदिशां। पशूनांपतयेचैवभूतानांपतयेतथा। वृषायमातृभक्तायसेनान्येमध्यमायच। स्रुवहस्तायपतयेधन्विने
भार्गवायच। सितायकृष्णनेत्रायविरूपाक्षायचैवह। तीक्ष्णतापायतीक्ष्णायवैश्वानरमुखायच। महाद्युतेरनंगायसर्वायपतयेदिशां। विलोहितायदीप्ताय
दीप्ताक्षायमहौजसे। वसुरेतःसुवपुषेपृथवेकृत्तिवाससे। कपालमालिनेनित्यंसुवर्णमुकुटायच। महादेवायकृष्णायत्र्यंबकायानघायच। क्रोधनायनृशं
सायमृदवेबाहुशालिने। मुंडिनेतप्ततपसेतथैवाक्रूरकर्म्मणे। सहस्रशिरसेचैवसहस्रचरणायच। नमःस्वधास्वरूपायबहुरूपायदंष्ट्रिणे। पिनाकिनं
महाभागंमहायोगिनमव्ययं। त्रिशूलपाणिंवरदंत्र्यंबकंभुवनेश्वरं। त्रिपुरघ्नंत्रिनयनंत्रिलोकेशंमहौजसं। प्रभवंसर्वभूतानांधारणंधरणीधरं। ईशानंशंक
रंसर्वंशिवंविश्वेश्वरंविभुं। उमापतिंविश्वरूपंविश्वेशंविश्वभावनं। महेश्वरंविरूपाक्षंत्र्यक्षंदशभुजंशिवं। अनंतंशाश्वतंदेवंत्रिशृंगंवृषभेक्षणं। उग्रंस्थाणुंवि
भुं रुद्रंशर्वंगौरीशंशितिकंठमजंशुक्रंपृथुंपृथुहरंविभुं। विश्वरूपंविरूपाक्षंबहुरूपमुमापतिं। प्रणम्यशिरसादेवमनंगांगहरंहरं। शरण्यंशरणंयाहिमहादेवंचतुर्मुखं।

शमीश्वरं।

२

पूं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व.
६
पं

एवं कृत्वा नमस्तस्मै महादेवाय धीमते॥ महात्मने क्षितिपते ततः सर्वमवाप्स्यसि॥ सुवर्णमाहरिष्यंत स्तत्र गत्वा तु ते नराः॥ इत्युक्तः स वचस्तस्य चक्रे कारंधमात्मजः॥
ततोतिमानुषं सर्वं चक्रे यज्ञस्य संविधिं। सौवर्णानि च भांडानि संचक्रुस्तस्य शिल्पिनः॥ बृहस्पतिस्तु तां श्रुत्वा मरुत्तस्य महीपतेः। समृद्धिमति देवेभ्यः संतापमकरोद्भृ
शं। स तप्यमानो वैवर्ण्यं कृशत्वं चागमत्परं। भविष्यति हि मे शत्रुः संवर्त्तो वसुमानिति। श्रुत्वा तं भृशसंतप्तं देवराजो बृहस्पतिं। अभिगम्यामरवृतः प्रोवाचेदं वचस्तदा

इति श्री अश्वमेधिके पर्वणि संवर्त्तमरुत्तीये ॥ ८ ॥ इंद्र उवाच ॥ कच्चित्सुखं स्वपिषि त्वं बृहस्पते कच्चिन्मनोज्ञाः परिचारकास्ते। कच्चिद्देवानां सुखका
मोसि विप्र कच्चिद्देवास्त्वं परिपालयंति ॥ ॥ बृहस्पतिरुवाच ॥ ॥ सुखं शये शयने वै महेंद्र यथा मनोज्ञाश्च परिचारका मे। देवानां सुखकामोस्मि देवा भृशं मां
सुभृशं पालयंति ॥ इंद्र उवाच ॥ कुतो दुःखं मानसं देहजं वा पांडुर्विवर्णश्च कुतस्त्वमद्य। आचक्ष्व मे त्वं द्विज यावदेतान्निहन्मि सर्वांस्तव दुःखकर्तॄन् ॥
बृहस्पतिरुवाच ॥ मरुत्तमाहुर्मघवन्यक्ष्यमाणं महायज्ञेनोत्तमदक्षिणेन। तं संवर्त्तो याजयतीति मे श्रुतं तदिच्छामि न स तं याजयेत ॥ इंद्र उवाच ॥ सर्वा
न्कामाननुयातोसि विप्र यस्त्वं देवानां मंत्रयसे पुरोधाः। उभे च ते जन्ममृत्यू व्यतीते किं संवर्त्तस्तव कर्त्ताद्य विप्र ॥ ॥ बृहस्पतिरुवाच ॥ दिष्ट्या सपत्नाः
नुबंधा उदैत सहत्वं मा सुरानप्रणुद्य। यं यं समृद्धं पश्यसि तत्र तत्र दुःखं सपत्नेषु समृद्धभावः। अतोस्मि देवेंद्र विवर्णरूपः सपत्नो मे वर्द्धते तन्निशम्य। सर्वोपा
यैर्मघवन्संनियच्छ संवर्त्तं वा पार्थिवं वा मरुत्तं ॥ इंद्र उवाच ॥ एहि गच्छ प्रहितो जातवेदो बृहस्पतिं परिदातुं मरुत्ते। वाक्यं तथा पुरुषस्तस्य कर्त्ता अयं वै त्वां याज
यिता बृहस्पतिस्तथामरं चैव करिष्यतीति ॥ अग्निरुवाच ॥ अहं गच्छामि तव शक्राद्य दूतो बृहस्पतिं परिदातुं मरुत्ते। वाचं सत्यां पुरुहूतस्य कर्त्तुं बृहस्पतेश्चाप
चितिं चिकीर्षुः ॥ व्यासउवाच ॥ ततः प्रायाद्धूमकेतुर्महात्मा वनस्पतीन्वीरुधश्चापि मृद्नन्। कामाद्धिमांते परिवर्त्तमानः काष्ठातिगो मातरिश्वेव नर्दन् ॥ मरुत्त उ

स तं धीमान्धूमकेतुः प्रपातस्तत्रागतं मरुत्तः संददर्श। १

ऽशा
तथा
मेनऽ
न
६

आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतं। आसनं सलिलं पाद्यं गां चोपानय वै मुने ॥ अग्निरुवाच ॥ आसनं सलिलं पाद्यं प्रतिनंदामि तेनघ। इंद्रेणा
नुसमादिष्टं विद्धि मां दूतमागतं ॥ मरुत्तउवाच ॥ कच्चिच्छ्रीमान्देवराजः सुखी च कच्चिच्चास्मान्प्रीयते धूमकेतो। कच्चिद्देवाश्चास्य वशे यथावद्ब्रूहि त्वं मम
कार्त्स्न्येन देव ॥ अग्निरुवाच ॥ शक्रो भृशं सुसुखी पार्थिवेंद्र प्रीतिं चेच्छत्यजरां वै त्वया सः। देवाश्च सर्वे वशगास्तस्य राजन्संदेशं मे शृणु मे देवराज्ञः। यद
र्थं मां प्राहिणोत्त्वत्सकाशं बृहस्पतिं परिदातुं मरुत्ते। अयं गुरुर्याजयिता नृप त्वां मर्त्यं संतममरं त्वां करोतु ॥ मरुत्तउवाच ॥ संवर्त्तोयं याजयिता द्विजो मे
बृहस्पते रंजलिरेष तस्य। नासौ याजयित्वा महेंद्रं मर्त्यं संतं याजयन्नद्य शोभेत ॥ अग्निरुवाच ॥ ये वै लोका देवलोके महांतः संप्राप्स्यसे देवराज
प्रसादात्। त्वां चेदसौ याजयेद्वै बृहस्पतिर्नूनं स्वर्गं त्वं जयेः कीर्त्तियुक्तः। तथा लोका मानुषा ये च दिव्याः प्रजापतेश्चापि ये वै महांतः। ते ते जिता देवराजे
न कृत्स्नं बृहस्पतिश्चेद्याजयेत्त्वां नरेंद्र ॥ संवर्त्तउवाच ॥ मास्मैवं त्वं पुनरागाः कथंचिद्बृहस्पतिं परिदातुं मरुत्ते। मा त्वां धक्ष्ये चक्षुषा दारुणेन संक्रुद्धो
हं पावक तन्निबोध ॥ व्यासउवाच ॥ ततो देवानगमद्धूमकेतुर्दाहाद्भीतो व्यथितोश्वत्थपर्णवत्। तं वै दृष्ट्वा प्राह शक्रो महात्मा बृहस्पतेः संनिधौ ह
व्यवाहं ॥ इंद्रउवाच ॥ यत्त्वं गतः प्रहितो जातवेदो बृहस्पतिं परिदातुं मरुत्ते। तत्किं प्राह स नृपो यक्ष्यमाणः कच्चिद्वचः प्रतिगृह्णाति तद्वै ॥ अ
ग्निरुवाच ॥ न ते वाचं रोचते वै मरुत्तो बृहस्पतेरंजलिं प्राहिणोत्सः। संवर्त्तो मां याजयितेत्युवाच पुनः पुनः स मया प्रोच्यमानः। उवाचेदं मानुषा ये च दिव्याः
प्रजापतेर्ये च लोका महांतः। तांश्चेल्लभेयं संविदं तेन कृत्वा तथापि नेच्छेयमिति प्रतीतः ॥ इंद्र उ ॥ पुनर्गत्वा पार्थिवं तं समेत्य वाक्यं मदीयं प्रापय स्वा
र्थयुक्तं। पुनर्यद्युक्तो न करिष्यते वचस्ततो वज्रं संप्रहर्त्तास्मि तस्मै ॥ अग्निरुवाच ॥ गंधर्वराड्यात्वयं तत्र दूतो बिभेम्यहं वासव तत्र गंतुं। संरब्धो माम

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व° ७

ब्रवीत्तीव्ररोषः संवर्त्तो वाक्यं चरितव्रतः । यद्यागच्छेः पुनरेवं कथंचिद्बृहस्पतिं परिदातुं मरुत्ते । दहेयं त्वां चक्षुषा दारुणेन संक्रुद्धस्त्वेतद्देवेहि शक्र ॥ शक्र उवाच ॥ त्वमेवान्यान्दहसे जातवेदो न त्वं हि दग्धो विद्यते त्वत्समः कः । त्वत्संपर्कात्सर्वलोको बिभेति । अश्रद्धेयं वदसे हव्यवाह ॥ अग्निरुवाच ॥ दिवं देवेंद्र पृथिवीं चैव सर्वां संवेष्टय त्वं स्वबलेनैव शक्र । एवंविधस्येह सतस्तवासौ कथं वृत्रस्त्रिदिवं प्राग्जहार ॥ इंद्र उवाच ॥ नासंदीकांजिकमनो न कलिंगाद्र कारिसोमं प्रपिबामि वह्ने । न दुर्बले वै विसृजामि वज्रं को मे सुखाय प्रहरेन्मनुष्यः । प्रव्राजयेयं कालकेयान्पृथिव्यामपाकर्षन्दानवानंतरीक्षात् । दिवः प्रह्लादमवसानमानयं को मे सुखाय प्रहरेन्मनुष्यः ॥ अग्निरुवाच ॥ यत्र शर्यातिं च्यवनो याजयिष्यन्सहाश्विभ्यां सोममगृह्णदेकः । तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्ताच्छर्यातियज्ञं स्मर तं महेंद्र । वज्रं गृहीत्वा च पुरंदर त्वं संप्राहार्षीश्च्यवनस्यातिघोरं । स ते विप्रः सह वज्रेण बाहुमपागृह्णात्तपसा जातमन्युः । ततो रोषात्सर्वतो घोररूपं सपत्नं ते जनयामास भूयः । मदं नामासुरं विश्वरूपं यं त्वं दृष्ट्वा चक्षुषी संनिमीलः । हनुरेका जगतीस्था तथैका दिवं गता महतो दानवस्य । सहस्रं दंतानां शतयोजनानां सुतीक्ष्णानां घोररूपं बभूव । वृत्ताः स्थूला राजतस्तंभवर्णा दंष्ट्राश्चतस्रो द्वे शते योजनानां । स त्वां दंतान्विदशन्नभ्यधावज्जिघांसया शूलमुद्यम्य घोरं । अपश्यस्त्वं तं तदा घोररूपं सर्वे चैवं द्रष्टुमदर्शनीयं । यस्माद्भीतः प्रांजलिस्त्वं महर्षिमागच्छेथाः शरणं दानवघ्न । क्षात्राद्बलाद्ब्रह्मबलं गरीयो न ब्रह्मणः किंचिदन्यद्गरीयः । सोहं जानन्ब्रह्मतेजो यथावत्संवर्त्तं गंतुमिच्छामि शक्र ॥ ॥ इत्याश्वमेधिके पर्वणि संवर्त्तमरुत्तीये ॥ इंद्र उवाच ॥ एवमेतद्ब्रह्मबलं गरीयो न ब्रह्मणः किंचिदन्यद्गरीयः । अविषह्यं तस्य वज्रं विसृष्टं वज्रमस्मै प्रहरिष्यामि घोरं ॥ व्यास उवाच ॥ ततो गत्वा धृतराष्ट्रो नरेंद्रं प्रोवाचेदं वचनं वासवस्य ॥ धृतराष्ट्र उवाच ॥ गंधर्वं मां धृतराष्ट्रं निबोध त्वामागतं वक्तुकामं नरेंद्र । ऐंद्रं वाक्यं शृणु मे राजसिंह यत्प्राह लोकाधिपतिर्महात्मा । बृहस्पतिं

धृतराष्ट्रगच्छैत्त्वहितो मरुत्तं संवर्त्तेन सहितं तं वदस्व । बृहस्पतिं त्वं मनिगच्छस्वराजन्वज्रं वा ते प्रहरिष्यामि घोरं ।२

न ७

याजकं त्वं वृणीष्व वज्रं ते वा प्रहरिष्यामि घोरं । वचश्चेदेतन्न करिष्यसे मे प्राहैतदेतावदचिंत्यकर्मा ॥ मरुत्त उवाच ॥ त्वं चैवैतद्वेत्थ पुरंदरश्च विश्वेदेवा वसवश्चाश्विनौ च । मित्रद्रोहे निष्कृतिर्वै यथैव नास्तीति लोके श्रुत एव वादः । बृहस्पतिर्याजयिता महेंद्रं देवश्रेष्ठं वज्रभृतां वरिष्ठं । संवर्त्तो मां याजयिता च विप्रो न ते वाक्यं तत्र वा रोचयामि ॥ गंधर्व उवाच ॥ घोरो नादः श्रूयते वासवस्य नभस्तले गर्जतो राजसिंह । व्यक्तं वज्रं मोक्ष्यते वै महेंद्रः क्षेमं राजंश्चिंत्यतामेष कालः ॥ व्यास उवाच ॥ इत्येवमुक्तो धृतराष्ट्रेण राजा श्रुत्वा नादं नदतो वासवस्य । तपोनित्यं ब्रह्मविदां वरिष्ठं संवर्त्तं तं ज्ञापयामास कार्यं ॥ मरुत्त उवाच ॥ इममश्मानं प्लवमानमाराद्दिशा दूरं तेन न दृश्यते द्य । प्रपद्ये हं शर्म विप्रेंद्र त्वत्तः प्रयच्छ तस्मादभयं विप्रमुख्य । अयमायाति वै वज्री दिशो विद्योतयन्दश । अमानुषेणावेगेन सदस्यास्त्रासिता ह्यमे ॥ संवर्त्त उवाच ॥ भयं शक्राद्व्येतु ते राजसिंह प्रणुत्से हं भयमेतत्सुघोरं । संस्तंभिन्या विद्यया क्षिप्रमेव मा भैस्त्वमस्माद्भव चापि प्रतीतः । अहं संस्तंभयिष्यामि मा भैस्त्वं शक्रतो नृप । सर्वेषामेव देवानां क्षयितान्यायुधान्यपि । दिशो वज्रं व्रजतां वायुरेतु वर्षं भूत्वा वर्षतु काननेषु । आपः प्लवंतां त्वंतरीक्षे वृथा च सौदामनी दृश्यतां मा बिभेस्त्वं । अथो वह्निस्त्रातु वा सर्वतस्ते कामं सर्वं वर्षतु वासवो वा । वज्रं तथा स्थापयतां सुघोरं महाघोरं मा नंजलौघैः ॥ मरुत्त उवाच ॥ घोरः शब्दः श्रूयते वै महास्वनो वज्रस्यैष सहितो मारुतेन । आत्मा हि मे प्रव्यथिते मुहुर्मुहुर्न मे स्वास्थ्यं जायते चाद्य विप्र ॥ संवर्त्त उवाच ॥ वज्रादुग्राद्व्येतु भयं नरेंद्र वातो भूत्वा हन्मि तं चाद्य वज्रं । भयं त्यक्त्वा वरमन्यं वृणीष्व कं ते कामं तपसा साधयामि ॥ मरुत्त उवाच ॥ इंद्रः साक्षात्सहसाभ्येतु विप्र हविर्यज्ञे प्रतिगृह्णातु चैव । स्वं स्वं धिष्ण्यं चैव जुषंतु देवाः सुतं सोमं प्रतिगृह्णंतु चैव ॥ संवर्त्त उवाच ॥ अयमिंद्रो हरिभिरायाति राजन्देवैः सर्वैः सहितः सूयमानः । मंत्राहूतं सचमि मंममाध्यपश्यश्चैनं मंत्रविस्रस्तकायं ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
८

क्षि

ततो देवैः सहितो देवराजो रथे युक्त्वा तान्हरीन्वाजिमुख्यान्। आयाद्यज्ञमथ राज्ञः पिपासुरावितस्याप्रमेयस्य सोमं। तमायान्तं सहितं देवसंघैः प्रत्युद्ययौ स पुरोधा मरुत्तः। चक्रे पूजां देवराजाय चाग्र्यां यथाशास्त्रं विधिवत्प्रीयमाणः॥ संवर्त उवाच॥ स्वागतं ते पुरुहूतेह विद्वन्यज्ञोऽप्ययं संनिहिते त्वयीन्द्र। शोशुभ्यते बलवृत्रघ्न भूयः पिबस्व सोमं सुत्तमुद्यतं मया॥ मरुत्त उवाच॥ शिवेन मां पश्य नमश्च तेऽस्तु प्राप्तो यज्ञः सफलं जीवितं मे। अयं यज्ञं कुरुते मे सुरेन्द्र बृहस्पतेरवरजो द्विजमुख्यः॥ इन्द्र उवाच॥ जानामि ते गुरुमेतं तपोधनं बृहस्पतेरनुजं तिग्मतेजसं। यस्याह्वानादागतोऽहं नरेन्द्र प्रीतिर्मे ह्यद्य त्वयि मन्युः प्रणष्टः॥ संवर्त उवाच॥ यदि प्रीतस्त्वमसि वै देवराज तस्मात्स्वयं शाधि यज्ञे विधानं। स्वयं सर्वान्कुरु भागान्सुरेन्द्र जानात्वयं सर्वलोकश्च देव॥ व्यास उवाच॥ एवमुक्तस्त्वाङ्गिरसेन शक्रः समादिदेश स्वयमेव देवान्। सभाः क्रियन्तामावसथाश्च मुख्याः सहस्रशश्चित्रभासः समृद्धाः। क्लृप्तस्थूणाः कुरुतारोहणानि गन्धर्वाणामप्सरसां च शीघ्रं। येषु नृत्येरन्नप्सरसः सहस्रशः स्वर्गोपमः क्रियतां यज्ञवाटः॥ इत्युक्तास्ते चक्रुराशु प्रतीता दिवौकसः शक्रवाक्यान्नरेन्द्र। ततो वाक्यं प्राह राजानमिन्द्रः प्रीतो राजन्पूज्यमानो नरेन्द्र। एष त्वयाहं [illegible] राजन्नुपसमेत्य ये चाप्यन्ये तव पूर्वे नरेन्द्र। सर्वाश्चान्या देवताः प्रीयमाणा हविस्तुभ्यं प्रतिगृह्णन्तु राजन्॥ आग्नेयं वै लोहितमालभन्तां वैश्वदेवं बहुरूपं हि राजन्। नीलं चोक्षाणं मेध्यमभ्यालभन्तां चलच्छिश्नं मत्प्रदिष्टं द्विजेन्द्राः॥ ततो यज्ञो ववृते तस्य राज्ञो यत्र देवाः स्वयमन्नानि जह्रुः। यस्मिञ्शक्रो ब्राह्मणैः पूज्यमानः सदस्योऽभूद्धरिमान्देवराजः॥ ततः संवर्तश्चित्यगतो महात्मा यथा वह्निः प्रज्वलितो द्वितीयः। हवींष्युच्चैराह्वयन्देवसंघाञ्जुहावाग्नौ मन्त्रवित्सुप्रतीतः॥ ततः पीत्वा बलभित्सोममग्र्यं ये चाप्यन्ये सोमपा वै दिवौकसः। सर्वे तथान्ये तेऽनुज्ञाताः प्रययुः पार्थिवेन यथा जोषं तर्पिताः प्रीतिमन्तः॥ ततो राजा जातरूपस्य राशीन्पदे पदे कारयामास हृष्टः। द्विजातिभ्यो विसृजन्भूरि वित्तं रराज वित्तेश इवारिहन्ता॥ ततो वित्तं सविधं संनिधाय यथोत्साहं कारयित्वा च कोशं।

ना

दा

८

मोहः समभवन्महान्। रथन्तरेण तं तात वसिष्ठः प्रत्यबोधयत्। ततोऽस्य वृत्रः शरीरस्थं जघान भरतर्षभ। शतक्रतुरदृश्येन १२

अनुज्ञातो गुरुणा संनिहत्य शशास गामखिलां सागरान्तां। एवंगुणः संबभूवेह राजा यस्य क्रतौ तत्सुवर्णं प्रभूतं। तत्त्वं समादाय नरेन्द्र वित्तं यजस्व देवांस्तर्पयानो विधानैः वैशम्पायन उवाच ततो राजा पाण्डवो हृष्टरूपः श्रुत्वा वाक्यं सत्यवत्याः सुतस्य। मनश्चक्रे तेन वित्तेन यष्टुं ततोऽमात्यैर्मन्त्रयामास भूयः॥ इत्याश्वमेधिके संवर्तमरुत्तीये वैशं॥ इत्युक्ते नृपतौ तस्मिन्व्यासेनाद्भुतकर्मणा। वासुदेवो महातेजास्ततो वचनमाददे। तं नृपं दीनमनसं निहतज्ञातिबान्धवं। उपप्लुतमिवादित्यं सधूममिव पावकं। निर्विण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वहः। आश्वासयन्धर्मसुतं प्रवक्तुमुपचक्रमे॥ वासुदेव उवाच॥ सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदं। एतावाञ्ज्ञानविषयः किं प्रलापः करिष्यति। नैव ते निष्ठितं कर्म नैव ते शत्रवो जिताः॥ शत्रुं कथं शरीरस्थमात्मनो नावबुध्यसे। अत्र ते वर्तयिष्यामि यथाधर्मं यथाश्रुतं। इन्द्रस्य सह वृत्रेण यथा युद्धमवर्तत। वृत्रेण पृथिवी व्याप्ता पुरा किल नराधिप। दृष्ट्वा स पृथिवीं व्याप्तां गन्धस्य विषये हृते। धराहरणदुर्गन्धो विषयः समपद्यत। शतक्रतुश्चुकोपाथ गन्धस्य विषये हृते। वृत्रस्य स ततः क्रुद्धो वज्रं घोरमवासृजत्। सवध्यमानो वज्रेण सुभृशं भूरितेजसा। विवेश सहसा तोयं जग्राह विषयं ततः। व्याप्ते तोये तु वृत्रेण रसे च विषये हृते। शतक्रतुरतिक्रुद्धस्तोवज्रमवासृजत्। स वध्यमानो वज्रेण तस्मिन्नमिततेजसा। विवेश सहसा ज्योतिर्जग्राह विषयं ततः। व्याप्ते वायौ तु वृत्रेण स्पर्शे च विषये हृते। शतक्रतुरतिक्रुद्धस्तोवज्रमवासृजत्। स वध्यमानो वज्रेण तस्मिन्नमिततेजसा। आकाशमभिदुद्राव जग्राह विषयं ततः। आकाशे वृत्रभूते च शब्दे च विषये हृते। शतक्रतुरभिक्रुद्धस्तोवज्रमवासृजत्। स वध्यमानो वज्रेण तस्मिन्नमिततेजसा। विवेश सहसा शक्रं जग्राह विषयं ततः। तस्य वृत्रगृहीतस्य वज्रेणेति हनः कृतं। इदं धर्मरहस्यं तु शक्रेणोक्तं महर्षिषु। ऋषिभिश्च मम प्रोक्तं तन्निबोध जनाधिप॥ इत्याश्वमेधिके वृत्रवधे॥ वासुदेव उवाच॥ द्विविधो जायते व्याधिः

अग्नेर्वृत्रेण व्याप्ते रूपे च विषये हृते। शतक्रतुरतिक्रुद्धस्ततो वज्रमवासृजत्। स वध्यमानो वज्रेण सुभृशं भूरिवर्चसा। विवेश सहसा वायुं जग्राह विषयं ततः।८

ह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुःखेन बाध्यते शीतं शीतेनोष्णं च बाध्यते । सत्वं रजस्तमश्चेति त्रयस्त्वात्मगुणाः स्मृताः ।२

अश्व
९

शरीरो मानसस्तथा । परस्परं तयोर्जन्म निर्द्वंद्वं नोपलभ्यते । शरीराज्जायते व्याधिः शारीरो नात्र संशयः मनसो जायते व्याधिर्मानस इत्येति निश्चयः ॥ शीतो
ष्णे चैव वायुश्च गुणा राजन् शरीरजाः । तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणं । तेषामन्यतमोत्सेके विधानमुपदिश्यते । हर्षेण बाध्यते शोको हर्षः शो
केन बाध्यते । कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति । कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमर्हति । स त्वं न दुःखी दुःखस्य न सुखी न सुखस्य च । स्मर्तु
मिच्छसि कौंतेय किमन्यद्बुद्धिविभ्रमात् । अथवा ते स्वभावोयं येन पार्थावकृष्यसे । दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलां । मिषतां पांडवेयानां न तस्य
स्मर्तुमर्हसि । प्रव्राजनं च नगरादजिनैश्च प्रतिवासनं । महारण्यनिवासश्च न तस्य स्मर्तुमर्हसि । जटासुरात्परिक्लेशश्चित्रसेनेन चाहवः । सैंधवाच्च परिक्ले
शो न तस्य स्मर्तुमिच्छसि । पुनरज्ञातचर्यायां कीचकेन पदा वधः । याज्ञसेन्यास्तथा पार्थ न तस्य स्मर्तुमिच्छसि । यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिंदम ।
मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितं । तस्मादभ्युपगंतव्यं युद्धाय भरतर्षभ । परमव्यक्तरूपस्य परं त्यक्त्वा स्वकर्मभिः । यत्र नैव शरैः कार्यं न भृत्यैर्न
च बंधुभिः । आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितं । अस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि । एतज्ज्ञात्वा तु कौंतेय कृतकृत्यो भविष्यसि । एतां बु
द्धिं विनिश्चित्य भूतानामागतिं गतिं । पितृपैतामहे वृत्ते सौधि राज्यं यथोचितं ॥ ॥ इत्याश्वमेधिके ॥ १२ ॥ वासुदेव उवाच ॥ न बाह्यं द्रव्यमुत्सृज्य सि
द्धिर्भवति भारत । शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा । बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृध्यतः । यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तथा । द्व्य
क्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतं । ममेति च भवेन्मृत्युर्न ममेति च शाश्वतं । ब्रह्म मृत्युश्च तौ राजन्नात्मन्येव व्यवस्थितौ । अदृश्यमानौ भूतानि योधये
तामसंशयं । अविनाशोस्य सत्वस्य नियतो यदि भारत । भित्वा शरीरं भूतानामहिंसां प्रतिपद्यते । लब्ध्वा वा पृथिवीं सर्वां सहस्थावरजंगमां । ममत्वं यस्य नै

९

सर्वे कामा मनसोंगप्रसूता यान्त्वं रतिः संहरसे विविंसं । न योन्यो जन्मनाभ्यासयोगाद्योगं योगी सारमार्गं विविंस ।२
यो मां प्रयतते हंतुं वेदैर्वेदांतसाधकैः । स्थावरेषु च भूतेषु तस्य प्रादु० यो मां प्रयतते हंतुं यज्ञैर्विविधदक्षिणैः । जंगमेष्वेव धर्मात्मा तस्य प्रादुर्भवाम्यहं ।५

त्यज्यात्किं तया स करिष्यति । अथवा वसतः पार्थ वने वन्येन जीवतः । द्रव्येषु ममता यस्य मृत्योरास्ये स वर्तते । बाह्यांतराणां शत्रूणां स्वभावं पश्य भारत । यो न प
श्यति तद्भूतं मुच्यते महतो भयात् । कामात्मानं प्रशंसंति लोके नेहाकामता क्वचित्प्रवृत्तिरिः । दानं हि वेदाध्ययनं तपश्च कामेन कर्माणि सदैव काले । व्रतं
श्च यज्ञान्नियमान्ध्यानयोगान् कामेन यो नारभते विदित्वा । यद्यद्धयं कामयते न धर्मो न यो धर्मो नियतिस्तस्य मूलं । अथ गाथाः कामगीताः कथयंति पुराविदः । शृणु सं
कीर्त्यमानास्तानि निखिलेन युधिष्ठिर । नाहं शक्योनुपायेन हंतुं भूतेन केनचित् । यो मां प्रयतते हंतुं ज्ञात्वा प्रहरणे बलं । तस्य तस्मिन्प्रहरणे पुनः प्रादुर्भ
वाम्यहं । यो मां प्रयतते हंतुं यज्ञैस्तपसा पराक्रमैः । भावो भवामि तस्याहं स च मां नावबुध्यते । यो मां प्रयतते हंतुं तपसा संशितव्रतः । ततस्तपसि तस्याथ पुनः
प्रादुर्भवाम्यहं । यो मां प्रयतते हंतुं मोक्षमास्थाय पंडितः । तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च । अवध्यः सर्वभूतानामहमेकः सनातनः । तस्मात्त्वमपि
तं कामं यज्ञैर्विविधदक्षिणैः । धर्मं कुरु महाराज तत्र ते स भविष्यति । यजस्व वाजिमेधेन विधिवद्दक्षिणावता । अन्यैश्च विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः ।
मा ते व्यथास्तु निहतान्बंधून्वीक्ष्य पुनः पुनः । न शक्यास्ते पुनर्द्रष्टुं ये हतास्मिन्रणाजिरे । स त्वमिष्ट्वा महायज्ञैः समृद्धैराप्तदक्षिणैः । लोके कीर्तिं परां प्राप्य गतिमग्र्यां
गमिष्यसि ॥ ॥ इत्याश्वमेधिके पर्वणि ॥ १३ ॥ वैशं ॥ एवं बहुविधैर्वाक्यैर्मुनिभिस्तैस्तपोधनैः । समाश्वास्यत राजर्षिर्हतबंधुर्युधिष्ठिरः । सोनुनीतो भगवता विष्टरश्र
वसा स्वयं । द्वैपायनेन कृष्णेन देवस्थेन न तथैव च । धौम्येन नारदेनाथ भीमेन नकुलेन च पार्थिव । कृष्णया सहदेवेन विजयेन च धीमता । अन्यैश्च पुरुषव्याघ्रैर्ब्राह्मणैः शा
स्त्रदृष्टिभिः । व्यजहाच्छोकजं दुःखं संतापं चैव मानसं । अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः । कृत्वाथ प्रेतकार्याणि बंधूनां च पुनर्नृपः । अनुशास्य च धर्मात्मा पृथि
वीं सागरांबरां । इत्थं तथा च राज्यं प्राप्य च केवलं । व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः । आश्वासितोहं प्राक्वृद्धैर्भवद्भिर्मुनिपुंगवैः । न सूक्ष्ममपि मे किंचि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व·
१०
संग्रामात्

व्यलीकमिह विद्यते। अर्थश्च सुमहान्प्राप्तो येन यक्ष्यामि देवताः॥ पुरस्कृत्येह त्वत्तः समानेष्याम्यहं मखं। हिमवंतं त्वया गुप्ता गमिष्यामः पितामह। बह्वाश्चर्यो हि
देशस्स श्रूयते द्विजसत्तम। तथा भगवता सत्यं कृष्णेनाबहुभाषितं। देवर्षिणा नारदेन देवलेनासितेन च। भागधेयः पुरुषः कश्चिदेवं विधान्गुरून्। लभते व्य
सनं प्राप्य सुहृदः साधुसंमतान्। एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः। अभ्यनुज्ञाप्य राजानं तथोभौ कृष्णफाल्गुनौ। पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः।
ततो धर्मसुतो राजा तत्रैवोपाविशत्प्रभुः। एवं नातिमहान्कालः स तेषामभ्यवर्त्तत। शौचकर्मणि भीष्मस्य कुर्वतां निधने तदा। महादानानि विप्रेभ्यो ददतामौर्ध्व
देहिकं। भीष्मकर्णपुरोगाणां कुरूणां कुरुसत्तमः सहितो धृतराष्ट्रेण प्रददावौर्ध्वदेहिकं। ततो दत्वा वसु धनं विप्रेभ्यः पांडवर्षभः। धृतराष्ट्रं पुरस्कृत्य विवेश
गजसाह्वयं। स समाश्वास्य पितरं प्रज्ञाचक्षुषमीश्वरं। अन्वशाद्वै स धर्मात्मा पृथिवीं भ्रातृभिः सह॥ ॥ इत्याश्वमेधिके ६४ जनमेजय उवाच॥ वि
जिते पांडवेयैस्तु प्रशांते द्विजसत्तम। राष्ट्रे किं चक्रतुर्वीरौ वासुदेवधनंजयौ॥ ॥ वैशंपायन उवाच॥ विजिते पांडवेयैस्तु प्रशांते च विशांपते। राष्ट्रे च स्वत्वमुद्दि
ष्टौ वासुदेवधनंजयौ। विजह्राते मुदा युक्तौ दिवि देवेश्वराविव। तौ वनेषु विचित्रेषु पर्वतानां च सानुषु। रमणीयेषु तीर्थेषु पल्वलेषु नदीषु च। चंक्रम्यमा
णौ संहृष्टावश्विनाविव नंदने। इंद्रप्रस्थे महात्मानौ रेमतुः कृष्णपांडवौ। प्रविश्य तां सभां रम्यां विजह्राते च भारत। तत्र युद्धकथाश्चित्राः परिक्लेशांश्च पार्थि
व। कथायोगे कथायोगे कथां चित्राः कथयामासतुर्मुदा। देवतानामृषीणां च धर्मीश्चाव्याहतुस्तदा। प्रीयमाणौ कथाभिश्च रम्याभिः पांडवसत्तमौ। मधुराश्च कथाश्चित्रा
श्चित्रार्थपददर्शनाः। निश्चयज्ञः स पार्थाय कथयामास केशवः। पुत्रशोकाभिसंतप्तं ज्ञातीनां च सहस्रशः। कथाभिः शमयामास पार्थं शौरिर्जनार्दनः। १०
स तमाश्वास्य विधिवद्विधानज्ञो महायशाः। अपहृत्यात्मनो भारं विशश्रामेव सात्वतः। ततः कथांते गोविंदो गुडाकेशमुवाच ह। सांत्वयन्श्लक्ष्णया वाचा हेतुयुक्त

श्रावयामा

मिदं वचः॥ वासुदेव उवाच॥ विजितेयं मही कृत्स्ना सव्यसाचिन्परंतप। त्वद्बाहुबलमाश्रित्य राज्ञा धर्मसुतेन ह। असपत्नां महीं भुंक्ते धर्मराजो युधिष्ठिरः। भी
मसेनप्रभावेन यमयोश्च नरोत्तम। धर्मेण राज्ञा संप्राप्तं राज्यमेतदकंटकं। धर्मेण निहतः संख्ये स च राजा सुयोधनः॥ अधर्मरुचयो लुब्धाः सदा चाप्रियवा
दिनः। धार्तराष्ट्रा दुरात्मानः सानुबंधा निपातिताः। प्रशांतामखिलां पार्थ पृथिवीं पृथिवीपतिः। भुंक्ते धर्मसुतो राजा त्वया गुप्तः कुरूद्वह। रमे चाहं त्वया सा
र्द्धमरण्येष्वपि पांडव। किमु यत्र जनोयं वै पार्थ शत्रुनिकर्षण। यत्र धर्मसुतो राजा यत्र भीमो महाबलः। यत्र माद्रीसुतौ वीरौ रतिस्तत्र परा मम। तथैव स्व
र्गकल्पेषु सभोद्देशेषु भारत। रमणीयेषु पुण्येषु सहितस्य त्वयानघ। कालो महांस्त्वतीतो मे शूरसूनुमपश्यतः। बलदेवं च कौरव्य तथान्यान्वृष्णिपुंगवान्। सोहं
गंतुमभीप्सामि पुरीं द्वारवतीं प्रति। रोचतां गमनं मह्यं तवापि पुरुषर्षभ। उक्तो बहुविधं राजा तत्र तत्र युधिष्ठिरः। सह भीष्मेण यत्प्रोक्तमस्माभिः शोककारि
ते। शिष्टो युधिष्ठिरोस्माभिः शास्ता सन्नपि सत्तमः। तेन तच्च वचः सम्यग्गृहीतं सुमहात्मना। धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्यवादिनि। सत्यं धर्मो मतिश्चाग्र्या स्थिति
श्च सततं स्थिरा। तद्गत्वा तं महात्मानं यदि ते रोचतेर्जुन। अस्मद्गमनसंयुक्तं वचो ब्रूहि नराधिपं। नहि तस्याप्रियं कुर्यां प्राणत्यागेप्युपस्थिते। कुतो गंतुं महाबाहो पु
रीं द्वारवतीं प्रति। सर्वं त्विदमहं पार्थ त्वत्प्रीतिहितकाम्यया। ब्रवीमि सत्यं कौंतेय न मिथ्यैतत्कथंचन। प्रयोजनं च निर्वृत्तमिह वासे ममार्जुन। धार्तराष्ट्रो हतो राजा स

कौंतेय

बलः सपदानुगः। पृथिवी च वशे पार्थ धर्मपुत्रस्य धीमतः। स्थिता समुद्रवसना सशैलवनकानना। चिता रत्नैर्बहुविधैः कुरुराजस्य पांडव। धर्मेण राजा धर्मज्ञ
पातु सर्वां वसुंधरां। उपास्यमानो बहुभिः सिद्धैश्चापि महात्मभिः। स्तूयमानश्च सततं बंदिभिर्भरतर्षभ। तन्मया सह गत्वाद्य राजानं कुरुवर्द्धनं। आपृच्छ कुरु
श्रेष्ठ गमनं द्वारकां प्रति। इदं शरीरं वसु यच्च मे गृहे निवेदितं पार्थ सदा युधिष्ठिरे। प्रियश्च मान्यश्च हि मे युधिष्ठिरः सदा कुरूणामधिपो महीपतिः। प्रयोजनं चापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
११

निवासकारणे नविद्यते मे त्वदृते महाभुज॥ स्थिता हि पृथ्वी तव पार्थ शासने गुरोः प्रभावात्स्वयुधिष्ठिरस्य वा। इतीदमुक्तः स तदा महात्मना जनार्दनेना
मितविक्रमोर्जुनः। तथेति कृच्छ्रादिव वाचमब्रवीज्जनार्दनं संप्रतिपूज्य पार्थिव॥ ॥इत्याश्वमेधिके॥ ॥जनमेजय उवाच॥ ॥सभायां वस
तोस्तस्यां निहत्यारीन्महात्मनोः। केशवार्जुनयोः कानु कथा समभवद्द्विज॥ ॥वैशंपायन उवाच॥ ॥कृष्णेन सहितः पार्थः स्वरा
ज्यं प्राप्य केवलं। तस्यां सभायां रम्यायां विजहार मुदा युतः॥ ततः किंचित्सभोद्देशं स्वर्गोद्देशसमं नृप। यदृच्छया तौ मुदितौ जग्मतुः स्वजना
वृतौ। ततः प्रतीतः कृष्णेन सहितः पांडवोर्जुनः॥ निरीक्ष्य तां सभां दिव्यामिदं वचनमब्रवीत्॥ विदितं ते महाबाहो संग्रामे समुपस्थिते। मा
हात्म्यं देवकीमातस्तच्च मे रूपमैश्वरं। यत्तु तद्भवता प्रोक्तं पुरा केशव सौहृदात्॥ तत्सर्वं पुंडरीकाक्ष नष्टं मे नष्टचेतसः। मम कौतूहलं
त्वस्ति तेष्वर्थेषु पुनः प्रभो। भवांस्तु द्वारकां गंता नचिरादिव माधव॥ ॥वैशंपायन उवाच॥ ॥एवमुक्तस्ततः कृष्णः फाल्गुनं प्रत्यभा
षत। परिष्वज्य महातेजा वचनं वदतां वरः॥ ॥वासुदेव उवाच॥ ॥श्रावितस्त्वं मया गुह्यं ज्ञापितश्च सनातनं। धर्मं स्वरूपिणं पार्थ सर्वलो
कांश्च शाश्वतान्॥ अबुद्ध्या नाग्रहीर्यस्त्वं तन्मे सुमहदप्रियं। नच साद्य पुनर्भूयः स्मृतिर्मे संभविष्यति। नूनमश्रद्दधानोसि दुर्मेधाश्चा ह्य
सि पांडव। न च शक्यं पुनर्वक्तुमशेषेण धनंजय॥ स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने। न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः। परं हि ब्रह्म
कथितं योगयुक्तेन तन्मया॥ इतिहासं तु वक्ष्यामि तस्मिन्नर्थे पुरातनं। यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि॥ शृणु धर्मभृतां श्रेष्ठ गदतः सर्व
मेव मे। आगच्छद्ब्राह्मणः कश्चित्स्वर्गलोकादरिंदम। ब्रह्मलोकाच्च दुर्धर्षः सोस्माभिः पूजितोऽभवत्। अस्माभिः परिपृष्टश्च यदाह भरतर्षभ। दिव्येन

नंथ
य

११

विस्मितश्चाकुलो दृष्ट्वा काश्यपस्तं द्विजोत्तमं। परिचारेण महता गुरुं तं सम × ज्ञागारं सर्वतत्त्वानां कोविदं पुण्यपापयोः।३
तोषयत् (प्रीतात्मा योपपन्नश्च श्रुतचारित्रसंयुतं। ६

विधिना पार्थ तच्छृणु सर्वधारय ॥ब्राह्मण उ॥ मोक्षधर्मं समाश्रित्य कृष्ण यन्मां त्वं पृच्छसि। भूतानामनुकंपार्थं यन्मोहच्छेदनं प्रभो। तत्तेहं संप्र
वक्ष्यामि यथावन्मधुसूदन॥ शृणुष्वावहितो भूत्वा गदतो मम माधव। कश्चिद्विप्रस्तपोयुक्तः काश्यपो धर्मवित्तमः। आससाद द्विजं कंचिद्धर्माणामा
गतागमं। गतागते सुबहुशो ज्ञानविज्ञानपारगं। लोकतत्त्वार्थकुशलं ज्ञातारं सुखदुःखयोः॥ द्रष्टारमुच्चनीचानां कृतीनां कर्मनिर्दिष्टां चरंतं मुक्तवत्सिद्धं
प्रशांतं संयतेंद्रियो दीप्यमानं श्रिया ब्राह्म्या क्रममाणं च सर्वशः। अंतर्धानगतिज्ञं च श्रुत्वा तत्त्वेन काश्यपः। तथैवांतर्हितैः सिद्धैर्यांतं चक्रधरैः सह। संभाषमा
णमेकांते समासीनं च तैः सह। यदृच्छया च गच्छंतमसक्तं पवनं यथा॥ तं समासाद्य मेधावी स तदा द्विजसत्तमः। चरणौ धर्मकामोस्य तपस्वी सुसमाहितः। प्र
तिपेदे यथान्यायं भक्त्या परमया युतः। भावेनातोषयच्चैवं गुरुवृत्त्या परंतपः। तस्मै तुष्टः स शिष्याय प्रसन्नोथाब्रवीद्गुरुः॥ सिद्धिं परामभिप्रेत्य शृणु तन्मे जनार्द
न। विविधैः कर्मभिस्तात पुण्ययोगैश्च केवलैः। गच्छंतीह गतिं मर्त्या देवलोकेपि च स्थितिं। न क्वचित्सुखमत्यंतं न क्वचिच्छाश्वती स्थितिः। स्थानाच्च महतो भ्रंशो
दुःखं लब्ध्वा पुनः पुनः। अशुभा गतयः प्राप्ताः कष्टा मे पापसेवनात्। काममन्युपरीतेन तृष्णया मोहितेन च। पुनः पुनश्च मरणं जन्म चैव पुनः पुनः। आहारा वि
विधा भुक्ताः पीता नानाविधाः स्तनाः। मातरो विविधा दृष्टाः पितरश्च पृथग्विधाः। सुखानि च विचित्राणि दुःखानि च मयानघ। प्रियैर्विवासो बहुशः संवासश्चाप्रियैः
सह। धननाशश्च संप्राप्तो लब्ध्वा दुःखेन तद्धनं। अवमानाः सुकष्टाश्च परतः स्वजनात्तथा। शारीरा मानसाश्चापि वेदना भृशदारुणाः। प्राप्ता विमाननाश्चोग्रा वधबं
धाश्च दारुणाः। पतनं निरये चैव यातनाश्च यमक्षये। जरारोगाश्च सततं व्यसनानि च भूरिशः। लोकेस्मिन्ननुभूतानि द्वंद्वजानि भृशं मया। ततः कदाचिन्निर्वेदा
न्निराकाराश्रितेन च। लोकतंत्रं परित्यक्तं दुःखार्तेन भृशं मया। लोकेस्मिन्ननुभूयाहमिमं मार्गमनुष्ठितः। ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया। नाहं पुनरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
१२

हा गंता लोकानालोक्याम्यहं। आसिद्देराग्रज्ञा सर्गासात्मनो पिता तिः श्रुता। उपलब्धा हि द्विजश्रेष्ठ तथायं विधिरुत्तमं। इतः परं गमिष्यामि ततः परतरं पुनः। ब
ह्मणः पदमव्यग्रं मा ते भूत्तत्र संशयः। नाहं पुनरिहागंता मर्त्यलोकं परंतप। प्रीतो स्मि ते महाप्राज्ञ ब्रूहि किं करवाणि ते। यदीप्सुरुपपन्नस्त्वं तस्य कालोयमा
गतः। अभिजाने च तते दहं यदर्थं त्वमुमागतः। नचिरात्तु गमिष्यामि तेनाहं त्वामचूचुदं। भृशं प्रीतो स्मि भवतश्चारित्रेण विचक्षण। परिपृच्छ यावत्कल्याणं भाषे
यं यत्तवेप्सितं। बहु मन्ये च ते बुद्धिं भृशं संपूजयामि च। येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप। इत्याश्वमेधिके [illegible] ॥ ततस्तस्योपसंगृह्य पा
दौ प्रश्नान्सुदुर्विदान्। पप्रच्छ तांश्च सर्वान्स प्राह धर्मभृतां वरः॥ कश्यप उवाच॥ कथं शरीरं च्यवते कथं चैवोपजायते। कथं कष्टाच्च संसारात्संसरन्परि
मुच्यते। आत्मानं वा कथं युक्त्वा तच्छरीरं विमुञ्चति। शरीरतश्च निर्मुक्तः कथमन्यत्प्रपद्यते। कथं वा सुकृतं चायं कथं वा दुःकृतं नरः। उपभुंक्ते क्व वा कर्म वि
देहस्योपतिष्ठते॥ ब्राह्मण उवाच॥ एवं संचोदितः सिद्धः प्रश्नांस्तान्प्रत्यभाषत। आनुपूर्व्येण वार्ष्णेय यथा तन्मे निगदतः शृणु॥ सिद्ध उवाच॥ आयुःकीर्तिक
राणीह यानि कर्माणि सेवते। शरीरग्रहणे न्यस्मिंस्तेषु क्षीणेषु सर्वशः। आयुःक्षयपरीतात्मा विपरीतानि सेवते। बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते।
सत्वं बलं च कालं च विदित्वा चात्मनस्तथा। अतिवेलमुपाश्नाति तैर्विरुद्धान्यनात्मवान्। यदायमतिकष्टानि सर्वाण्युपनिषेवते। अत्यर्थमपि वा भुंक्ते न वा
भुंक्ते कदाचन। दुष्टान्नामिषपानं च यदन्योन्यविरोधि च। गुरु चापि समं भुंक्ते नातिजीर्णे पि वा पुनः। व्यायाममतिमात्रं वा व्यवायं चोपसेवते। सततं कर्म
लोभाद्वा प्राप्तं वेगं विधारयेत्। रसाभियुक्तमन्नं वा दिवास्वप्नं तथा पि वा। अपक्वेनागते काले स्वयं दोषान्प्रदीरयन्। स्वदोषकोपनाद्रोगं प्राप्नोति मरणां
तिकं। अथ चोद्बंधनादीनि परीतानि व्यवस्यति। तस्य तैः कारणैर्जंतोः शरीरं च्यवते यथा। जीवितं प्रोच्यमानं तद्यथावदुपधारय। ऊष्मा प्रकुपितः काये तीव्र

१२

ना

वायुसमीरितः। शरीरमनुपर्येत्य सर्वान्प्राणान्रुणद्धि वै। अत्यर्थं बलवानूष्मा शरीरे परिकोपितः। भिनत्ति जीवस्थानानि मर्माणि विद्धि तत्वतः। ततः सवेदनः सद्यो
जीवः प्रच्यवते क्षरन्। शरीरं च्यवते जंतुश्छिद्यमानेषु मर्मसु। वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम। जातीमरणसंविग्नाः सततं सर्वजंतवः। दृश्यंते संत्यजंतः श
रीराणि द्विजर्षभ। गर्भसंक्रमणे चैव मर्मणामतिसर्पणात्। तादृशीमेव लभते वेदनां मानवः पुनः। छिन्नसंधिरथ क्लेदमद्भिः संलीयते नरः। यदा पंचसु तेषु संश्रि
तत्वं नियच्छति। शैत्यात्प्रकुपितं काये तीव्रवायुसमीरितः। यः स पंचसु भूतेषु प्राणापाने व्यवस्थितः। स गच्छत्यूर्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणं। शरीरं हि जहात्ये
व निरुच्छ्वासश्च जायते। स निरूष्मा निरुच्छ्वासो निश्रीको हतचेतनः। ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते नरः। स्रोतोभिर्यैर्विजानाति इंद्रियार्थाञ्छरीरभृत्। तैरेव न वि
जानाति प्राणमाहारसंभवं। तत्रैव कुरुते काये यः स जीवः सनातनः। येषां यद्यद्भवेद्युक्तं संनिपाते क्वचित्क्वचित्। तन्मर्म विजानीहि शास्त्रदृष्टं हि तत्तथा। तेषु मर्मसु

त

भिन्नेषु ततः स समुदीरयन्। आविश्य हृदयं जंतोः क्षिप्रं सिद्धं विरुध्यते। ततः सचेतनो जंतुर्नाभिजानाति किंचन। तमसा संवृतज्ञानः संवृतेष्वथ मर्मसु। स जीवो निरधिष्ठा
नश्चाहतो मातरिश्वना। ततः स तं पुनः श्वासं भृशमुच्छ्वस्य दारुणं। निष्क्रामन्कंपयत्याशु तच्छरीरमचेतनं। स जीवः प्रच्युतः कायात्कर्मभिः स्वैः समावृतः। अभिनात
स्ततः प्राणैः पापैर्वाप्युपपद्यते। ब्राह्मणा ज्ञानसंपन्ना यथावच्छ्रुतनिश्चयाः। इतरं कृतपुण्यं वा तं विजानंति लक्षणैः। यथांधकारे खद्योतं लीयमानं ततस्ततः। चक्षु
ष्मंतः प्रपश्यंति तथैव ज्ञानचक्षुषः। पश्यंत्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा। च्यवंतं जायमानं च योनिं चानुप्रवेशितं। तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः।
कर्मभूमिरियं भूमिर्यत्र तिष्ठंति जंतवः। ततः शुभाशुभं कृत्वा लभंते सर्वदेहिनः। इहैवोच्चावचान्भोगान्प्राप्नुवंति स्वकर्मभिः। इहैवाशुभकर्माणः कर्मभिर्निरयं गताः॥
अवाग्गतिरियं कष्टा यत्र पच्यंति मानवाः। तस्मात्सुदुर्लभो मोक्ष आत्मा रक्ष्यो ततो भृशं। ऊर्ध्वं तु जंतवो गत्वा येषु स्थानेष्ववस्थिताः। कीर्त्यमानानि तानीह तत्त्वतस्तन्निबो

कृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
१३

धय। यज्ञ त्वा नैष्ठिकीं बुद्धिं बुध्येथाः सर्वनिश्चयात्। तारारूपाणि सर्वाणि यच्चैतच्चन्द्रमण्डलं। यच्च विभ्राजते लोके स्वभासा सूर्यमण्डलं। स्थानान्येतानि जानीहि
नराणां पुण्यकर्मणां। कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः। तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमाः। न तत्राप्यस्ति संतोषो दृष्ट्वा दीप्ततरां श्रियं। इत्येता
गतयः सर्वाः पृथक्त्वे समुदीरिताः। उपपत्तिं तु गर्भस्य वक्ष्याम्यहमतः परं। यथावत्तन्निगदतः शृणुष्वावहितो द्विज॥ अनुगीतासु॥ ब्राह्मण उवाच॥ शुभाना
मशुभानां च नेह नाशोऽस्ति कर्मणां। प्राप्य प्राप्य तु पच्यन्ते क्षेत्रं क्षेत्रं तथा तथा। यथा प्रसूयमानं तु फली दद्यात्फलं बहु। तथा स्याद्विपुलं पुण्यं शुभेन मनसा कृ
तं। पापं चापि तथैव स्यात्पापेन मनसा कृतं। पापं चापि तथैव स्यात्पापेन मनसा कृतं। पुरोधाय मनो हीदं कर्मण्यात्मा प्रवर्तते। यथा कर्मसमाविष्टः काममन्युस
मावृतः। नरो गर्भं प्रविशति तच्चापि शृणु चोत्तरं। शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतं। क्षेत्रं कर्मजमाप्नोति शुभं वा यदि वाऽशुभं। सौक्ष्म्यादव्यक्तभावाच्च न स
क्वचन सज्जति। संप्राप्य ब्राह्मणः कामं तस्मात्तद्ब्रह्म शाश्वतं। तद्बीजं सर्वभूतानां तेन जीवन्ति जन्तवः। स जीवः सर्वगात्राणि गर्भस्याविश्य भागशः। दधाति चेतसा
सद्यः प्राणस्थानेष्ववस्थितः। ततः स्पन्दयतेऽङ्गानि स गर्भश्चेतनान्वितः। यथा लोहस्य निस्यन्दो निषिक्तो बिम्बविग्रहं। उपैति तद्वज्जानीहि गर्भे जीवप्रवेशनं। लोह
पिण्डं यथा वह्निः प्रविशत्यभितापयन्। तथा त्वमपि जानीहि गर्भे जीवोपपादनं। यथा च दीपः शरणं दीप्यमानः प्रकाशते। एवमेव शरीराणि प्रकाशयति चेत
ना। यद्यच्च कुरुते कर्म शुभं वा यदि वाऽशुभं। पूर्वदेहकृतं सर्वमवश्यमुपभुञ्जते। ततस्तत्क्षीयते चैव पुनरन्यत्प्रचीयते। यावत्तन्मोक्षयोगस्थं धर्मं नैवावबुध्
यते। तत्र कर्म प्रवक्ष्यामि सुखी भवति येन वै। आवर्तमानो जातीषु तथान्योन्यासु सत्तम। दानं व्रतं ब्रह्मचर्यं यथोक्तं ब्रह्मधारणं। दमः प्रशान्तता चैव भूताना
मनुकम्पनं। संयमश्चानृशंस्यं च परस्वादानवर्जनं। व्यलीकानामकरणं भूतानां मनसा भुवि। मातापित्रोश्च शुश्रूषा देवतातिथिपूजनं। गुरुपूजा घृणा नित्यं

दि
नु

१३

दानं रूपमिन्द्रियसंयमः। प्रवर्तनं शुभानां च तत्सतां वृत्तमुच्यते। ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतीः। एवं सत्सु सदा पश्येत्तत्र ह्येषा ध्रुवा स्थिता। आचारो धर्ममाचष्टे
यस्मिन्सन्तो व्यवस्थिताः। तेषु धर्मविनिर्दिष्टं यः स धर्मः सनातनः। यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात्। ततो नियम्यते लोकः प्रच्युतं धर्मवर्त्मनि। यस्तु योगी च मुक्तश्च
स एतेभ्यो विशिष्यते। वर्तमानस्य धर्मेण पुरुषस्य यथा तथा। संसारतारणं ह्यस्य कालेन महता भवेत्। एवं पूर्वकृतं कर्म सर्वो जन्तुर्निषेवते। सर्वं तत्कारणं येन विकृ
तोऽहमिहागतः। शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितं। इत्येवं संशयो लोके तच्च वक्ष्याम्यतः परं। शरीरमात्मनः कृत्वा सर्वलोकपितामहः। त्रैलोक्यमसृजद्ब्रह्मा कृ
त्स्नं स्थावरजङ्गमं। ततः प्रधानमसृजत्प्रकृतिं स शरीरिणां। यया सर्वमिदं व्याप्तं यां लोके परमां विदुः। इदं तत्क्षरमित्युक्तं परं त्वमृतमक्षरं। त्रयाणां मिथुनं सर्व
मेकैकस्य पृथक्पृथक्। असृजत्सर्वभूतानि पूर्वसृष्टः पितामहः। स्थावराणि च जीवानि इत्येषा पौर्विकी श्रुतिः। तस्य कालपरीमाणमकरोत्स पितामहः। भूते
षु परिवृत्तिं च पुनरावृत्तिमेव च। यथात्र कश्चिन्मेधावी दृष्टात्मा पूर्वजन्मनि। यत्प्रवक्ष्यामि तत्सर्वं यथावदुपपद्यते। सुखदुःखे सदा सम्यगनित्ये यः प्रपश्यति।
कायं चामेध्यसंघातं विनाशं कर्मसंहितं। यच्च किंचित्सुखं तच्च दुःखमिति स्मरन्। संसारसागरं घोरं तरिष्यति सुदुस्तरं। जातीमरणरोगैश्च समाविष्टः प्रधा
नवित्। चेतनावत्सु चैतन्यं समं भूतेषु पश्यति। निर्विद्यते ततः कृत्स्नं मार्गमाणः परं पदं। तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम। शाश्वतस्याव्ययस्याथ प
दस्य ज्ञानमुत्तमं। प्रोच्यमानं मया विप्र निबोधेदमशेषतः॥ ॥ अनुगीतासु॥ ब्राह्मण उवाच॥ यः स्यादेकायने लीनस्तूष्णीं किंचिदचिन्तयन्। पूर्वं पूर्वं
परित्यज्य स तीर्णो बन्धनाद्भवेत्। सर्वमित्रः सर्वसहः शमे रक्तो जितेन्द्रियः। व्यपेतभयमन्युश्च आत्मवान्मुच्यते नरः। आत्मवत्सर्वभूतेषु यश्चरेन्नियतः शुचिः। अमा
नी निरभिमानः सर्वतो मुक्त एव सः। जीविते मरणे चैव सुखदुःखे तथैव च। लाभालाभे प्रियद्वेष्ये यः समः स च मुच्यते। न कस्यचित्स्पृहयते नावजानाति किंचन। निर्द्व

अ

रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वो वीतरागात्मा सर्वतो मुक्त एव सः। अनमित्रोऽथ निर्बंधुरनपत्यश्च यः क्वचित्। त्यक्तधर्मार्थकामश्च निराकांक्षी स मुच्यते। नैव धर्मी न चाधर्मी पूर्वोपचितहा यकः। धातुक्षयप्रशांतात्मा निर्द्वंद्वः स प्रमुच्यते। अकर्मा वा विकांक्षी च पश्येज्जगदशाश्वतं। अश्वत्थसदृशं नित्यं मृत्युजन्मजरायुतं। वैराग्यबुद्धिः सततमात्मदोषव्यपेक्षकः। आत्मबंधविनिर्मोक्षं स करोत्यचिरादिव। अगंधमरसस्पर्शमशब्दमपरिग्रहं। अरूपमनभिज्ञेयं दृष्ट्वात्मानं विमुच्यते। पंचभूतगुणैर्हीनममूर्तिमदहेतुकं। अगुणं गुणभोक्तारं यः पश्यति स मुच्यते। विहाय सर्वसंकल्पान्बुद्ध्या शारीरमानसान्। शनैर्निर्वाणमाप्नोति निरिंधन इवानलः। तपसा रेंद्रियग्रामं यश्चरेन्मुक्त एव सः। विमुक्तः सर्वसंस्कारैस्ततो ब्रह्म सनातनं। परमाप्नोति संशांतमचलं दिव्यमक्षरं। अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमं। यज्ज्ञात्वा सिद्धमात्मानं लोके पश्यंति योगिनः। तस्योपदेशं वक्ष्यामि यथावत्तं निबोध मे। निर्द्वारैर्धारयेन्नित्यं पश्यंत्यात्मानमात्मनि। इंद्रियाण्यपि संहृत्य मन आत्मनि धारयेत्। तीव्रं तप्त्वा तपः पूर्वं मोक्षयोगं समाचरेत्। तपस्वी मुक्तसंकल्पो दंभाहंकारवर्जितः। मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि। स चेच्छक्नोत्ययं साधुर्योक्तुमात्मानमात्मनि। तत एकांतशीलस्तु पश्यत्यात्मानमात्मनि। संयतः सततं युक्त आत्मवान्विजितेंद्रियः। यथायमात्मनात्मानं साधु युक्तः प्रपश्यति। यथा हि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति। तथारूपमिवात्मानं साधुयुक्तः प्रपश्यति। इषीकां च यथा मुंजात्कश्चिन्निष्कृष्य दर्शयेत्। योगी निष्कृष्टमात्मानं यथा संपश्यते तथा। मुंजं शरीरं तस्याहुरिषीकामात्मनि श्रितां। एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमं। यदा तु युक्तमात्मानं सम्यक्पश्यति देहभृत्। न तस्येहेश्वरः कश्चित्त्रैलोक्यस्यापि यः प्रभुः। अन्योन्याश्चैव तनवो यथेष्टं प्रतिपद्यते। सम्यक्युक्त्वा स आत्मानं आत्मन्येव प्रतिष्ठते। विनिवृत्तजरामृत्युर्न शोचति न हृष्यति। देवानामपि देवत्वं युक्तः कारयते वशी। ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतं। विनिश्यत्सु लोकेषु न भयं तस्य जायते। क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित्। दुःखशोकमयैर्घोरैः संगस्नेहसमुद्भवैः। न विचाल्यति युक्तात्मा निस्पृहः शांतमानसः।

विनिवृत्तजरादुःखैः सुखं स्वपिति चापि सः। देहान्यथेष्टमभ्येति हित्वेमां मानुषीं तनुं। नैनं शस्त्राणि विध्यंते मृत्युश्चास्य न विद्यते। नातः सुखतरं किंचिल्लोके क्वचन दृश्यते। सम्यक्युक्त्वा स आत्मानमात्मन्येव प्रपश्यति। तदैव न स्पृहयते साक्षादपि शतक्रतोः। निर्वेदस्तु न कर्तव्यो निर्वेदेन कदाचन। योगमेकांतशीलस्तु यथा युंजीत तच्छृणु। दृष्टपूर्वां दिशं चिंत्य यस्मिन्संनिवसेत्पुरे। पुरस्याभ्यंतरे तस्य मनश्चार्यं न बाह्यतः। पुरस्याभ्यंतरे राजन्यस्मिन्नावसथे वशी। तस्मिन्नावसथे धार्यं सबाह्याभ्यंतरं मनः। प्रचिंत्यावसथं कृत्स्नं यस्मिन्काले च तिष्ठति। तस्मिन्काले मनः कार्यं विक्रियाभिर्न बाह्यतः। सन्नियम्येंद्रियग्रामं निर्घोषे निर्जने वने। कायमभ्यंतरं कृत्स्नमेकाग्रः परिचिंतयेत्। दंतांस्तालु च जिह्वां च गलं ग्रीवां तथैव च। हृदयं चिंतयेच्चापि तथा हृदयबंधनं। इत्युक्तः स तदा शिष्यो मेधावी मधुसूदन। पप्रच्छ पुनरेवेदं मोक्षधर्मं सुदुर्विदं। भुक्तं भुक्तं कथमिदमन्नं कोष्ठे विपच्यते। कथं रसं व्रजति शोणितं जायते कथं। कथं मांसं च मेदश्च स्नाय्वस्थीनि च पुष्यति। कथमेतानि सर्वाणि शरीराणि शरीरिणः। वर्द्धंते वर्द्धमानस्य वर्द्धते च कथं बलं। निरोजसां निर्गमनं मलानां च पृथक्पृथक्। कुतो वायं प्रश्वसिति उच्छ्वसत्यथवा पुनः। कं च देशमधिष्ठाय तिष्ठत्यात्मानमात्मनि। जीवः कायं वहति चेष्टमानः कलेवरं। किंवर्णं कीदृशं चैव निवेशयति वै पुनः। याथातथ्येन भगवन्वक्तुमर्हसि मेऽनघ। इति संपरिपृष्टोऽहं तेन विप्रेण माधव। प्रत्यब्रुवं महाबाहो यथाश्रुतमरिंदम। यथा स्वकोष्ठे निक्षिप्य भांडं कोष्ठसमं भवेत्। तथा स्वकाये निक्षिप्य मनो द्वारैरनिश्चलैः। आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत्। एवं सततमुद्युक्तः प्रीतात्मा न चिरादिव। आसादयति तद्ब्रह्म यद्दृष्ट्वा स्यात्प्रधानवित्। न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपींद्रियैः। मनसैव प्रदीपेन महानात्मा संदृश्यते। सर्वतः पाणिपादोऽयं सर्वतोक्षिशिरोमुखः। सर्वतः श्रुतिमाल्लोके सर्वमावृत्य तिष्ठति। जीवो निष्क्रांतमात्मानं शरीरात्संप्रपश्यति। स तमुत्सृज्य देहं स्वं धारयन्ब्रह्म केवलं। आत्मानमालोकयति मनसा प्रहसन्निव। इदं सर्वरहस्यं ते मयोक्तं द्विजसत्तम। आपृच्छे साधयिष्यामि गच्छ शिष्य यथासुखं। इत्युक्तः स तदा कृष्ण मया शिष्यो महा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
१५

तपाः। आगच्छतं यथाकामं ब्राह्मणश्छिन्नसंशयः॥ ॥ वासुदेव उ॥ ॥ इत्युक्त्वा स तदा वाक्यं मामं ब्राह्मणसत्तमः। मोक्षधर्माश्रितं सम्यक् कृतं तत्रैवांतरधीयत। कच्चिदेतत्
यापार्थ श्रुतमेकाग्रचेतसा। तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि। नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः। नरेणाकृतसंज्ञेन विशुद्धेनांतरात्मना। सुरहस्यमि
दं प्रोक्तं देवानां भरतर्षभ। कच्चिन्नैतच्छ्रुतं पार्थ मनुष्येणेह कर्हिचित्। न ह्येतच्छ्रोतुमर्होन्यो मनुष्यस्त्वदृतेऽनघ। नैतदद्य सुविज्ञेयं व्यामिश्रेणांतरात्मना। क्रियावद्भिर्हि
कौंतेय देवलोकः समावृतः। न चैतदिष्टं देवानां मर्त्यैरूपनिदर्शनं। परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनं। तत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी। इमं धर्मं समा
स्थाय येपि स्युः पापयोनयः। स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं। किंपुनर्ब्राह्मणाः पुण्याः क्षत्रिया वा बहुश्रुताः। स्वधर्मरताः पोनित्यं ब्रह्मलोकपरायणाः। हेतुमच्चैत
दुद्दिष्टमुपायश्चास्य साधने। सिद्धेः फलं च मोक्षं च दुःखस्यापि विनिर्णयः। नातः परं सुखं त्वन्यत्किंचित्स्याद्भरतर्षभ। बुद्धिमाञ्छ्रद्दधानश्च पराक्रांतश्च पांडव। यः परित्य
ज्यते मर्त्यलोकं तं तन्मसारवत्। एतैरुपायैः सक्षिप्रं परां गतिमवाप्नुयात्। एतावदेव वक्तव्यं नातो भूयोस्ति किंचन। षण्मासान्नित्ययुक्तस्य योगः पार्थ प्रवर्तते॥ ॥ ॥
इत्याश्वमेधिके अनुगीतासमाप्ता॥ ॥ १ ॥ वासुदेव उवाच॥ ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। दंपत्योः पार्थसंवादमभयं नाम नामतः। ब्राह्मणी ब्राह्मणं कंचि
ज्ज्ञीतं ज्ञानपारगं। दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत्। कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता। न्यस्तकर्माणमासीनं कीनाशमविचक्षणं। भार्याः पतिकृतान्
लोकान्याप्नुवंतीति नः श्रुतं। त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिं। एवमुक्तः स शांतात्मा तामुवाच हसन्निव। सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे। ग्राह्य
दृश्यं च सत्यं वा यदिदं कर्म विद्यते। एतदेव व्यवस्यंति कर्म कर्मेति कर्मिणः। मोहमेव नियच्छंति कर्मणा ज्ञानमोहिताः। नैष्कर्म्यं न च लोकेस्मिन्मुहूर्तमुपलभ्यते। कर्म
णा मनसा वाचा शुभं वा यदि वाशुभं। जन्मादिमूर्तिभेदानां कर्म भूतेषु वर्तते। रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु कर्मसु। आत्मस्थ आत्मना तेन दृष्टमायतनं मया। यत्र तद्ब्रह्म निर्द्वं

तु
स १
१५

मंतव्येराथबोद्धव्येसुभगेपश्यसर्वदा।८

र्ने

द्वं यत्र सोमः सहाग्निना। व्यवायं कुरुते नित्यं धीरो भूतानि धारयन्। यत्र ब्रह्मादयो युक्तास्तदक्षरमुपासते। विद्वांसः सुव्रता यत्र शांतात्मानो जितेंद्रियाः। घ्रा
णेन न तदाघ्रेयं न तदाद्यं च जिह्वया। स्पर्शनेन तदस्पृश्यं मनसा त्वेव गम्यते। चक्षुषामविषह्यं च यत्किंचिच्छ्रवणात्परं। अगंधमरसस्पर्शमरूपाशब्दमव्ययं।
यतः प्रवर्तते तंत्रं यत्र च प्रतितिष्ठति। प्राणोपानः समानश्च व्यानश्चोदान एव च। तत एव प्रवर्तंते तमेव प्रविशंति च। समानव्यानयोर्मध्ये प्राणापानौ विचेर
तुः। तस्मिन्सुप्ते प्रलीयेते समानो व्यान एव च। अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति। तस्माच्छयानं पुरुषं प्राणापानौ न मुंचतः। प्राणान्यीयते येन तमु
दानं प्रचक्षते। तस्मात्तपो व्यवस्यंति तद्भवं ब्रह्मवादिनः। तेषामन्योन्यभक्षाणां सर्वेषां देहचारिणां। अग्निर्वैश्वानरो मध्ये सप्तधा विहितोंतरा। घ्राणं जिह्वा च च
क्षुश्च त्वक् च श्रोत्रं च पंचमं। मनो बुद्धिश्च सप्तैते जिह्वा वैश्वानरार्चिषः। घ्रेयं पेयं च दृश्यं च स्पृश्यं श्रव्यं तथैव च। मंतव्यमथ बोद्धव्यं ताः सप्त समिधो मम। घ्राता
भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पंचमः। मंता बोद्धा च सप्तैते भवंति परमर्त्विजः। घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च। हवींष्यग्निषु होतारः सप्तधा सप्त सप्तसु।
सम्यक्प्रक्षिप्य विद्वांसो जनयंति स्वयोनिषु। पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं। मनो बुद्धिश्च सप्तैते योनिरित्येव शब्दिता। हविर्भूता गुणाः सर्वे प्रविशंत्य
ग्निजं मुखं। अंतर्वासमुषित्वा च जायंते स्वासु योनिषु। तत्रैव च निरुध्यंते प्रलये भूतभावने। ततः संजायते गंधस्ततः संजायते रसः। ततः संजायते रूपं ततः स्पर्शो
भिजायते। ततः संजायते शब्दः सप्तधा वै विदुः। अनेनैव प्रकारेण प्रगृहीतं पुरातनैः। पूर्णाहुतिभिरापूर्णास्तेपि पूर्यंति तैजसा॥ ॥ ब्रह्मगीतासु॥ ब्राह्मण उ॥
अत्राप्युदाहरंतीममितिहासं पुरातनं। निबोध दशहोतॄणां विधानमिह यादृशं। श्रोत्रं त्वक् चक्षुषी जिह्वा नासा वाक् च रणौ करौ। उपस्थः
पायुश्चैतानि होत्राणि दश राजन् मिनि। शब्दः स्पर्शो रसो रूपं गंधो वाक्यं क्रिया गतिः। रेतो मूत्रपुरीषा

स्व
प्रा
ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अग्नयो दशाग्नयमिति। दिशो विष्णुर्विश्वेदेवो विसर्गोऽग्निः शतक्रतुः। विष्णुः प्रजापतिर्मित्रश्चाग्नयो दशाग्नयमिति। इन्द्रियाण्येव होतॄणि हवींषि दशाग्नयमिति। विषयाः समिधो दीप्ता ये हूयन्ते दशाग्निषु।

अश्व
१६

णांत्यागोरसाहवींषि। दिशो वायुरविश्चन्द्रः पृथिव्यग्नी विष्णुरेव च। इन्द्रः प्रजापतिर्मित्रः। सर्वमेवात्र विज्ञेयं चित्तं ज्ञानमवेक्षते।
चेतः शरीरभृत्काये विज्ञाता तु शरीरभृत्। शरीरभृद्गार्हपत्यस्तस्मादन्यः प्रणीयते। ततश्चाहवनीयस्तु तस्मिन्संक्षिप्यते हविः। ततो वाचस्पतिर्जज्ञे समानं पर्यवेक्षते।
रूपं भवति वै तन्न मनस्तदनुवर्तते मनः॥ ब्राह्मण्युवाच॥ कस्माद्वागभवत्पूर्वं कस्मात्पश्चान्मनोऽभवत्। मनसा चिन्तितं वाक्यं यदा समभिपद्यते। केन विज्ञा-
नयोगेन मतिश्चित्तं समास्थिता। समुन्नीता नाध्यगच्छत्को वैनां प्रतिषेधते॥ ब्राह्मण उवाच॥ तामपानः पतिर्भूत्वा तस्मात्प्रेष्यत्यपानताम्। तां गतिं मनसः
प्राहुर्मनस्तस्मादपेक्षते। प्रश्नं तु वाङ्मनसोर्मां यस्मात्त्वमनुपृच्छसि। तस्मात्ते वर्तयिष्यामि तयोरेव समाह्वयम्। उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम्। आवयोः
श्रेष्ठमाचक्ष्व छिन्धि नौ संशयं विभो। मन इत्येव भगवांस्तदा प्राह सरस्वतीम्। अहं वै कामधुक्तुभ्यमिति तं प्राह वागथ। स्थावरं जङ्गमं चैव विद्ध्युभे मनसी मम। स्था-
वरं मत्सकाशे वै जङ्गमं विषये तव। यस्तु ते विषयं गच्छेन्मन्त्रो वर्णः स्वरोऽपि वा। तन्मनो जङ्गमं नाम तस्मादसि गरीयसी। तस्मादपि समाधत्स्व स्वयमभ्येह शोभने।
...धातहस्मासि सरस्वति। प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति। प्रेर्यमाणा महाभागे विना प्राणमपानती। प्रजापतिमुपाधावत्प्रसीद भगवन्निति।
ततः प्राणः प्रादुरभूद्वाचमाप्याययन्पुनः। तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित्। घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते। तयोरपि हि घोषिण्या निर्घोषैव गरीयसी।
गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी। सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी। दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते। एतयोरन्तरं पश्य सूक्ष्मयोः स्यन्दमान-
योः॥ ब्राह्मण्युवाच॥ अनुत्पन्नेषु वाक्येषु चोद्यमाना सिसृक्षया। किं नु पूर्वं तदा देवी व्याजहार सरस्वती॥ ब्राह्मण उवाच॥ प्राणेन या संभवते शरीरे
प्राणादपानं प्रतिपद्यते च। उदानभूता च विसृज्य देहं व्यानेन सर्वं दिवमावृणोति। ततः समाने प्रतितिष्ठतीह इत्येव पूर्वं प्रजजल्प चापि। तस्मान्मनः स्थावरत्वा-

ब्राह्मण
२ग
१६

शा

त्या

द्विशिष्टं तथा देवी जङ्गमं हि विशिष्यते॥ ब्राह्मणगीतासु २१ ब्राह्मण उवाच॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम्। सुभगे सप्तहोतॄणां विधानमिह यादृशम्। घ्राणं
चक्षुश्च जिह्वा च त्वक्श्रोत्रं चैव पञ्चमम्। मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रयाः। सूक्ष्मेऽवकाशे सन्तस्ते न पश्यन्तीतरेतरम्। एतान्वै सप्त होतॄंस्त्वं स्वभावाद्विद्धि शोभने।
ब्राह्मण्युवाच॥ सूक्ष्मेऽवकाशे सन्तस्ते कथं नान्योन्यदर्शिनः। कथं स्वभावा भगवन्नेतदाचक्ष्व मे विभो॥ ब्राह्मण उवाच॥ गुणाज्ञानमविज्ञानं गुणिज्ञानमभिज्ञता।
परस्परं गुणानेते न विजानन्ति कर्हिचित्। जिह्वा चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च। न गन्धानधिगच्छन्ति घ्राणं तानधिगच्छति। घ्राणं श्रोत्रं तथा चक्षुस्त्वङ्मनो
बुद्धिरेव च। रसांस्त्वेवा न विजानन्ति जिह्वा तानधिगच्छति। नासा जिह्वा तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च। न रूपाण्यधिगच्छन्ति चक्षुस्तान्यधिगच्छति। नासा जिह्वा च
था श्रोत्रं त्वङ्मनो बुद्धिरेव च। न स्पर्शानधिगच्छन्ति त्वक्च तानधिगच्छति। घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च। न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति। घ्रा-
णं जिह्वा च चक्षुश्च श्रोत्रं त्वग्बुद्धिरेव च। संकल्पं नाधिगच्छन्ति मनस्तानधिगच्छति। घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं चापि पञ्चमम्। संशयान्नाधिगच्छन्ति बुद्धिस्तानधिग-
च्छति। घ्राणं जिह्वा च चक्षुश्च त्वक्श्रोत्रं मन एव च। न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति। अत्राप्युदाहरन्तीममितिहासं पुरातनम्। इन्द्रियाणां च संवादं मनसश्चै-
व भाविनि॥ मन उवाच॥ न घ्राति मामृते घ्राणं रसं जिह्वा न बुध्यते। रूपं चक्षुर्न गृह्णाति त्वक्स्पर्शं न बुध्यते। न श्रोत्रं बुध्यते शब्दं मया हीनं कथंचन। प्रवरं सर्वभूता-
नामहमेकं सनातनम्। अगाराणीव शून्यानि शान्तार्चिष इवाग्नयः। इन्द्रियाणि न भासन्ते मया हीनानि सर्वशः। काष्ठानीवार्द्रशुष्काणि यतमानैरपीन्द्रियैः। गुणार्थान्ना-
धिगच्छन्ति मामृते सर्वजन्तवः॥ इन्द्रियाण्यूचुः॥ एवमेतद्भवेत्सत्यं यथैतन्मन्यते भवान्। ऋते त्वस्मानस्मदर्थान्भोगान्भुङ्क्ते भवान्यदि। यद्यस्मासु प्रलीनेषु तर्प-
णं प्राणधारणम्। भोगान्भुङ्क्ते रसान्भुङ्क्ते यथैतन्मन्यते तथा। अथवास्मासु लीनेषु तिष्ठत्सु विषयेषु च। यदि संकल्पमात्रेण भुङ्क्ते भोगान्यथार्थवित्। अथ चेन्मन्यसे

स्पर्शानि

ब्राह्मण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व

१७

सिद्धिमस्मर्दर्थे च नित्यदा। घ्राणेन रूपमादत्स्व रसमादत्स्व च क्षुषा। श्रोत्रेणा गंधमादत्स्व स्पर्शमादत्स्व जिह्वया। त्वचा थ शब्दमादत्स्व नो छि ष्वं भोक्तुमर्हसि। य
थाहि शिष्यः शास्तारं श्रुत्यर्थमभिधावति। ततः श्रुतिमुपादाय श्रुतार्थमुपतिष्ठति। विषयानेवमस्माभिर्दर्शितानभिमन्यसे। अनागतानतीतांश्च स्वप्ने जागरणे
तथा। वैमनस्यगतानां च जंतूनामल्पचेतसां। तस्मादर्थे कृते कार्यं दृश्यते प्राणधारणं। बहूनपि हि संकल्पान्मत्वा स्वप्नानुपास्य च। बुभुक्षयापीड्यमानो विषयाने
व धावति। अगारमद्वारमिव प्रविश्य संकल्पभोगान्विषयेनिबद्धान्। प्राणक्षये शांतिमुपैति नित्यं दारुक्षयेऽग्निर्ज्वलितो यथैव। कामं तु नः स्वेषु गुणेषु संगः कामं न
चान्योन्यमिवोपलब्धिः। अस्मान्विना नास्ति तवोपलब्धिस्त्वामप्यृते ऽस्मान्न भजेत हर्षः॥ ब्राह्मणगीतासु॥ श्री॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। सु
भगे पंचहोतृणां विधानमिह यादृशं। प्राणापानावुदानश्च समानो व्यान एव च। पंचहोतॄंस्तथैतान्वै परं भावं विदुर्बुधाः॥ ब्राह्मण्युवाच॥ स्वभावात्सप्तहोतार इ
ति ते पूर्विका मतिः। यथा वै पंचहोतारः परोभावस्तदुच्यतां॥ ब्राह्मण उ॥ प्राणेन संभृतो वायुरपानो जायते पुनः। अपाने संभृतो वायुस्ततो व्यानः प्रजायते। ते
पृष्टवंतः पुरा गत्वा पूर्वजातं प्रजापतिं। यो नो ज्येष्ठस्तमाचक्ष्व स नः श्रेष्ठो भविष्यति॥ ब्रह्मोवाच॥ यस्मिन्प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। यस्मि
न्प्रचीर्णे च पुनश्चरंति स वै श्रेष्ठो गच्छत यत्र कामः॥ प्राण उ॥ मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यहं प
श्यत मां प्रलीनं॥ ब्राह्मण उ॥ प्राणः प्रलीयत ततः पुनश्च प्रचचार ह। समानश्चाप्युदानश्च वचो ब्रूतां ततः शुभे। न त्वं सर्वमिदं व्याप्य तिष्ठसीह यथा वयं।
न त्वं श्रेष्ठोसि नौ प्राण अपानो हि वशे तव। प्रचचार पुनः प्राणस्तमपानोभ्यभाषत। मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। मयि प्रचीर्णे १७
च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं॥ ब्राह्मण उ॥ व्यानश्च तमुदानश्च भाषमाणमथोचतुः। अपान न त्वं श्रेष्ठोसि प्राणो हि वशगस्तव। अपानः प्रचचार

न

ह व्यानस्तं पुनरब्रवीत्। श्रेष्ठोहमस्मि सर्वेषां श्रूयतां येन हेतुना। मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। मयी प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्य
हं पश्यत मां प्रलीनं॥ ब्राह्मण उ॥ प्रालीयत ततो व्यानः पुनश्च प्रचचार ह। प्राणापानावुदानश्च समानश्च तमब्रुवन्। न त्वं श्रेष्ठोसि नो व्यान समानो हि वशे तव।
प्रचचार पुनर्व्यानः समानः पुनरब्रवीत्। श्रेष्ठोहमस्मि सर्वेषां श्रूयतां येन हेतुना। मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। मयी प्रची
र्णे च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं। समानः प्रचचाराथ उदानस्तमुवाच ह। श्रेष्ठोहमस्मि सर्वेषां श्रूयतां येन हेतुना। मयि प्रलीने प्रलयं व्रजंति स
र्वे प्राणाः प्राणभृतां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं। ततः प्रालीयतोदानः पुनश्च प्रचचार ह। प्राणोपानः समानश्च व्यानश्चैव तत
मब्रुवन्। उदान न त्वं श्रेष्ठोसि व्यान एव वशे तव॥ ब्राह्मण उ॥ इति तानब्रवीत्सर्वान्समवेतान्प्रजापतिः। सर्वे श्रेष्ठा न वा श्रेष्ठाः सर्वे चान्योन्यधर्मिणः। सर्वे स्वि
विषये श्रेष्ठास्ते सर्वे चान्योन्यधर्मिणः। सर्वे स्वविषये श्रेष्ठाः सर्वे चान्योन्यरक्षिणः। एकः स्थिरश्चास्थिरश्च विशेषात्पंच वायवः। एक एव ममैवात्मा बहुधाप्युपची
यते। परस्परस्य सुहृदो भावयंतः परस्परं। स्वस्ति व्रजत भद्रं वो धारयध्वं परस्परं॥ ब्राह्मणगीतासु॥ ब्राह्मण उ॥ अत्राप्युदाहरंतीममितिहासं पुरात
नं। नारदस्य च संवादमृषेर्देवमतस्य च॥ देवमत उ॥ जंतोः संजायमानस्य किं नु पूर्वं प्रवर्तते। प्राणोपानः समानो वा व्यानो वोदान एव च। येनायं सृज्यते जं ॥ नारद उ॥
तुस्ततोन्यः पूर्वमेति तं। प्राणद्वंद्वेन च ममिज्ञेयं तिर्यगूर्ध्वमधश्च यत्॥ देवमत उ॥ केनायं सृज्यते जंतुः कश्चान्यः पूर्वमेति तं। प्राणद्वंद्वं च मे ब्रूहि तिर्यगूर्ध्वमधश्च यत्॥ नारद उ॥
संकल्पाज्जायते हर्षः शब्दादपि च जायते। रसात्संजायते चापि रूपादपि च जायते। स्पर्शात्संजायते चापि गंधादपि च जायते। शुक्राच्छोणितसंसृष्टात्पूर्वं प्राणः प्रवर्त
ते। प्राणेन विकृते शुक्रे ततोपानः प्रवर्तते। शुक्रात्संजायते चापि रसादपि च जायते। एतद्रूपमुदानस्य हर्षो मिथुनसंभवः। कामात्संजायते शुक्रं शुक्रात्संजायते रसः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व·
१८

सर्वसंजायते तस्थ्यत्र प्रक्रिथ्य तेह विः अवरौ समानो व्यानश्च रनियत्तविदो विदुः। प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः। एतद्रूपमुदानस्य प

रमं ब्राह्मणा विदुः। उभौ वैवापरे द्वंद्वं तयोर्मध्ये हुताशनः। एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः॥ सन्वा सत्वैव तद्वंद्वं तयोर्मध्ये हुताशनः। एतद्रूपमुदान

स्य परमं ब्राह्मणा विदुः। सर्वं समानो व्यानश्च व्यस्यते कर्म तेन ३ तत्। तृतीयं तु समानेन पुनरेव व्यच्छति। शांत्यर्थं वामदेवे च शांतिर्ब्रह्म सनातनं। एत

द्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ ब्राह्मणगीतासु ॥ ब्राह्मणउ· ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। चातुर्होत्रविधानस्य विधानमिह यादृ

शं। तस्य धर्मस्य विधिवत् विधानमुपदिश्यते। शृणु मे वदतो भद्रे विधानमिदमुत्तमं। करणं कर्म कर्ता च मोक्ष इत्येव भाविनि। चत्वार एते होतारो यैरिदं ज

गदावृतं। होतृणां साधनं चैव शृणु सर्वमशेषतः। घ्राणं जिह्वा च चक्षुश्च त्वक् च श्रोत्रं च पंचमं। मनो बुद्धिश्च सप्तैते विज्ञेया गुणहेतवः। गंधो रसश्च रूपं च

शब्दः स्पर्शश्च पंचमः। मंतव्यमथ बोद्धव्यं सप्तैते कर्महेतवः। घ्राता भक्षयिता द्रष्टा वक्ता श्रोता च पंचमः। मंता बोद्धा च सप्तैते विज्ञेया कर्तृहेतवः। स्वगुणं

भक्षयंत्येते गुणवंतः शुभाशुभं। अहं च निर्गुणोऽत्रेति सप्तैते मोक्षहेतवः। विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि। गुणास्ते देवताः भूताः सततं भुं दु

जते हविः। अदंत विद्वन्नन्नानि ममत्वेनोपपद्यते। आत्मार्थं पाचयन्नन्नं ममत्वेनोपहन्यते। अभक्ष्यभक्षणं चैव मद्यपानं च हंति तं। स चान्नं हंति तच्चान्नं

स हत्वा हन्यते पुनः। हंता ह्यन्नमिदं विद्वान् पुनर्जनयतीश्वरः। स चान्नाज्जायते तस्मिन् न त्तनयनं। सूक्ष्मः। सूक्ष्मो नाम व्यतिक्रमः। मनसा गम्यते यच्च

यच्च वाचा निगद्यते। श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते। स्पर्शेन स्पृश्यते यच्च घ्राणेन घ्रायते च यत्। मनः षष्ठानि संयम्य हवींष्येतानि सर्वशः। १८

गुणवत्पावको मह्यं दीप्यते तंत शरीरगः। योगयज्ञः प्रवृत्तो मे ज्ञानब्रह्ममनोद्भवः। प्राणस्तोत्रोऽपानशस्त्रः सर्वत्यागसुदक्षिणः। कर्तानुमंता ब्रह्मा मे

होताध्वर्युः कृतस्तुतिः। ऋतं प्रशास्ता तच्छास्त्रमपवर्गोऽस्य दक्षिणा। ऋचश्चाप्यत्र शंसंति नारायणविदो जनाः। नारायणाय देवाय यदविंदन् पशून्पुरा। तत्र सामा

नि गायंति तानि चाहुर्निदर्शनं। देवं नारायणं भीरु सर्वात्मानं निबोध मे ॥ ब्राह्मणगीतासु ॥ ब्राह्मणउ ॥ एकः शास्ता न द्वितीयोऽस्ति शास्ता यो हृच्छयस्त

महमनुब्रवीमि। इत्येष तिष्ठन् पुरुषः शास्त्रि शास्ता तेनैव युक्तः प्रवणादिवोदकं। एको गुरुर्नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनुब्रवीमि। तेनानुशिष्टा गु

रवः सदैव पराभूता दानवाः सर्व एव। एको बंधुर्नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनुब्रवीमि। तेनानुशिष्टा बांधवा बंधुमंतः सप्तर्षयः पार्थ दिवि प्रभां

ति। एकः श्रोता नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनुब्रवीमि। तस्मिन् गुरौ गुरुवासं निरुष्य शक्रो गतः सर्वलोकामरत्वं। एको द्वेष्टा नास्ति ततो द्विती

यो यो हृच्छयस्तमहमनुब्रवीमि। तेनानुशिष्टा गुरुणा सदैव लोकद्विष्टाः पन्नगाः सर्व एव। अत्राप्युदाहरंतीममितिहासं पुरातनं। प्रजापतौ पन्नगानां

देवर्षीणां च संविदं। देवर्षयश्च नागाश्च असुराश्च प्रजापतिं। पर्यपृच्छन्नुपासीनं श्रेयो नः प्रोच्यतामिति। तेषां प्रोवाच भगवान् श्रेयः समनुपृच्छतां। ओमि

त्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन् दिशः। तेषां प्रद्रवमाणानामुपदेशार्थमात्मनः। सर्पाणां दशने भावः प्रवृत्तः पूर्वमेव हि। असुराणां प्रवृत्तस्तु दंभभा

वः स्वभावजः। दानं देवा व्यवसिता दममेव महर्षयः। एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः। तस्य चानुमते कर्म ततः पश्चात्प्रवर्तते। गुरोर्बोद्धा च

शत्रुश्च द्वेष्टा च हृदि निःसृतः। पापेन विचरंल्लोके पापचारी भवत्ययं। शुभेन विचरंल्लोके शुभचारी भवत्ययं। कामचारी तु कामेन य इंद्रियसुखे रतः।

ब्रह्मचारी सदैवैष य इंद्रियजये रतः। अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः। ब्रह्मभूतश्चरंल्लोके शुभचारी भवत्ययं। कामचारी तु कामेन य इंद्रियसु

नाना व्यवसिताः सर्वे सर्पदेवर्षिदानवाः। शृणोत्ययं प्रोच्यमानं गृह्णाति च यथातथं। पृच्छतस्तावतो भूयो गुरुरन्योन विद्यते। २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न तत्र विश्य शोचंति न प्रहृष्यंति च द्विजाः १५

ब्रह्म

अश्व
१९

ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्म संस्तवः॥ आपो गुरुर्ब्रह्म स ब्रह्माणि समाहितः॥ एतदेतादृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः॥ विदित्वा चान्वपद्यंत क्षेत्रज्ञेनानुदर्शिनः
॥ ब्रह्मगीतासु ॥ ब्राह्मण उ० ॥ संकल्पदंशमशकं शोकहर्षहिमातपं। मोहांधकारतिमिरं लोभव्यालसरीसृपं॥ विषयैकात्ययाध्वानं कामक्रोधविरोधकं। तद
तीत्य महादुःखं प्रविष्टोस्मि महद्वनं॥ ब्राह्मण्युवाच॥ [illegible] क्व तद्वनं महाप्राज्ञ
के वृक्षाः सरितश्च काः॥ गिरयः पर्वताश्चैव कियत्यध्वनि तद्वनं॥ ब्राह्मण उ० ॥ न तदस्ति पृथग्भावे किंचिद्दुःखतरं ततः। तस्माद्ध्रस्वतरं नास्ति नास्ति तस्मान्महत्
तरं। नास्ति तस्माद्दुःखतरं नास्त्यन्यत्तत्समं सुखं॥ [illegible] ॥ न तत्केनेव तुष्यंति न च विभ्यति केवन॥ अस्मिन्वने सप्त महाद्रुमाश्च फ
लानि सप्तातिथयश्च सप्त। सप्ताश्रमाः सप्त समाधयश्च सप्तैतदेवं तु वनस्य रूपं। पंचवर्णानि दिव्यानि पुष्पाणि च फलानि च। सृजंतः पादपास्तत्र व्याप्य तिष्ठंति तद्वनं।
सुवर्णानि द्विवर्णानि पुष्पाणि च फलानि च। सृजंतः पादपास्तत्र व्याप्य तिष्ठंति तद्वनं। सुरभीण्येकवर्णानि पुष्पाणि च फलानि च। सृजंतः पादपास्तत्र व्याप्य
तिष्ठंति तद्वनं। बहून्यव्यक्तरूपाणि पुष्पाणि च फलानि च। विसृजंतौ महावृक्षौ तद्वनं व्याप्य तिष्ठतः। एको ह्यग्निः सुमहान्ब्राह्मणो त्र पंचेंद्रियाणि समिध
श्चात्र संति। तेभ्यो मोक्षाः सप्त फलं वंति दीक्षा गुणाः फलान्यतिथयः फलाशाः। आतिथ्यं प्रतिगृह्णंति तत्र तत्र महर्षयः। आर्चितेषु प्रलीनेषु तेष्वन्यद्रोचते व
नं। प्रज्ञावृक्षं मोक्षफलं शांतिच्छायासमन्वितं। ज्ञानाश्रयं तृप्तितोयमंतः क्षेत्रज्ञभास्करं। येधिगच्छंति तं संतस्तेषां नास्ति भयं पुनः। ऊर्ध्वं चावाक् च तिर्यक् च तस्य
स्यांतो नाप्यते। सप्त स्त्रियस्तत्र वसंति सद्यस्त्ववाङ्मुखा भानुमत्यो जनित्र्यः। ऊर्ध्वं रसानां ददते प्रजाभ्यः सर्वान्यथा सत्यमनित्यतां च। तत्रैव प्रतितिष्ठंति पुन

ते

ऽस्य

ना

१९

श्व

कु

विद्यारण्यविदो जनाः। तदरण्यमभिप्रेत्य यथाधीरमजायत। एतदेतादृशं दिव्यमरण्यं ब्राह्मणा विदुः। विदित्वा चान्वतिष्ठंति १

हेत्यादिसुक्षितः॥ कातपशास्तातद्वासुमपवर्गोथ दक्षिणा॥ ज्ञानव्याप्यत्र शंसंति नारायण[illegible] विदो जनाः॥ नारायणाय देवाय यदविंदन्पशून्पुरा। तत्र साम्ना
विगायंति तानि वाऽज्ञानिदर्शनं। देवं नारायणं भीरु सर्वात्मानं निबोध मे॥ ब्राह्मणगीतासु॥ ब्राह्मण उ०॥ एकः शास्ता न द्वितीयोस्ति शास्ता यो हृच्छयस्तमहम
नुब्रवीमि। तेनैव युक्तः प्रवणादिवोदकं यथा नियुक्तोस्मि तथा वहामि॥ [illegible] सप्तैवोदयंति च। सप्त सप्तर्षयः सिद्धा वसिष्ठप्रमुखास्सदा। यशो वर्चो भगश्चैव वि
जयः सिद्धतेजसी। एवमेवाष्टमं नित्यं सप्त ज्योतींषि भास्करे। गिरयः पर्वताश्चैव संति तत्र समासतः॥ नद्यश्च सरितो वारि वहंत्यो ब्रह्मसंभवाः। नदीनां संगमस्तत्र वैता
नेसमुपह्वरे। आत्मतृप्ताः पतो यांति साक्षाद्देवपितामहाः। कृशाशाः सुव्रताशाश्च तपसा दग्धकिल्बिषाः। आत्मन्यात्मानमावेश्य ब्रह्माणं समुपासते। विरसत्यस्त्र
संशांतिं क्षेत्रज्ञेनात्मदर्शिनः॥ ब्राह्मणगीतासु॥ ब्राह्मण उ०॥ गंधान्न जिघ्रामि रसान्न वेद्मि रूपं न पश्यामि न च स्पृशामि। न चापि शब्दान्विविधाञ्शृणोमि न चापि सं
कल्पमुपैति किंचित्॥ अर्थानिष्टान्कामयते स्वभावः सर्वान्द्वेष्यान्प्रद्विषते स्वभावः। कामद्वेषावुद्भवतः स्वभावात्प्राणापानौ जंतुदेहान्निवेश्य। तेभ्यश्चान्यांस्तेषु
नित्यं स्वभावाः भूतात्मानं लक्षयेरञ्शरीरे। तस्मिंस्तिष्ठन्नास्मि शक्यः कथंचित्कामक्रोधाभ्यां जरया मृत्युना च॥ अकामयानस्य च सर्वकामानविद्विषाणस्य च सर्वदो
षान्। न मे स्वभावेषु भवंति लेपास्तोयस्य बिंदोरिव पुष्करेषु॥ नित्यस्य चैवास्य भवंति नित्या निरीक्षमाणस्य बहून्स्वभावान्। न सज्जते कर्मसु भोगजालं दिवीव सू
र्यस्य मयूखजालं॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। अध्वर्युयतिसंवादं तन्निबोध यशस्विनि॥ प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाब्रवीत्। यतिरध्वर्यु
मासीनं हिंसेयमिति कुत्सयन्॥ तमध्वर्युः प्रत्युवाच नायं छागो विनश्यति। श्रेयसा योक्ष्यते जंतुर्यदि श्रुतिरियं यथा॥ यो ह्यस्य पार्थिवो भागः पृथिवीं स गमिष्य
ति। यदस्य वारिजं किंचिदपस्तत्संप्रपत्स्यते। सूर्यं चक्षुर्दिशः श्रोत्रं प्राणोस्य दिवमेव च। आगमे वर्तमानस्य न च दोषोस्ति कश्चन॥ यतिरु०॥ प्राणैर्वियोगे छागस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
२०
२

यदिश्रेयः प्रपश्यसि। ब्राह्मणार्थे वर्त्तितव्यं ते भवतः किं प्रयोजनं। यत्र वा मन्यतां माता पिता भ्राता सखापि वा। मंत्रतश्चैव मुन्नीयं परमं तत्र संशयः। य एव
मनुमन्येरंस्तान्नवा त्रष्टुमर्हति। तेषामनुमतं हृत्वा शक्या कर्तुं विचारणा। प्राणा अप्यस्य छागस्य प्रापिता स्ते स्वयोनिषु। शरीरं केवलं छिद्रं निश्चेष्ट
मिति मे मतिः। इंधनस्य तु तुल्येन शरीरे [illegible] प्रापिता स्ते स्वयोनिषु। शरीरं केवलं छिद्रं निश्चेष्टमिति मे मतिः। इंधनस्य
तुल्येन शरीरेण विचेतसा। हिंसा निर्वेष्टुकामानामिंधनं पशुसंज्ञितं। अहिंसा सर्वधर्माणामिति वृद्धानुशासनं। यदहिंसं भवेत्कर्म किं कार्यमि
ति विद्महे। अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परं। शक्यं बहुविधं वक्तुं भवतः कार्यदूषणं। अहिंसा सर्वभूतानां नित्यमस्मासु रोचते। प्रत्यक्षतः
साधयामो न परोक्षमुपास्महे॥ अध्वर्युरु॥ भूमेर्गंधगुणान्भुंक्षे पिबस्यापोमयान्रसान्। ज्योतिषां पश्यसे रूपं स्पृशस्यनिलजान्गुणान्। शृणो
ष्याकाशजं शब्दं मनसा मन्यसे मतिं। सर्वाण्येतानि भूतानि प्राणा इति च मन्यसे। प्राणादाने च नित्योसि हिंसायां वर्त्तसे द्विज। नास्ति चेष्टा विना
हिंसां किं वा त्वं मन्यसे द्विज॥ यतिरु॥ अक्षरं च क्षरं चैव द्वैधीभावोयमात्मनः। अक्षरं तत्र सद्भावः स्वभावः क्षर उच्यते। प्राणो जिह्वा मनः सत्वं स्वभा
वो रजसा सह। भावैरेतैर्विमुक्तस्य निर्द्वंद्वस्य निराशिषः। समस्य सर्वभूतेषु निर्ममस्य जितात्मनः। समंतात्परिमुक्तस्य न भयं विद्यते क्वचित्॥ अध्वर्यु
रु॥ सद्भिरेव सदा वासः कार्यो मतिमतां वर। भवतो हि मतं श्रुत्वा प्रतिभाति मतिर्मम। भगवन्भगवद्बुद्ध्या प्रतिबुद्धो ब्रवीम्यहं। मतं मंतुः क्रतुं कर्तुं ना
पराधोस्ति मे द्विज॥ ब्राह्मण उवाच॥ उपपत्त्या यतिस्तूष्णीं वर्तमानस्ततः परं। अध्वर्युरपि निर्मोहः प्रचचार महामखे। एवमेतादृशं मोक्षं सुसूक्ष्मं ब्राह्म २०
णा विदुः। विदित्वा चानुतिष्ठंति क्षेत्रज्ञेनानुदर्शिना॥ ब्राह्मण उ॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। कार्त्तवीर्यस्य संवादं समुद्रस्य च भाविनि।

कार्त्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्। येन सागरपर्यंता धनुषा निर्जिता मही। स कदाचित्समुद्रांते विचरन्बलदर्पितः। अवाकिरच्छरशतैः समुद्रमि
ति नः श्रुतं। तं समुद्रो नमस्कृत्य कृतांजलिरुवाच ह। मा मुंच वीर नाराचान्ब्रूहि किं करवाणि ते। मदाश्रयाणि भूतानि त्वद्विसृष्टैर्महेषुभिः। वध्यंते राजशा
र्दूल तेभ्यो देह्यभयं विभो॥ अर्जुन उ॥ मत्समो यदि संग्रामे शरासनधरः क्वचित्। विद्यते तं ममाचक्ष्व यः समेतं महामृधे॥ समुद्र उ॥ महर्षिर्जमदग्नि
स्ते यदि राजन्परिश्रुतः। तस्य पुत्रस्तवातिथ्यं यथावत्कर्त्तुमर्हति। स राजा प्रययौ तत्र वेगेन महता हतः। स तमाश्रममागम्य राममेवान्वपद्यत। स रामप्र
तिकूलानि चकार सह बंधुभिः। आयासं जनयामास रामस्य च महात्मनः। ततस्तेजः प्रजज्वाल रामस्यामिततेजसः। प्रदहद्रिपुसैन्यानि तदा कमललोच
ने। ततः परशुमादाय स तं बाहुसहस्रिणं। चिच्छेद सहसा रामो बहुशाखमिव द्रुमं। तं हतं पतितं दृष्ट्वा समेताः सर्वबांधवाः। असीनादाय शक्तींश्च भार्गवं
पर्यधावंस्तदा। रामोपि धनुरादाय रथमारुह्य सत्वरः। विसृजन्शरवर्षाणि व्यधमत्पार्थिवं बलं। ततस्तु क्षत्रियाः केचिज्जमदग्न्यभयार्दिताः। विविशुर्गिरि
दुर्गाणि मृगाः सिंहार्दिता इव। तेषां स्वविषयं कर्म तद्भयान्नानुतिष्ठतां। प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात्। त एते द्रविडाभीराः पुंड्राश्च शबरैः स
ह। वृषलत्वं परिगता व्युत्थानात्क्षत्रधर्मतः। ततस्तु हतवीरासु क्षत्रियासु पुनः पुनः। द्विजैरुत्पादितं क्षत्रं जामदग्न्यो न्यकृंतत। एकविंशतिमेधांते रा
मं वागशरीरिणी। दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता। राम राम निवर्त्तस्व कं गुणं तात पश्यसि। क्षत्रबंधूनिमान्प्राणैर्विप्रयोज्य पुनः पुनः। तथैव
तं महात्मानमृचीकप्रमुखास्तदा। पितामहा महाभाग निवर्त्तस्वेत्यथाब्रुवन्। पितुर्वधममृष्यंस्तु रामः प्रोवाच तानृषीन्। नार्हंतीह भवंतो मां निवारयितुं कु(मि)
ता॥ पितर ऊचुः॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। श्रुत्वा च तत्तथा कार्यं भवता द्विजसत्तम। अलर्को नाम राजर्षिरभवत्सुमहायशाः॥ धर्मज्ञः स
नार्हसे क्षत्रवंधून्त्वं निहंतुं जयतांवर। न हि युक्तास्त्वया हंतुं ब्राह्मणेन सता नृपाः। आश्वमेधिके २१ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रष्ट
२१

त्पसंधश्चमहात्मासुमहातपाः॥ससागरांतांधनुषाविनिर्जितमहीमिमां। कृत्वासुदुष्करंकर्ममनःसूक्ष्मेसमादधे। स्थितस्याथद्रुमस्लेयतस्यचिंतावलंवहा। उत्तस्थसुमहद्राजन्संमूक्ष्मंप्रतिमहामते॥ अलर्कउ०। मनसोमेबलेजातंमनोजित्वाध्रुवोजयः। अन्यत्रबाणानस्यामिशत्रुभिःपरिवारितः॥ यदिदंचापलान्मूर्त्तिःसर्वमेतद्विकीर्षितं। मनःप्रतिसुतीक्ष्णाग्रानहंमोक्ष्यामिसायकान्॥ मनउ०। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि। तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत्। अलर्कउ० आघ्रायविविधान्गंधांस्तानेवप्रतिगृह्यति। तस्माद्घ्राणंप्रतिशरान्प्रतिमोक्ष्यामिसायकान्॥ घ्राणउ०। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि। ततःश्रुत्वासविचिंत्याथतदावचनमब्रवीत्॥ अलर्कउ०। इदंस्वादूनसान्भुक्त्वातानेवप्रतिगृह्यति। तस्मात्जिह्वांप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान्॥ जिह्वोवाच। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि। तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत्॥ अलर्कउ०॥ स्पृष्ट्वात्वविविधान्स्पर्शांस्तानेवप्रतिगृह्यति। तस्मात्त्वचंपाटयिष्येविविधैःकंकपत्रिभिः॥ त्वगुवाच। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि। तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत्॥ अलर्कउवाच। श्रुत्वावैविविधाञ्शब्दांस्तानेवप्रतिगृह्यति। तस्माच्छ्रोत्रंप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान्॥ श्रोत्रउ०॥ नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यसि। तच्छ्रुत्वासविचिंत्याथ

२१

ततोवचनमब्रवीत्॥ अलर्कउ०॥ दृष्ट्वारूपाणिबहुशःतान्येवप्रतिगृह्यति। तस्माच्चक्षुरहंनिष्यामिनिशितैःसायकैर्दृढं॥ चक्षुरु०। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिभित्त्वमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयैस्त्वंमांसूदयिष्यति। तच्छ्रुत्वासविचिंत्याथततोवचनमब्रवीत्॥ अलर्कउ०। इयंनिष्ठांबहुविधांप्रज्ञयाव्यवस्यति। तस्माद्बुद्धिंप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान्॥ बुद्धिरु०। नेमेबाणाःस्परिष्यंतिमामलर्ककथंचन। तवैवमर्मभेत्स्यंतिततोहास्यसिजीवितं॥ ब्राह्मणउ०॥ ततोलर्कस्तत्रपिवोरमाशक्यायाथसुदुष्करं। नाध्यगच्छत्परंशक्त्याबाणानेतेषुसंमुखः। समाहितचित्तःसततोविंतयतप्रभुः॥ सविचिंत्यपरंकालमलर्कोराजसत्तमं। नाध्यगच्छत्परंश्रेयोयोगान्मतिमतांवरः। सएकाग्रंमनःकृत्वानिश्चलोयोगमास्थितः। इंद्रियाणिजघ्नानाथबाणेनैकेनवीर्यवान्। योगमात्मानमाविश्यसंसिद्धिंपरमांगतः। विस्मितश्चापिराजर्षिरिमांगाथांजगादह। अहोकष्टंयदस्माभिःपूर्वराज्यमनुष्ठितं। भोगतृष्णासमायुक्तैःपूर्वंराज्यमुपासितं। इतिपश्चान्मयाज्ञातंयोगान्नास्तिपरंसुखं। एवंत्वमपिजानीहिरामामाक्षत्रियान्जहि। तपोघोरमुपातिष्ठततःश्रेयोभिपत्स्यसे। इत्युक्तःसतदाघोरंजामदग्न्यस्तपोमहत्। आस्थितःसमहाभागोययौसिद्धिंचदुर्गमां॥ ब्राह्मणगीता१७॥ ब्राह्मणउ०। त्रयोवैरिपवोलोकेनवधागुणतःस्मृताः॥ प्रहर्षःप्रीतिरानंदःत्रयस्तेसात्विकागुणाः। शोकःक्रोधोभिसंरंभोराजसास्तेगुणाःस्मृताः॥ स्वप्नस्तंद्रीचमोहश्चत्रयस्तामसागुणाः॥ एतान्निकृत्यधृतिमान्बाणसंघैरतंद्रितः। जेतुंपरानुत्सहतेप्रशांतात्माजितेंद्रियः। अत्रगाथाःकीर्त्तयंतिपुराकल्पविदोजनाः॥ अंबरीषेणयागीताराज्ञाराज्यंप्रशासता। समुदीर्णेषुदोषेषुबध्यमानेषुसाधुषु। जग्राहतरसाराज्यमंबरीषोमहायशाः॥ सनिग्रह्यात्मनोदोषान्निहत्यसर्वशत्रवः। एकोदोषोवशिष्टस्तुवध्यःसन्नहतोमया। तस्मयुक्तोजंतुरयंवैतृष्ण्यंनाधिगच्छति। तृष्णार्त्तइवनिम्नानिधावमानोनबुध्यते। अकार्य

साधून्समतिक्रम्यचजगामसहतीसिद्धिंगाथांश्चेमाजगाद ह। भूयिष्ठंमेजितादोषा। नि

सु
रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
२२

२

र्थमपि ये नेह प्रयुक्तः सेवते नरः। तं लोभमभिनिघ्नन्ती ह्यो निःस्पृहमेव निष्क्रान्तः ततः लोभाद्धि जायते तस्मात् ततः चिंता प्रसज्जतो सा लिप्समानो लभते भूयिष्ठं राजसान् गु
णान्॥ तदवाप्तौ च लभते भूयिष्ठं तामसान् गुणान्॥ तदवाप्तौ तु लभते भूयिष्ठं तामसा गुणान्॥ स तैर्गुणैः संहृतदेहबंधः पुनः पुनर्जायति कर्म चेहते॥ जन्मक्षि
वाभिन्नविकीर्णदेहो मृत्युं पुनर्गच्छति जन्मनैव। तस्मादिमं सम्यगवेक्ष्य लोको लोभं प्रयत्नात्मनि राज्यमिच्छेत्। एतज्ज्ञात्वं नान्यदस्तीह राज्यमात्मैव राजा
विदितो यथावत्। इति राज्ञाम्बरीषेण गाथा गीता यशस्विना। आधिराज्यं पुरस्कृत्य लोभमेकं निकृंतता॥ इत्याश्वमेधिके ब्राह्मणगीतासु॥ ब्राह्मण उ
वाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। जनकस्य च संवादं ब्राह्मणस्य च भामिनि। ब्राह्मणं जनको राजा सन्नं कस्मिंश्चिदागसि। विषये मे न व
स्तव्यमिति शिष्ट्यर्थमब्रवीत्। इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमं। आचक्ष्व विषयं राजन् यावांस्तव वशे स्थितः। सोऽन्यस्य विषये राज्ञो वस्तुमिच्छा
म्यहं विभो। वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते। इत्युक्तस्तु तदा राजा ब्राह्मणेन यशस्विना। मुहुरुष्णं च निश्वस्य न स तं प्रत्यभाषत। तमासीनं ध्या
यमानं राजानममितौजसं। कश्मलं सहसागच्छद्भानुमंतमिव ग्रहः॥ समाश्वस्य ततो राजा व्यपेते कश्मले तथा। ततो मुहूर्तादिव तं ब्राह्मणं वाक्यमब्रवी
त्॥ जनक उ०॥ पितृपैतामहे राज्ये वश्ये जनपदे सति। विषयं नाधिगच्छामि विचिन्वन्पृथिवीमिमां। नाध्यगच्छं यदा पृथ्व्यां मिथिला मार्गिता मया। नाध्य
गच्छं तदा तस्यां स्वाः प्रजा मार्गिता मया। नाध्यगच्छं तदा तासु तदा मे कश्मलोऽभवत्। ततो मे कश्मलस्यांते मतिः पुनरुपस्थिता। तदा न विषयं मन्ये सर्वो वा
विषयो मम। आत्मापि चायं न मम सर्वापि पृथिवी मम। यथा मम तथान्येषामिति मन्ये द्विजोत्तम। उष्यतां तावदुत्साहो भुज्यतां यावदिष्यते॥ ब्राह्मण
उवाच॥ पितृपैतामहे राज्ये वश्ये जनपदे सति। ब्रूहि कां मतिमास्थाय ममत्वं निर्जितं त्वया। कां वै बुद्धिं विनिश्चित्य सर्वो वै विषयस्तव। नावैषि विषयं येन

राम
२२

नाहमात्मार्थमिच्छामि रूपज्योतिश्च चक्षुषि। तस्मान्मे निर्जितं ज्योतिर्वशे तिष्ठति नित्यदा। ४

सर्वो वा विषयस्तव॥ जनक उवाच॥ अंतवंत इहारंभा विदिताः सर्वकर्मसु। नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत्। कस्येदमिति कस्य स्वमिति वेदव
चस्तदा। नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत्। एतां बुद्धिं विनिश्चित्य ममत्वं वर्जितं मया। शृणु बुद्धिं तु यां ज्ञात्वा सर्वत्र विषयो मम। नाहमात्मार्थमि
च्छामि गंधान्घ्राणगतानपि। तस्मान्मे निर्जिता भूमिर्वशे तिष्ठति नित्यदा। नाहमात्मार्थमिच्छामि रसानास्येऽपि वर्तिनः। आपो मे निर्जितास्तस्माद्वशे
तिष्ठंति नित्यदा। नाहमात्मार्थमिच्छामि स्पर्शांस्त्वचि गतांश्च ये। तस्मान्मे निर्जितो वायुर्वशे तिष्ठति नित्यदा। नाहमात्मार्थमिच्छामि शब्दान् श्रोत्रगतानपि।
तस्मान्मे निर्जिताः शब्दा वशे तिष्ठंति नित्यदा। देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिः सह। इत्यर्थं सर्व एवेमे समारंभा भवंति वै। ततः प्रहस्य जनकं ब्राह्मणः
पुनरब्रवीत्। त्वज्जिज्ञासार्थमेवेह विद्धि मां धर्ममागतं। त्वमस्य ब्रह्मनाभस्य बुद्ध्यावस्यानिवर्तिनः। सत्वनेमिनिरुद्धस्य चक्रस्यैकः प्रवर्तकः॥
इत्याश्वमेधिके ब्राह्मणगीतासु॥ ब्राह्मण उवाच॥ नाहं तथा भीरु चरामि लोके यथा त्वं मां तर्कयसे स्वबुद्ध्या। विप्रोऽस्मि मुक्तोऽस्मि वनेचरोऽस्मि गृहस्थ
धर्मा ब्रह्मचारी तथास्मि। नाहमस्मि तथा त्वं मां चक्षुषा पश्यसे शुभे। मया व्याप्तमिदं सर्वं यत्किंचिज्जगतीगतं। ये केचिज्जंतवो लोके जंगमाः स्थावरा
श्च ये। तेषां मामंतकं विद्धि दारूणामिव पावकं। राज्यं पृथिव्यां सर्वस्यामथवापि त्रिविष्टपे। तथा बुद्धिरियं वेत्ति बुद्धिरेव धनं मम। एकः पंथा ब्राह्मणानां
येन गच्छंति तद्विदः। गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु। लिंगैर्बहुभिरव्यग्रैरेका बुद्धिरुपास्यते। नानालिंगाश्रमस्थानां येषां बुद्धिः शमात्मिका। ते भाव
मेकमायांति सरितः सागरं यथा। बुद्ध्यायं गम्यते मार्गो न शरीरेण गम्यते। आद्यंतवंति कर्माणि शरीरं कर्मबंधनं। तस्मात्ते सुभगे नास्ति परलोककृतं भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐस्व
२३

यं।सद्ब्रह्मभावनिरतामिमेवात्मानमिच्छसि॥ ॥अश्वमेधिके ब्राह्मणगीतासु॥ ॥ब्राह्मण्युवाच॥ ॥नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना।बहु चा
ल्पं च संक्षिप्तं विप्लुतं च मनो मम।उपायं तु मम ब्रूहि येनैषा लभ्यते मतिः।तन्मन्ये कारणतमं यत एषा प्रवर्त्तते॥ ॥ब्राह्मण उ०॥ ॥अरणीं ब्राह्मणीं
विद्धि गुरुरस्योत्तरारणिः।तपःश्रुतेभिमथ्नीते ज्ञानाग्निर्जायते ततः॥ ॥ब्राह्मण्युवाच॥ ॥यदिदं ब्राह्मणो लिंगं क्षेत्रज्ञमिति संज्ञितं।गृहीतुं येन तत
च्छक्यं लक्षणं तस्य तत्क्व तु॥ ॥ब्राह्मण उवाच॥ ॥अलिंगो निर्गुणश्चैव कारणं नास्य विद्यते।उपायमेव वक्ष्यामि येन गृह्येत वा न वा।सम्यग्दृष्टश्च य
तच्वं पस्परोक्षैर्लक्षतो।कर्मबुद्धिं विदित्वा च ज्ञानलिंगैरनाश्रितं।इदं कार्य्यमिदं नेति न मोक्षेषूपदिश्यते।पश्यतः शृण्वतो बुद्धिरात्मनो येषु जायते।या
वंत इह शक्येरंस्तावंतोर्थात्प्रकल्पयेत्।व्यक्तानव्यक्तरूपांश्च शतशोथ सहस्रशः।सर्वान्नानार्थयुक्तांश्च सर्वान्प्रत्यक्षहेतुकान्।अतः परं नाविद्येत ततो
भ्यासो भविष्यति॥ ॥भगवानुवाच॥ ॥ततस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञसंशयात्।क्षेत्रज्ञानेन परतः क्षेत्रज्ञोन्यः प्रवर्त्तते॥ ॥अर्जुन उ०॥ ॥क्व नु सा ब्रा
ह्मणी कृष्ण क्व चासौ ब्राह्मणर्षभः।याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेच्युत॥ ॥भगवानुवाच॥ ॥मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीं।क्षेत्रज्ञ
इति यश्चोक्तः सोहमेव धनंजय॥ ॥इत्याश्वमेधिके पर्वणि ब्राह्मणगीतासमाप्ता॥४॥ ॥अर्जुन उवाच॥ ॥ब्रह्म यत्परमं वेद्यं तन्मे व्याख्यातुमर्हसि।भवतो हि
प्रसादेन सूक्ष्मे मे रमते मनः॥ ॥कृष्ण उवाच॥ ॥अत्राप्युदाहरंतीममितिहासं पुरातनं।संवादं मोक्षसंयुक्तं शिष्येण गुरुणा सह।कश्चिद्ब्राह्मणमासीन
माचार्यं संशितव्रतं।शिष्यः पप्रच्छ मेधावी किं स्विच्छ्रेयः परंतप।भगवंतं प्रपन्नोहं निःश्रेयसपरायणः।संवादं मोक्षसंयुक्तं याचे त्वां शिरसा विप्र यद्ब्रूयांब्रू

रपि
ल्प

२३

हि तन्मम।तमेवं वादिनं पार्थ शिष्यं गुरुरुवाच ह।कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विज।इत्युक्तः स कुरुश्रेष्ठ गुरुणा गुरुवत्सलः।प्रांजलिः सन्नुप
प्रच्छ यत्तच्छृणु महामते॥ ॥शिष्य उवाच॥ ॥कुतश्चाहं कुतश्च त्वं तत्सत्यं ब्रूहि यत्परं।कुतो जातानि भूतानि स्थावराणि चराणि च।केन जीवंति भूतानि
तेषामायुः किमात्मकं।किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः।के पंथानः शिवाः संति किं सुखं किं च दुष्कृतं।एतन्मे भगवन्प्रश्नान्याथातथ्ये
न सुव्रत।वक्तुमर्हसि विप्रर्षे यथावदिह तत्वतः।त्वदन्यः कोपि प्रश्नानेतान्वक्तुमिहार्हति।ब्रूहि ब्रह्मविदां श्रेष्ठ परं कौतूहलं मम।मोक्षधर्मार्थकुशलो
भवांल्लोकेषु गीयते।सर्वसंशयसंछेत्ता त्वदन्यो नेह विद्यते।संसारभीरवश्चैव मोक्षकामास्तथा वयं॥ ॥वासुदेव उवाच॥ ॥तस्मै संप्रतिपन्नाय यथा
वत्परिपृच्छते।शिष्याय गुणयुक्ताय शांताय प्रियवादिने।छायाभूताय दांताय यतते ब्रह्मचारिणे।तान्प्रश्नानब्रवीत्पार्थ मेधावी स धृतव्रतः।गुरुः कु
रुकुलश्रेष्ठ सम्यक्सर्वानरिंदम॥ ॥गुरुरुवाच॥ ॥ब्रह्मप्रोक्तमिदं सर्वमृषिप्रवरसेवितं।वेदविद्यासमावेद्यं तत्वार्थदर्शनं।ज्ञानं त्वेव परं विद्धि सं
न्यासस्तप उत्तमं।यस्तु वेद निराबाधं ज्ञानं तत्वविनिश्चयात्।सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते।यो विद्वान्सहवासं च विवासं चैव पश्यति।तथैवैकत्व
नानात्वे स दुःखात्परिमुच्यते।यो न कामयते किंचिन्न किंचिदभिमन्यते।एकलोकस्थ एवासौ ब्रह्मभूयाय कल्पते।प्रधानगुणतत्वज्ञः सर्वभूतविधानवित्
निर्ममो निरहंकारो मुच्यते नात्र संशयः।अव्यक्तबीजप्रभवो बुद्धिस्कंधमयो महान्।महाहंकारविटप इंद्रियांतरकोटरः।महाभूतविशेषश्च विशेषप्रति
शाखवान्।सदापर्णः सदापुष्पः शुभाशुभफलोदयः।आजीव्यः सर्वभूतानां ब्रह्मबीजः सनातनः।एतज्ज्ञात्वा च तत्वेन ज्ञानेन परमासिना।छित्वा चामरतां प्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आश्व॰
२४

श्रु

प्यपद मुत्तमं मधीते। बुद्धीयदिह संभुद्वा भवंतीह मनीषिणः॥ उपगम्यर्षयः सर्वे जिज्ञासंतः परस्परं। बृहस्पतिर्भरद्वाजो गौतमो भार्गवस्तथा॥ वशिष्ठः काश्य
पश्चैव विश्वामित्रो त्रिरेव च। मार्गान्सर्वान्परिक्रम्य परिश्रांताः स्वकर्मभिः॥ ऋषिमंगिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः॥ ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषं।
प्रणम्य च महात्मानं सुखासीनं महर्षयः। पप्रछुर्विनयोपेता निःश्रेयसमिदं वचः। कथं कर्म क्रियेत्साधु कथं मुच्येत किल्बिषात्। केन मार्गाः शिवाश्च स्युः किं
सत्यं किं च दुष्कृतं। केनोभौ कर्मपंथानौ ममत्वं केन विंदते। प्रलयं चापवर्गं च भूतानां प्रभवाप्ययौ। इत्युक्तः स मुनिश्रेष्ठैर्यदाह स पितामहः। तत्तेहं संप्रव
क्ष्यामि शृणु शिष्य यथातथं॥ ॥ब्रह्मोवाच॥ ॥मत्तः सर्वाणि जातानि स्थावराणि चराणि च॥ तपसा तानि जीवंतीति तद्विद्धि सुव्रताः। स्वां योनिं पुनरागम्य
वर्त्तंते स्वेन कर्मणा। सत्यं हि गुणमित्युक्तं नियतं पंचलक्षणं। ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः। सत्याद्भूतानि जातानि [illegible]। भूतं सत्यं
कवं महत्। तस्मात्सत्याश्रया विप्रा नित्यं योगपरायणाः॥ अतीतक्रोधसंतापा नियता धर्मसेतवः। अन्योन्यनियतान्वैद्यान्धर्मसेतुप्रवर्त्तकान्। तानहं सं
प्रवक्ष्यामि शाश्वतान्लोकभावनान्। चातुर्विद्यं तथा वर्णांश्चातुराश्रमकल्पितान्। धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः॥ पंथानं वः प्रवक्ष्यामि शिवं
क्षेमकरं द्विजाः॥ नियतं ब्रह्मभावाय यातं पूर्वं मनीषिभिः॥ गदतस्तं ममाद्येह पंथानं दुर्विदं परं। निबोधत महाभागा निखिलेन परंतपा। ब्रह्मचारिकमे
वाहुराश्रमं परमं पदं। गार्हस्थ्यं च द्वितीयं स्याद्वानप्रस्थमतः परं। ततः परं तु विज्ञेयमध्यात्मं परमं पदं। ज्योतिराकाशमादित्यो वायुरिंद्रः प्रजापतिः। नो पैति
यावदध्यात्मं तावदेतान्न पश्यति। तस्योपायं प्रवक्ष्यामि वदतो मे निबोधत। फलमूलानिलभुजां मुनीनां वसतां वने। वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्य

गी
२४

देवयानाय पंथानः संप्रकीर्त्तिताः। ते समध्यासिता धीरैः कर्मभिर्धर्मसेतवः॥ एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः। कालात्पश्यति १

ते। सर्वेषामेव वर्णानां गार्हस्थ्यो विधिरुच्यते। श्रद्धालक्षणमित्येवं धर्मं धीराः प्रचक्षते। इत्येवे ८ तानां सततं प्रभवाप्ययौ। अतः सत्वानि वक्ष्यामि याथातथ्ये
न हेतुना। विषमस्थानि सर्वाणि वर्त्तमानानि सर्वशः॥ महानात्मा तथाव्यक्तमहंकारस्तथैव च। इंद्रियाणि दशैकं च महाभूतानि पंच च। विशेषाः पंच
भूतानामित्येषा वैदिकी श्रुतिः॥ चतुर्विंशतिरेका च तत्वसंख्याः प्रकीर्त्तिताः॥ तत्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ॥ स धीरः सर्वभूतेषु न मोहमधि
गच्छति। तत्वानि यो वेदयते यथातथं गुणांश्च सर्वानखिलाश्च देवताः॥ विधूतपाप्मा प्रतिमुच्य बंधनं स सर्वलोकानखिलान्समश्नुते॥ ॥गुरुशिष्य
संवादे॥ ३५ ॥ब्राह्मण उवाच॥ ॥तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरं। नवद्वारं पुरं ज्ञात्वा त्रिगुणं पंचधातुकं। एकादशपरिक्षिप्तं मनो व्याकरणात्म
कं। बुद्धिस्वामिकमित्येतत्परमेकादशं भवेत्। त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायंते पुनः पुनः। प्रणाड्यस्त्रिस्र एवैताः प्रवर्त्तंते गुणात्मिकाः। तमो रजस्तथा
सत्वं गुणानेतान्प्रचक्षते। अन्योन्यमिथुनाः सर्वे तथान्योन्यानुजीविनः। अन्योन्यापाश्रयाश्चापि तथान्योन्यानुवर्त्तिनः। अन्योन्यं व्यतिषक्ताश्च त्रिगुणाः
पंच धातवः॥ तमसो मिथुनं सत्वं सत्वस्य मिथुनं रजः॥ रजसश्चापि सत्वं स्यात्सत्वस्य मिथुनं तमः। नियम्यते तमो यत्र रजस्तत्र प्रवर्त्तते। नियम्यते रजो यत्र
सत्वं तत्र प्रवर्त्तते। नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितं। अधर्मलक्षणं चैव नियतं पापकर्मसु। प्रवृत्त्यात्मकमेवाहू रजः पर्यायवाचकं। प्रवृत्तं स
र्वभूतेषु दृश्यतोत्पत्तिलक्षणं। एतेषां गुणतत्वं हि वक्ष्यते तत्त्वहेतुभिः। समासव्यासयुक्तानि तत्त्वतस्तानि वित्त मे। संमोहो मनसस्त्यागः कर्मणामपि
निर्णयः। स्वप्नस्तंभो नयं लोभः शोकः सुकृतदूषणं। स्मृतिश्चाविवेकश्च नास्तिक्यं भिन्नवृत्तिता। अकृतो कृतमानित्वमज्ञाने ज्ञानमानिता। अमैत्री विकृता

लि

ॐ

प्रकाशं सर्वभूतेषु लाघवं श्रद्दधानता। सात्त्विकं रूपमेतत्तु दृश्यते साधुसंमतं। २ निर्वैषत्यमंधत्वं जघन्यगुणवृत्तिता। १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
२५

विकृताभावाह्यश्रद्धामूढभावता। अनार्जवमसांप्रत्त्वं कर्मपापमचेतना। गुरुत्वंसन्नभावत्वं वशितत्त्वमवाग्गतिः॥ सर्वएतेगुणाविप्रास्तामसाः
परिकीर्तिताः॥ येचान्येनियताभावालोकेस्मिन्मोहसंज्ञिताः॥ तत्रतत्रनियम्यंतेसर्वेतेतामसागुणाः॥ परिवादकथानित्यंदेवब्राह्मणवैदिकाः॥ अत्या-
गश्चाभिमानश्चमोहोमन्युस्तथाक्षमा। मात्सर्यंचैवभूतेषुतामसंवृत्तमुच्यते। वृथारंभाश्चयेकेचिद्वृथादानानियानिच। वृथाभक्षणमित्येतत्तामसंवृ-
त्तमुच्यते। अतिवादोतितिक्षाचमात्सर्यमभिमानिता। अश्रद्दधानताचैवतामसंवृत्तमुच्यते। एवंविधास्तुयेकेचिल्लोकेस्मिन्पापकर्मिणः। मनुष्या
भिन्नमर्यादाःसर्वेतेतामसाःस्मृताः। तेषांयोनिंप्रवक्ष्यामिनियतांपापकर्मिणां। अवाङ्निरयभावायतिर्यङ्निरयगामिनां। स्थावराणिचभूतानिपशवो
वाहनानिच। क्रव्यादादंदशूकाश्चकृमिकीटविहंगमाः। अंडजाजंतवोयेचसर्वेचापिचतुष्पदाः। उन्मत्ताबधिरामूकायेचान्येपापकर्मिणः। मग्नास्तम-
सिदुर्वृत्ताःस्वकर्मकृतलक्षणाः। अवाक्स्रोतसइत्येतेमग्नास्तमसितामसाः॥ तेषामुत्कर्षमुद्रेकंवक्ष्याम्यहमतःपरं। यथातेसुकृताँल्लोकाँल्लभंतेपुण्य-
कर्मिणः। अन्यथाप्रतिपन्नास्तुविवृद्धायेचकर्मसु। स्वकर्मनिरतानांचब्राह्मणानांशुभैषिणां। संस्कारेणोर्ध्वमायांतियतमानाःसलोकतां। स्वर्गंग-
च्छंतिदेवानामित्येषावैदिकीश्रुतिः॥ अन्यथाप्रतिपन्नास्तेविबुद्धाःस्वेषुकर्मसु। पुनरावृत्तिधर्माणस्तेभवंतीहमानुषाः। पापयोनिंसमापन्नाश्चंडालामू-
कचूचुकाः। वर्णान्पर्यायशश्चापिप्राप्नुवंत्युत्तरोत्तरं। शूद्रयोनिमतिक्रम्ययेचान्येतामसागुणाः। स्रोतोमध्येसमागम्यवर्तंतेतामसेगुणे। अभिषंग-
स्तुकामेषुमहामोहइतिस्मृतिः। ऋषयोमुनयोदेवामुह्यंतेत्रसुखेप्सवः। तमोमोहोमहामोहस्तामिस्रःक्रोधउच्यते। पापतोगुणतश्चैवतत्त्वतश्चसमासतः॥

मरणंत्वंधतामिस्रंतामिस्रंक्रोधउच्यते।१

कृ

य

२५

साधुकोन्वे१

सर्वमेतत्तमोविप्राःकीर्तितंवोयथाविधि। कोन्वेतत्पश्यते [illegible] तत्साधुमन्यते। अतत्त्वेतत्त्वदर्शीयस्तमसस्तत्तुलक्षणं। तमोगुणावोबहुधाप्रकी-
र्तितास्तथायथावदुक्तंचतमःपरावरं। नरोहियोवेदगुणानिमान्सदासतामसैःसर्वगुणैःप्रमुच्यते॥ ॥गुरुशिष्यसंवादे॥ ॥ब्रह्मोवाच॥ ॥ रजोहंप्रवक्ष्यामिया-
थातथ्येनसत्तमाः॥ निबोधतमहाभागागुणवृत्तंचसर्वशः। संघातोरूपमायासःसुखदुःखेहिमातपौ। ऐश्वर्यंविग्रहःसंधिर्हेतुवादोरतिःक्षमा। बलंशौ-
र्यंमदोरोषोव्यायामकलहावपि। ईर्ष्येप्सापैशुनंयुद्धंममत्वंपरिपालनं। वधबंधपरिक्लेशाःक्रयोविक्रयएवच। निकृंतछिंधिभिंधीतिपरमर्माणिकर्त-
नं। उग्रंदारुणमाक्रोशःपरवित्तानुशासनं। लोकचिंताविचिंताचमत्सरःपरिभाषणं। मृषादानंमृषावादोविकल्पःपरिभाषणं। स्तुतिर्निंदाप्रशंसाचप्रता-
पःपरिवर्षणं। परिचर्याचशुश्रूषासेवातृष्णाव्यपाश्रयः। व्यूहोनयःप्रमादश्चपरितापःपरिग्रहः। संस्कारायेचलोकेस्मिन्प्रवर्तंतेपृथक्पृथक्। नृषुना-
रीषुभूतेषुद्रव्येषुशरणेषुच। संतापोप्रत्ययश्चैवव्रतानिनियमाश्चये। प्रदानमाशीर्युक्तानिपूर्तानिविविधानिच। स्वाहाकारोनमस्कारःस्वधाकारोवष-
ट्क्रिया। याजनाध्यापनेचोभेयजनाध्ययनेअपि। दानंप्रतिग्रहश्चैवप्रायश्चित्तानिमंगलं। इदंमेस्यादिदंमेस्यात्स्नेहोगुणसमुद्भवः। अभिद्रोहस्तथामा-
यानिकृतिर्मानएवच। स्तैन्यंहिं[illegible]वादःपरितापःप्रजागरः। तथादंभोथरागश्चभक्तिःप्रीतिःप्रमोदनं। द्यूतंचजनवादश्चसंबंधाःस्त्रीकृताश्चये। नृत-
वादित्रगीतानिप्रसंगायेचकेचन। एवमेतेगुणाविप्राराजसाःपरिकीर्तिताः॥ भूतभव्यभविष्याणांभावानांभुविभावनाः॥ त्रिवर्गनिरतानित्यंधर्मोर्थःका-
मएवच। कामवृत्ताःप्रमोदंतेसर्वकामसमृद्धिभिः॥ अर्वाक्स्रोतसइत्येतेतैजसारजसावृताः॥ अस्मिँल्लोकेप्रमोदंतेजायमानाःपुनःपुनः। प्रेत्यभाविक-

सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व·
२६

वो

मोहं तेषां रसो लौकिकमेव चार्द्दति प्रति गृह्णाति तत्पर्य्यंत्यथस्वद्धति। रजो गुणा बहुविधाः प्रकीर्त्तिता यथावदुक्तं गुणवृत्तमेव वा। नरो हि यो वेद गुणा
निमान्सदा स राजसैः सर्वगुणैः प्रमुच्यते॥ ॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच॥ अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमं। सर्वलोकहितं लोके सतां ध
र्म्ममनिंदितं। आनंदः प्रीतिरुद्रे[illegible]प्राकाश्यं सुखमेव च। अकार्प्पण्यमसंरंभः संतोषः श्रद्दधानता। क्षमा धृतिरहिंसा च समता सत्यमार्ज्जवं। अक्रोधः
श्चानसूया च शौचं दाक्ष्यं पराक्रमः। मुधा ज्ञानं मुधा वृत्तं मुधा सेवा मुधाश्रयः। एवं यो युक्तधर्म्मः स्यात्सोमुत्रानंत्यमश्नुते। निर्ममो निरहंकारो निरा
शीः सर्वतः समः। अकामहत इत्येषः सतां धर्म्मः सनातनः। विश्रंभो ह्रीस्तितिक्षा च त्यागः शौचमतंद्रिता। आनृशंस्यमसंमोहो दया भूतेष्वपैशुनं॥
हर्षः क्षांति विस्मयश्च विनयः साधुवृत्तिता। शांतिकर्म्म विशुद्धिश्च शुभा बुद्धिर्विमोचनं। उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः। निर्ममत्वं निराशीस्त्व
मपरीक्षा च धर्म्मता। स्वधादानं स्वधायज्ञो स्वधावीतं स्वधाकृतं। स्वधाप्रतिग्रहस्त्वेव स्वधाधर्म्मः स्वधातपः। एवंविधास्तु ये केचिल्लोकेस्मिन्सर्वसंश्र
याः। ब्राह्मणा ब्रह्मयोनिष्ठास्ते धीराः ब्रह्मदर्शिनिः। हित्वा पापानि सर्वाणि निःशोका ह्यमरामराः। दिव्यं प्राप्य तु ते धीराः कुर्व्वंति वैतत्तनूः। ईशित्वं
च वशित्वं च लघुत्वं मनसश्च ते। विकुर्वते महात्मानो देवास्त्रिदिवगा इव। ऊर्द्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः। विकुर्वंति प्रकृत्या वै दिवं प्रा
प्तास्ततस्ततः। यद्यदिच्छंति तत्सर्वं तन्मनेविभजंति च। इत्येतत्सात्विकं वृत्तं कथितं वो द्विजर्षभाः। एतद्विज्ञाय पुरुषो लभते यद्यदिच्छति। प्रकीर्त्तिताः
सत्वगुणा विशेषतो यथावदुक्तं गुणवृत्तमेव च। नरस्तु यो वेद सदा त्विकानिमान्गुणांस्तु भुंक्तेन गुणैः सभुज्यते॥ ॥ गुरुशिष्यसंवादे ब्राह्मणाग·

२६

३८

नैव शक्या गुणा वक्तुं पृथक्त्वेनेह सर्वशः। अविच्छिन्नानि दृश्यंते रजः सत्वं तमस्तथा। अन्योन्यमनुषज्यंते ह्यन्योन्यं चानुजीविनः। अन्योन्याश्रयाः
सर्वे तिष्ठन्त्यन्योन्यानुवर्त्तिनः। यावत्सत्वं तमस्तावद्वर्त्तते नात्र संशयः। यावत्तमश्च सत्वं च रजस्तावदिहोच्यते। संहत्य कुर्वते यात्रां संहताः सहचारिणः
संघातवृत्तयो ह्येते वर्त्तंते हेत्वहेतुभिः। उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्त्तिनां। वक्ष्यते तद्यथान्यूनं व्यतिरिक्तं च सर्वशः। यत्रातिर्य्यग्भावगतं व्यतिरि
क्तं तमो भवेत्। अल्पं तत्र रजो ज्ञेयं सत्वमल्पतरं तथा। उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत्। अल्पं तत्र तमो ज्ञेयं सत्वं चाल्पतरं तथा। उद्रिक्तं च
सदा सत्वमूर्द्ध्वस्रोतोगतं भवेत्। अल्पं तत्र तमो ज्ञेयं रजश्चाल्पतरं ततः। सत्वं वैकारिकी योनिरिंद्रियाणां प्रकाशिनी। नहि सत्वात्परो भावः कश्चि
दन्यो विधीयते। ऊर्द्धंति सत्वस्था मध्ये तिष्ठंति राजसाः। जघन्यगुणयुक्तास्तु यांत्यधस्तामसाः। तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्वमुत्तमं॥ इ
त्येवं त्रिषु वर्णेषु निवर्त्तंते गुणास्त्रयः। दूरादपि हि दृश्यंते सहिताः सहचारिणः। तमः सत्वं रजश्चैव पृथक्त्वेनानुशुश्रुम। दृष्ट्वा चादित्यमुद्यंतं कुचो
राणां भयं भवेत्। अध्वगाः परितप्येरन्नुष्णतो दुःखभागिनः। आदित्यः सत्वमुद्रिक्तं कुचोराश्च तथा तमः। परितापोध्वगानां च रजसो गुण उच्यते।
प्राकाश्यं सत्वमादित्यं संतापो राजसो गुणः। उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु। एवं ज्योतिःषु सर्वेषु निवर्त्तंते गुणास्त्रयः। पर्य्यायेण च वर्त्तंते
तत्र तत्र तथा तथा। स्थावरेषु च भूतेषु तिर्य्यग्भावगतं तमः। राजसास्तु निवर्त्तंते स्नेहभावस्तु सात्विकः। अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते।
मासार्द्धमासवर्षाणि ऋतवः संधयस्तथा। त्रिधा दानानि दीयंते त्रिधा यज्ञः प्रवर्त्तते। त्रिधा देवास्त्रिधा लोकास्त्रयाश्च त्रिविधा गतिः। [illegible] भूतं भव्यं

च्छंति ६

चोराः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
२१

भविष्यं च धर्मार्थः काम एव च। प्राणापानावुदानश्चाप्येत एव त्रयो गुणाः। यत्किंचिदिह लोके वै सर्वमेष्वेव तु त्रिषु। त्रयो गुणाः प्रवर्त्तंते अव्यक्ता नित्य
मेव तु। सत्वं रजस्तमश्चैव गुणसर्गः सनातनः। तमो व्यक्तं शिवं नित्यं रयोयोनिः सनातनं। प्राणापानौ विकाराणां प्रधानं प्रभवाव्ययौ। अनुद्रिक्तम
नूनं वाप्यकंप्यमचलं ध्रुवं। सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतं। ज्ञेयानि नामधेयानि नरैरध्यात्मचिंतकैः। अव्यक्तनामानि गुणांश्च तत्वतो यो वे
द सर्वाणि गतीश्च केवलाः। विमुक्तदेहः प्रविभागतत्ववित्समुच्यते सर्वगुणैर्निरामयः॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ अव्यक्तात्पूर्वमु
त्पन्नो महान्नात्मा महामतिः। आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते। महानात्मा मतिर्विष्णुर्जिष्णुः शंभुश्च वीर्यवान्। बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्या
तिर्धृतिः स्मृतिः। आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते। पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते। तं जानन्ब्राह्मणो विद्वान्प्रमोहं न स गच्छति।
सर्वतः पाणिपादश्च सर्वतोक्षिशिरोमुखः। सर्वतः श्रुतिमाल्लोके सर्वं व्याप्य स तिष्ठति। महाप्रविष्टः पुरुषः सर्वस्य हृदि निश्रितः। अणिमा लघि
मा प्राप्तिरीशानो ज्योतिरव्ययः। तत्र बुद्धिमतां लोकाः संन्यासनिरताश्च ये। ध्यानिनो नित्ययुक्ताश्च सत्यसंधा जितेंद्रियाः। ज्ञानवंतश्च ये केचिदलु
ब्धा जितमन्यवः। प्रसन्नमनसो धीरा निर्ममा निरहंकृताः। विमुक्ताः सर्व एवैते महत्वमुपयांति वै। आत्मनो महतो वेद यः पुण्यां गतिमुत्तमां। अहं
कारात्प्रसूतानि महाभूतानि पंच वै। पृथिवी वायुराकाशमापो ज्योतिश्च पंचमं। तेषु भूतानि युज्यंते महाभूतेषु पंचसु। ते शब्दस्पर्शरूपेषु रसगंध
क्रियासु च। महाभूतविनाशांते प्रलये प्रत्युपस्थिते। सर्वप्राणभृतां धीरा महदुत्पद्यते भयं। स धीरः सर्वलोकेषु न मोहमधिगच्छति। विष्णुरेवापि

२१

सर्गेषु स्वयंभूर्भवति प्रभुः। एवं हि यो वेद गुहाशयं प्रभुं परं पुराणं पुरुषं विश्वरूपं। हिरण्मयं बुद्धिमतां परां गतिं स बुद्धिमान्बुद्धिमतीत्य तिष्ठति॥ ॥
गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ य उत्पन्नो महान्पूर्वमहंकारः स उच्यते। अहमित्येव संभूतो द्वितीयः सर्ग उच्यते। अहंकारश्च भूतादिर्वैकारि
क इति स्मृतः। तेजसश्चेतना धातुः प्रजासर्गः प्रजापतिः। देवानां प्रभवो देवो मनसश्च त्रिलोककृत्। अहमित्येव तत्सर्वमभिमंता स उच्यते। अध्यात्मध्यान
तृप्तानां मुनीनां भावितात्मनां। स्वाध्यायक्रतुसिद्धानामेष धर्मः सनातनः। अहंकारेणाहरतो गुणानिमान्भूतादिरेवं सृजते स भूतकृत्। वैकारिकः सर्व
मिदं विचेष्टते स्वतेजसा रंजयते जगत्तथा॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ अहंकारात्प्रसूतानि महाभूतानि पंच वै। पृथिवी वायुराकाशमापो ज्योति
श्च पंचमं। तेषु भूतानि युज्यंते महाभूतेषु पंचसु। शब्दस्पर्शश्च रूपं च रसगंधक्रियासु च। महाभूतविनाशांते प्रलये प्रत्युपस्थिते। सर्वप्राणभृतां धीरा महदु
त्पद्यते भयं॥ यद्यस्माज्जायते भूतं तत्र तत्र प्रलीयते। लीयंते प्रतिलोमानि जायंते चोत्तरोत्तरं। ततः प्रलीने सर्वस्मिन्भूते स्थावरजंगमे। स्मृतिमंतस्तदा धीरा न
लीयंते कदाचन। शब्दः स्पर्शस्तथा रूपं रसो गंधश्च पंचमं। क्रियाकारणयुक्ताः स्युरनित्या मोहशंकिनः। लोभमोहेन युक्ताश्च निर्विशेषा ह्यकिंचनाः। मांसशो
णितसंघाता अन्योन्योपजीविनः। बहिरात्मान इत्येते दीनाः कृपणवृत्तयः। प्राणापानावुदानश्च समानो व्यान एव च। अंतरात्मेति चाप्येते नियताः पंच वा
यवः। वाङ्मनो बुद्धिरित्येभिः सार्धमष्टात्मकं जगत्। त्वग्घ्राणश्रोत्रचक्षूंषि रसनं वाक् च संयता। विशुद्धं च मनो नित्यं बुद्धिश्चाव्यभिचारिणी। अष्टौ य
ग्नयो ह्येते न दहंते मनश्च सदा। महद्ब्रह्म शुभं याति यस्माद्भूयो न विद्यते। एकादश च यान्याहुरिंद्रियाणि विशेषतः। अहंकारात्प्रसूतानि तानि वक्ष्याम्यहं द्विजाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
२८

श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पंचमी। पादौ पायुरुपस्थश्च हस्तौ वाग्दशमी भवेत्। इंद्रियग्राम इत्येष मन एकादशं भवेत्। एतं ग्रामं जयेत्पूर्वं ततो ब्र
ह्म प्रवर्त्तते। बुद्धींद्रियाणि पंचाहुः पंच कर्मेंद्रियाणि च। श्रोत्रादीनि च पंचाहुः पंच कर्मेंद्रियाणि च। श्रोत्रादीनि तु यान्याहुः पंच कर्मेंद्रियाणि बुद्धियु
क्तानि तत्वतः॥ अविशेषाणि चान्यानि कर्मयुक्तानि तानि तु। उभयत्र मनो ज्ञेयं बुद्धिस्तु द्वादशी भवेत्। इत्युक्तानींद्रियाण्येतान्येकादश यथाक्रमं।
मन्यंते कृतमित्येवं विदित्वैतानि पंडिताः। त्रीणि स्थानानि भूतानि चतुर्थं नोपपद्यते। स्थलमापस्तथाकाशं जन्म चापि तथाविधं। अंडजोद्भिज्जसंस्वेदजरायुज
मथापि वा। चतुर्धा जन्म इत्येते भूतग्रामस्य लक्ष्यते। अपराण्यथ भूतानि खेचराणि तथैव च। अंडजानि विजानीयात्सर्वांश्चैव सरीसृपान्। स्वेदजाः कृमयः प्रो
क्ताजंतवश्च तथाविधाः। जन्म द्वितीयमित्येतज्जघन्यतरमुच्यते। भित्वा तु पृथिवीं यानि जायंते कालपर्ययात्। उद्भिज्जानीति तान्याहुर्भूतानि द्विजसत्त
माः। द्विपाद बहुपादानि तिर्यग्गतिमतीनि च। जरायुजानि भूतानि विद्धि तान्यपि सत्तमाः। द्विविधा इह विज्ञेया ब्रह्मयोनिः सनातनाः। तपः कर्म च यत्पुण्यमि
त्येष विदुषां नयः। द्विविधं कर्म विज्ञेयं विद्यादानं च यज्ञ खे। जातस्याध्ययनं पुण्यमिति वृद्धानुशासनं। तत्र यो विधिव देहं सनुक्तः स्याद्विजर्षभाः। विमुक्तः
सर्वपापेभ्य इति चैव निबोधत। आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममीच्यते। अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतं। द्वितीयं मारुतो भूतं त्वगध्यात्मं च विश्रु
तं। स्प्रष्टव्यमधिभूतं च विद्युत्तत्राधिदैवतं। चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममिष्यते। अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतं। पृथिवी पंचमं भूतं घ्राण
श्चाध्यात्ममिष्यते। अधिभूतं तथा गंधो वायुस्तत्राधिदैवतं। एष पंचसु भूतेषु त्रिषु यश्च विधिः स्मृतः। अतः परं प्रवक्ष्यामि सर्वं विविधमिंद्रियं। पादावध्यात्ममि

२८

त्याहुर्ब्राह्मणास्तत्वदर्शिनः। अधिभूतं तु गंतव्यं विष्णुस्तत्राधिदैवतं। अवाग्गतिरपानश्च पायुरध्यात्ममिष्यते। अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतं। प्रजनः
सर्वभूतानि पंचविध्यात्ममुच्यते। अधिभूतं तथा शुक्रं दैवतं च प्रजापतिः। हस्तौ चाध्यात्ममित्याहुरध्यात्मविदुषो जनाः। अधिभूतं तु कर्माणि शक्रस्तत्रा
धिदैवतं। जिह्वा देवी मनः पूर्वा वागध्यात्ममिहोच्यते। वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतं। अहंकारस्तथाध्यात्मं सर्वसंसारकारणं। अभिमानो
धिभूतं च रुद्रस्तत्राधिदैवतं। अध्यात्मं बुद्धिरित्याहुः षडिंद्रियविचारिणी। अधिभूतं तु गंतव्यं ब्रह्मा तत्राधिदैवतं। यथावदध्यात्मविधिरेष वः कीर्ति
तो मया। ज्ञानमस्य हि धर्मज्ञाः प्राप्तं बुद्धिमतामिह। इंद्रियाणींद्रियार्थाश्च महाभूतानि पंच च। सर्वाण्येतानि संधाय मनसा संप्रधारयेत्। क्षीणे म
नसि सर्वस्मिन्न जन्मसुखमिष्यते। ज्ञानसंपन्नसत्वानां तत्सुखं विदुषां मतं। || || गुरुशिष्यसंवादे || ब्रह्मोवाच || अतः परं प्रवक्ष्यामि सूक्ष्
मभावकरीं शिवां। निवृत्तिं सर्वभूतेषु मृदुना दारुणेन वा। गुणागुणमनासंगमेकचर्यमनंतरं। एतद्ब्राह्मणतो वृत्तमाहुरेकपदं सुखं। विद्वान्
कूर्म इवांगानि कामान्संहृत्य सर्वशः। विरजाः सर्वतो मुक्तो मानवः स सुखी तदा। कामानात्मनि संयम्य क्षीणतृष्णः समाहितः। सर्वभूतसु
हृन्मैत्रो ब्रह्मभूयाय गच्छति। इंद्रियाणां निरोधेन सर्वेषां विषयैषिणां। मुनेर्जनपदत्यागादध्यात्माग्निः समिध्यते। यथाग्निरिंधनैरिद्धो महाज्यो
तिः प्रकाशते। तथेंद्रियनिरोधेन महात्मा संप्रकाशते। यदा पश्यति भूतानि प्रसन्नात्मा मनाहृदि। स्वयंयोनिस्तदा सूक्ष्मात्सूक्ष्ममाप्नोत्यनुत्तमं।
अग्निरूपं पयः स्रोतो वातः स्पर्शनमेव च। मही पंकधरं घोरमाकाशं श्रवणं तथा। रोगशोकसमाविष्टं पंचस्रोतः समावृतं। पंचभूतसमायुक्तं नव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
२९

द्वारं द्विदैवतं। रजस्वलमथाद्द्दश्यं त्रिगुणं च त्रिधातुकं। संसर्गनिरतं मूढं शरीरमिति धारणा। ईश्वरं जीवजो कोस्मिन् सत्वं प्रतिसमाश्रितं। एतदेव हि लोकेस्मिन् कालचक्रं प्रवर्त्तते। एतन्महार्णवं घोरमगाधं घोरमंत्तितं। विसृजेत्त्वं क्षिपेच्चैव बोधयत्यमरं जगत्। कामं क्रोधं भयं मोहमभिद्रोहमथानृतं। इंद्रियाणां निरोधेन सतां त्यजंति दुस्त्यजान्। यस्यैते निर्जिता लोके त्रिगुणाः पंचधातवः। व्योम्नि तस्य परं स्थानमनंतमिह लक्ष्यते। पंचेंद्रियमहाकूलां मनःस्रोतोभयावहां। नदीं लोभह्रदां तीर्त्वा कामक्रोधावुभौ जयेत्। सर्वपापविनिर्मुक्तस्ततः पश्यति यत्परं। मनो मनसि संधाय पश्यत्यात्मानमात्मनि। सर्ववित्सर्वभूतेषु रक्षत्यात्मानमात्मना। एकधा बहुधा चैव विकुर्वाणस्ततस्ततः। ध्रुवं पश्यति भूतानि दीपाद्दीपशतं यथा। स वै विष्णुश्च मित्रश्च वरुणोऽग्निः प्रजापतिः। स वै धाता विधाता च स प्रभुः सर्वतोमुखः। हृदयं सर्वभूतानां महानात्मा प्रकाशते। तं विप्रसंघाश्च सुरासुराश्च तथा पिशाचाः पितरो वयांसि। रक्षोगणा भूतगणाश्च सर्वे महर्षयश्चापि तथा स्तुवंति॥ गुरुशिष्यसंवादे॥ ब्रह्मोवाच॥ मनुष्याणां तु राजन्यः क्षत्रियो मध्यमो गुणः॥ कुंजरो वाहनानां च सिंहश्चारण्यवासिनां। अविः पशूनां सर्वेषामाखुश्च बिलवासिनां। गवां गोवृषभश्चैव स्त्रीणां पुरुष एव च। न्यग्रोधोदुंबरो वृक्षो पिप्पलः शाल्मलिस्तथा। शिंशपा मेषशृंगश्च तथा कीचकवेणवः। एते द्रुमाणां राजानो लोकेस्मिन्नात्र संशयः। हिमवान्पारियात्रश्च सह्यो विंध्यस्त्रिकूटवान्। श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्वताः। गुरुस्कंधो महेंद्रश्च माल्यवान्पर्वतस्तथा। एते पर्वतराजानो गणानां मारुतस्तथा। सूर्यो ग्रहाणामधिपो नक्षत्राणां च चंद्रमाः। यमः पितॄणामधिपः सरितामथ सागरः। अंभसां वरुणो राजा मरुतामिंद्र उच्यते। अर्कोधिपतिरुष्णानां ज्योतिषामिंदुरुच्यते। २९

अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः। ओषधीनां पतिः सोमो विष्णुर्बलवतां वरः। त्वष्टाधिराजो रूपाणां पशूनामुत्तमः शिवः। दक्षिणानां यथा यज्ञो देवानामृषभस्तथा। दिशामुदीची विप्राणां सोमो राजा प्रतापवान्। कुबेरः सर्वयक्षाणां देवानां च पुरंदरः। एष भूताधिकः सर्गः प्रजानां च प्रजापतिः। सर्वेषामेव भूतानामहं ब्रह्ममयो निधिः। भूतं परतरं मत्तो विष्णोर्वापि न विद्यते। राजाधिराजः सर्वेषां विष्णुः सर्वमयो महान्। ईश्वरं तं विजानीध्वं स विभुः स प्रजापतिः॥ नरकिन्नरयक्षाणां गंधर्वोरगराक्षसां। देवदानवनागानां सर्वेषामीश्वरो हि सः। भगदेवानुजातानां सर्वेषां वामलोचना। माहेश्वरी महादेवी पार्वती प्रोच्यते मया। उमां देवीं विजानीध्वं नारीणामुत्तमां शुभां। रतीनां च वसुमत्यश्च स्त्रीणामप्सरसां तथा। धर्मकामाश्च राजानो ब्राह्मणा धर्मलक्षणाः। तस्माद्राजा द्विजातीनां प्रयतेत स्म रक्षणे। राज्ञां हि विषये येषामवसीदंति साधवः। हीनास्ते स्वगुणैः सर्वैः प्रेत्यावाङ्मार्गगामिनः। राज्ञां तु विषये येषां साधवः परिरक्षिताः। तेस्मिन् लोके प्रमोदंते प्रेत्य चानंत्यमेव च। प्राप्नुवंति महात्मान इति तद्द्विजसत्तमाः। अतऊर्ध्वं प्रवक्ष्यामि नियतं धर्मलक्षणं। अहिंसालक्षणो धर्मो हिंसा चाधर्मलक्षणा। प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः। शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः। स्वरव्यंजनसंस्कारा भारती शब्दलक्षणा। मनसा विंतितानर्थान्बुद्ध्या चेह व्यवस्यति। बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः। लक्षणं मनसो ध्यानमव्यक्तं साधुलक्षणं। प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणं। तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्। संन्यासी ज्ञानयुक्तश्च प्राप्नोति परमां गतिं। अतीतो द्वंद्वमभ्येति तमोमृत्युजरातिगः। धर्मलक्षणसंयुक्तमेवोविधिवन्मया। गुणानां ग्रहणं सम्यग्वक्ष्याम्यहमतः परं। पार्थिवो यस्तु गंधो वै घ्राणेनेह स गृह्यते। घ्राणस्थश्च तथा वायुर्गंधज्ञाने विधीयते। अपां धातुरसो नित्यं जिह्वया गृह्यते स हि। जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते। वायोः स्पर्शस्तथा स्पर्शस्त्वचा प्रज्ञायते च सः। त्वक्स्थश्चैव तथा वायुः स्पर्शज्ञाने विधीयते।

ज्योतिषस्तु गुणो रूपं चक्षुषा तद्गृह्यते। ज्योतिषां लक्षणं रूपं आपश्च रसलक्षणाः। धारिणी सर्वभूतानां पृथिवी सर्वलक्षणा। ५
चक्षुःस्थश्च तथादित्यो रूपज्ञाने विधीयते।

न
श्र २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰

३०

गा

आकाशस्य गुणः शब्दः श्रोत्रेण मनुगृह्यते। श्रोत्रस्थाश्च दिशः सर्वाः श्रोत्रज्ञाने प्रकीर्तिताः। मनसस्तु गुणश्चिंता प्रज्ञया मातगृह्यते। हृदिस्थश्चेतनाधातुर्मनोज्ञा
नेविधीयते। बुद्धिर व्यवसायेन ध्यानेन मनसस्तथा। निश्चित्य ग्रहणं नित्यमव्यक्तं नात्र संशयः। अलिंगग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः। तस्मादलिंगः क्षे
त्रज्ञः केवलो ज्ञानलक्षणः। अव्यक्तं देवनिर्दिष्टं गुणानां प्रभवाव्ययं। सदा पश्याम्यहं हीनं विजानामि शृणोमि च। पुरुषस्तद्विजानाति तस्मात्क्षेत्रज्ञ उच्यते। गु
णाहत्तं यथा कृत्स्नं क्षेत्रज्ञः परिपश्यति। आदिमध्यावसानान्तं सृज्यमानमचेतनं। न गुणा विदुरात्मानं सृज्यमानं पुनः पुनः। सत्यं वेदयते कश्चित् क्षेत्रज्ञस्त्वेव वि
द्यते। गुणानां गुणभूतानां यत्परं परतो महत्। तस्माद्गुणं च सत्त्वं च परित्यज्येह तत्त्ववित्। क्षीणदोषो गुणातीतः क्षेत्रज्ञं प्रविशत्यथ। निर्द्वंद्वो निर्नमस्कारो
निःस्वधाकार एव च। अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विभुः॥ ॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ यदादिमध्यपर्यंतं ग्रहणोपायमेव च। नामलक्षणसंयुक्तं
सर्वं वक्ष्यामि तत्त्वतः। अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयस्तथा। श्रवणादीनि ऋक्षाणि ऋतवः शिशिरादयः। भूमिरादिस्तु गंधानां रसानामापएव च। रूपा
णां ज्योतिरादिस्तु स्पर्शादिर्वायुरुच्यते। शब्दस्यादिस्तथाकाशमेष भूतकृतो गुणः। अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमं। आदित्यो ज्योतिषामादिरग्नि
र्भूतादिरुच्यते। सावित्री सर्वविद्यानां देवतानां प्रजापतिः। ॐकारः सर्ववेदानां वचसः प्राण एव च। यद्यस्मिन्नियतं लोके सर्वं सावित्रिरुच्यते। गायत्री छंद
सामादिः पशूनामज उच्यते। गावश्चतुष्पदामादिर्मनुष्याणां द्विजातयः। श्येनः पतत्रिणामादिर्यज्ञानां हुतमुत्तमं। सरीसृपानां सर्वेषां श्रेष्ठः सर्वे द्विजोत्तम।
कृतमादिर्युगानां च सर्वेषां नात्र संशयः। हिरण्यं सर्वरत्नानामोषधीनां यवास्तथा। सर्वेषां भक्ष्यभोज्यानामन्नं परमिहोच्यते। द्रवाणां चैव सर्वेषां पेयानामापउ
त्तमाः। स्थावराणां च भूतानां सर्वेषामविशेषतः। ब्रह्मक्षेत्रं सदा पुण्यं प्लक्षः पुण्यतमः स्मृतः। अहं प्रजापतीनां च सर्वेषां नात्र संशयः। मम विष्णुरचिंत्यात्मा स्वयं

३०

ज्ञातस्य

नि

भूरिति संस्मृतः। पर्वतानां महामेरुः सर्वेषामग्रजः स्मृतः। दिशां च प्रदिशां चोर्ध्वा दिक् जाता प्रथमा तथा। तथा त्रिपथगा गंगा नदीनामग्रजा स्मृता। तथा सरो
दपानानां सर्वेषां सागरोग्रजः। देवदानवभूतानां पिशाचोरगरक्षसां। नरकिंनरयक्षाणां सर्वेषामीश्वरः प्रभुः। आदिर्विश्वस्य महतो विष्णुर्ब्रह्ममयो महा
न्भूतं परतरं यस्मात्त्रैलोक्ये नेह विद्यते। आश्रमाणां च गार्हस्थ्यं सर्वेषां नात्र संशयः। लोकानामादिरव्यक्तः सर्वस्यांतः स एव च। अहान्यस्तमयांतानि
उदयांता च शर्वरी। सुखस्यानंतरं दुःखं दुःखस्यानंतरं सुखं। सर्वे क्षयांता निचयाः पतनांताः समुच्छ्रयाः। संयोगा विप्रयोगांता मरणांतं हि जीवितं। सर्वं
कृतं विनाशांतं मरणं ध्रुवं। अशाश्वतं हि लोकेस्मिन् सदा स्थावरजंगमं। इष्टं दत्तं तपोधीतं व्रतानि नियमश्च ये। सर्वमेतद्विनाशांतं ज्ञानस्य मरणं ध्रुवं।
अशाश्वतं हि लोकेस्मिन् सदा स्थावरजंगमं। ज्ञानस्यांतो न विद्यते। तस्मात् ज्ञानेन सिद्धेन प्रसन्नात्मा समाहितः। निर्ममो निरहंकारो मुच्यते सर्वपाप्म
भिः॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ बुद्धिज्ञानं मनस्तंभमिंद्रियज्ञानबंधनं। महाभूतपरिस्कंधं विवेशपरिवेक्षणं। जराशोकसमाविष्टं व्याधिव्यस
नसंचरं। देशकालविचारीदं श्रमव्यायामदिस्वनं। अहोरात्रिपरिक्षेपं शीतोष्णपरिमंडलं। सुखदुःखांतसंक्लेशं क्षुत्पिपासावकीलनं। छायातपविलेखं च
निमेषोन्मेषविह्वलं। घोरमोहसमाकीर्णं वर्तमानमचेतनं। मासार्द्धमासगणितं विषमं लोकसंचरं। तमोनियतपंकं च रजोवेगप्रवर्तनं। सत्त्वसंहार
दीप्तं च गुणसंघातमंडलं। अरतिग्रहणानीकं शोकसंघातवर्तिनं। क्रियाकरणसंयुक्तं रागविस्तारमायतं। लोभेप्सा परिसंख्यातं विविक्तज्ञानसंभवं।
भयमोहपरीवारे भूतसंमोहकारकं। आनंदप्रीतिसारं च कामक्रोधपरिग्रहं। महदादिविशेषांतमसक्तप्रभवाव्ययं। मनोजवं मनःशांतं कालचक्रं प्रव
र्तते। एतद्द्वंद्वसमायुक्तं कालचक्रमचेतनं। विसृजेत्संक्षिपेच्चापि बोधयेत्सामरं जगत्। कालचक्रप्रवृत्तिं च निवृत्तिं चैव तत्त्वतः। यस्तु वेद नरो नित्यं सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतेषु मुह्यति। विमुक्तः सर्वसंस्कारैः सर्वद्वन्द्वातिगो मुनिः। विमुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिं। गृहस्थो ब्रह्मचारी च वानप्रस्थो ऽथ भिक्षुकः। चत्वार आ-
श्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः॥ यः कश्चिदिह लोकेऽस्मिन्नागमः संप्रकीर्तितः। तस्यान्तगमनं श्रेयः कीर्तिरेषा सनातनी। संस्कारैः संस्कृतः पूर्वं यथा-
वच्चरितव्रतः। जातौ गुणविशिष्टायां समावर्तेत वेदवित्। स्वदारनियतो दान्तः शिष्टाचारो जितेन्द्रियः। पंचभिश्च महायज्ञैः श्रद्दधानो यजेदिह। देवता-
तिथिशिष्टाशी निरतो वेदकर्मसु। इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि। न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागङ्गचपल इति शिष्टस्य
गोचरः। नित्यं यज्ञोपवीती स्याच्छुक्लवासाः शुचिव्रतः। नियतो दममभ्यस्थे दशिष्टैश्च न संवसेत्। जितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः। वैणवीं धार-
येद्यष्टिं सोदकं च कमण्डलुं। अधीत्याध्यापनं कुर्यात्तथा यजनयाजने। दानं प्रतिग्रहं वापि षड्गुणांश्चरिमाचरेत्। त्रीणि कर्माणि जानीहि ब्राह्मणानां
तु जीविकाः। याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः। अवशेषाणि चान्यानि कर्माणि त्रीणि यानि तु। दानमध्ययनं यज्ञो धर्मयुक्तानि तानि च। तेष्वप्रमादं
कुर्वीत त्रिषु कर्मसु धर्मवित्। दान्तो मैत्रः क्षमायुक्तः सर्वभूतसमो मुनिः। सर्वप्रियहिते युक्तः सदा धर्मपरः शुचिः। एवं युक्तो जयेत्स्वर्गं गृहस्थः सं[...]व्रतः।
॥ गुरुशिष्यसंवादे ॥ ब्रह्मोवाच ॥ एवमेतेन मार्गेण पूर्वोक्तेन यथाविधि। अधीतवान्यथाशक्ति तथैव ब्रह्मचर्यवान्। स्वधर्मनिरतो विद्वान्सर्वे-
न्द्रिययतो मुनिः। गुरोः प्रियहिते युक्तः सत्यधर्मपरः शुचिः। गुरुणा समनुज्ञातो भुंजीतान्नमकुत्सयन्। हविष्यभैक्ष्यभुक्चापि स्थानासनविहारवान्। द्वि-
कालमग्निं जुह्वानः शुचिर्भूत्वा समाहितः। धारयीत सदा दण्डं वैल्वं पालाशमेव वा। क्षौमं कार्पासिकं वापि मृगाजिनमथापि वा। सर्वं काषायरक्तं वा स्या-
द्वापि द्विज सत्तम। मेखला च भवेन्मौंजी जटी नित्योदकस्तथा। यज्ञोपवीती स्वाध्यायी अलुब्धो नियतव्रतः। स्नानैश्च तर्पयेदद्भिः सदा देवततर्पणं। भावेन

नियतः कुर्वन्ब्रह्मचारी व्रशच्युतो। एवं युक्तो जयेत्स्वर्गमूर्ध्वरेताः समाहितः। न संसरति जातीषु परमं स्थानमाश्रितः। संस्कृतः सर्वसंस्कारैस्तथैव ब्रह्मचर्य-
वान्। ग्रामान्निष्क्रम्य चारण्यं मुनिः प्रव्रजितो वसेत्। चर्मवल्कलसंवीतः सायं प्रातरुपस्पृशेत्। अरण्यगोचरो नित्यं न ग्रामं प्रविशेन्मुनिः। अर्चयेदतिथीन्का-
ले दद्याच्चापि प्रतिश्रयं। फलपत्रैरवरैर्मूलैः श्यामाकेन च वर्तयन्। प्रवृत्तमुदकं वायुं सर्वं वानेयमातृणात्। प्राश्नीयादानुपूर्व्येण यथादीक्षमतन्द्रितः।
समूलफलभिक्षाभिरर्चेदतिथिमागतं। यत्किंचिद्यात्ततो दद्याद्भिक्षां नित्यमतन्द्रितः। देवतातिथिपूर्वं च सदा भुंजीत वाग्यतः। अस्पर्धितमनाश्चैव लघ्वाशी
देवताश्रयः। दान्तो मैत्रः क्षमायुक्तः केशश्मश्रुविधारयन्। जुह्वन्स्वाध्यायशीलश्च सत्यधर्मपरायणः। त्यक्तदेहः सदा दक्षो वने नित्यः समाहितः।
एवं युक्तो जयेत्स्वर्गं वानप्रस्थो जितेन्द्रियः। गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथवा पुनः। य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत्। अभयं सर्वभूतेभ्यो द-
त्त्वा नैष्कर्म्यमाचरेत्। सर्वभूतसुखो मैत्रः सर्वेन्द्रिययतो मुनिः। अयाचितमसंक्लिष्टमुपपन्नं यदृच्छया। कृत्वा प्राह्णे चरेद्भैक्ष्यं विधूमे भुक्तवज्जने। वृत्ते
शरावसंपाते भैक्षं लिप्सेत मोक्षवित्। लाभेन च न हृष्येत नालाभे विमना भवेत्। तोषयेत सदा मोघं ग्राममागतमस्पृहः। यात्रामात्रं च भुंजीत केवलं प्राण-
यात्रिकाः। धर्मलब्धं तथाश्नीयान्न काममनुवर्तयेत्। ग्रामादाच्छादनार्थं च यच्च गृह्णीयात्कदाचन। यावदाहरयेत्तावत्प्रतिगृह्णीत नाधिकं। पर्वभ्यो न प्रतिगृ-
ह्णीयान्न च देयं कथंचन। दैन्यभावाच्च भूतानां संविभज्य सदा बुधः। नाददीत परस्वानि न गृह्णीयादयाचितं। न किंचिद्विषयं भुक्त्वा स्पृहयेत्तस्य वै पुनः। मृद-
मंबस्तथा ऽन्नं यत्र पुष्पफलानि च। असंवृतानि गृह्णीयात्प्रवृत्तानीह कार्यवान्। न शिल्पजीविकां जीवेद्धिरण्यं नानुकामयेत्। न द्वेष्टा नोपदेष्टा च भवेत नि-
रुपस्कृतः। श्रद्धापूतानि भुंजीत निमित्तानि च वर्जयेत्। सुधामृतरसं कश्चित्सर्वभूतैरसंविदं। न चानि मिक्षांभिक्षेत केवलं प्राणयात्रिकः। यात्रार्थी कालमाकार्द्दं

समः सर्वेषु भूतेषु स्थावरेषु चरेषु च॥ परान्नोद्वेजयेत्कांश्चिन्नच कस्यचिदुद्विजेत्॥

अ॰ श्व॰
३२

शरीरे द्वंद्वं समाहितः॥ नात्मसंभारणं नेच्छेत् भुंजीताभिशंसितः। अभिपूजितलाभं हि विजुगुप्सेत भैक्षुकः। भुक्त्वान्यानि तिक्तानि कषायकटुकानि च।
नास्वादयेत भुंजानो रसान्मधुरांस्तथा। यात्रामात्रं च भुंजीत केवलं प्राणयात्रिकः॥ असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित्। न चान्यमन्नं भिक्षेत भिक्षमाणः
कथंचन। न संनिकाशयेद्धर्मं विविक्ते चारजाश्चरेत्। शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा। प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहां। ग्रामैकरात्रिको ग्रीष्मे वर्षा
स्वेकत्र वा वसेत्। अध्वा सूर्येण निर्दिष्टः कीटवच्च चरेन्महीं। दयार्थं सर्वभूतानां समीक्ष्य पृथिवीं चरेत्। संचयांश्च न कुर्वीत स्नेहवासं च वर्जयेत्। पूतेन चांभसा नित्यं
कर्म कुर्वीत मोक्षवित्। उपस्पृशेदुद्धृताभिरद्भिश्चापि सदैव हि। अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च। अक्रोधश्चानसूया च दमो नित्यमपैशुनं। अष्टस्वेतेषु
युक्तः स्याद्व्रतेषु नियतेंद्रियः॥ अपापमशठं वृत्तमजिह्मं नित्यमाचरेत्। आशीर्युक्तानि कर्माणि हिंसायुक्तानि यानि च। लोकसंग्रहधर्मं च नैव कुर्यान्न कारयेत्॥
सर्वभावाननतिक्रम्य लघुमात्रः परिव्रजेत्। विश्वास्यः सर्वभूतानामग्र्यो मोक्षविदुच्यते। अनागतं न च ध्यायेन्नातीतमनुचिंतयेत्। वर्तमानमुपेक्षेत्तु कालकांक्षी
समाहितः॥ न चक्षुषा न मनसा न वाचा दूषयेत्क्वचित्। न प्रत्यक्षं परोक्षं च किंचिद्दुष्टं समाचरेत्। इंद्रियाण्युपसंहृत्य कूर्मोंगानीव सर्वशः। क्षीणेंद्रियमनोबुद्धि
र्निरीहेत निरिंद्रियः। निर्द्वंद्वो निर्नमस्कारो निःस्वधाकार एव च। निर्ममो निरहंकारो निर्योगक्षेम एव च। निराशीः सर्वभूतेषु निरासंगो निराश्रयः। सर्वज्ञः सर्वतो मुक्तो
मुच्यते नात्र संशयः। अपाणिपादपृष्ठं तमशिरस्कमनूदरं। प्रहीनगुणकर्माणं केवलं निर्मलं स्थिरं। अगंधमरसंस्पर्शमरूपाशब्दमेव च। अत्वगस्थ्यवरासक्त
ममांसमपि चैव ह। निश्चिंत्यमव्ययं नित्यं हृदिस्थमपि नित्यदा। सर्वभूतस्थमात्मानं ये न पश्यंति ते मृताः। न तत्र क्रमते बुद्धिर्नेंद्रियाणि न देवताः। वेदा यज्ञाश्च लोका ३२
श्च न तपो न पराक्रमः। यत्र ज्ञानवतां प्राप्तिरलिंगग्रहणा स्मृता। तस्मादलिंगो धर्मज्ञो धर्मव्रतमनुव्रतः। गूढधर्माश्रितो विद्वान्नज्ञातचरितं चरेत्। अमूढो मूढरूपेण

चरेद्धर्ममदूषयन्। यथैनमवमन्येरन्परे सततमेव हि। तथा वृत्तश्चरेच्छांतः सतां धर्मानकुत्सयन्। इत्येवं वृत्तसंपन्नः स मुनिः श्रेष्ठ उच्यते। इंद्रियाणींद्रियार्थाश्च म
हाभूतानि पंच च। मनो बुद्धिमहंकारमव्यक्तं पुरुषं तथा। सर्वमेतत्समाख्याय सम्यक्संत्यज्य निर्मलः। ततो मोक्षमवाप्नोति विमुक्तः सर्वबंधनैः। एतदेकांत
वेलायां परिज्ञाय नृपर्विदुः। ध्यायेदेकांतमास्थाय मुच्यतेथ निराश्रयः। विमुक्तः सर्वसंगेभ्यो वायुराकाशगो यथा। क्षीणकोषो निरातंकः प्राप्नोति परमं पदं। गुरु
शिष्यसंवादे॥ ब्रह्मोवाच॥ संन्यासं तप इत्याहुर्वृद्धा निश्चितदर्शिनः। ब्राह्मणा ब्रह्मयोनिस्था ज्ञानमेव परं विदुः। अतिदूरात्परं ब्रह्म वेदविद्याव्यपाश्रयं। निर्द्वं
द्वं निर्गुणं नित्यमचिंत्यं गुह्यमुत्तमं। ज्ञानेन तपसा चैव धीराः पश्यंति तत्पदं। निर्णिक्तमनसः पूता व्युत्क्रांतरजसोऽमलाः। तपसा क्षेममध्वानं गच्छंति परमैषिणः। सं
न्यासनिरता नित्यं ये ब्रह्मविदुषो जनाः। तपः प्रदीपमित्याहुराचारो धर्मलिंगकः। ज्ञानं त्वेव परं विद्धि संन्यासस्तप उत्तमं। यस्तु वेद निराबाधं ज्ञानतत्त्वविचिंतया।
सर्वभूतस्थमात्मानं स सर्वगतिरुच्यते। यो विद्वान्सहवासं च विवासं चैव पश्यति। तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते। यो न कामयते किंचिन्न किंचिदवमन्यते।
इति लोकस्थ एवैष ब्रह्मभूयाय कल्पते। प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित्। निर्ममो निरहंकारो मुच्यते नात्र संशयः। निर्द्वंद्वो निर्नमस्कारो निःस्वाहाकार ए
व च। निर्द्वंद्वो निर्नमस्कारो निःस्वाहाकार एव च। निर्गुणं नित्यमद्वंद्वं प्रशमेनैव गच्छति। हित्वा गुणमयं सर्वं कर्म जंतुः शुभाशुभं। उभे सत्यानृते त्यक्त्वा मुच्यते ना
त्र संशयः। अव्यक्तबीजप्रभवो बुद्धिस्कंधमहीरुहः। महाहंकारविटप इंद्रियांकुरकोटरः। महाभूतविशाखश्च विशेषप्रतिशाखवान्। सदापर्णः सदापुष्पः
शुभाशुभफलोदयः। आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। एवं छित्वा च भित्वा च तत्त्वज्ञानासिना बुधः। हित्वा संगमयान्पाशान्मृत्युजन्मजरोदयान्। निर्म
मो निरहंकारो मुच्यते नात्र संशयः। द्वावेव पक्षिणौ नित्यौ सखायौ चाप्यचेतनौ। एतयोन्यपरो यः स चेतनो नानिति स्मृतः। अचेतनः सत्वसंख्या विमुक्तः सत्वा यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केचिद्ब्रह्म... केचित्पुरुष...

अश्व

३३

त्परं चेतमानेंतरात्मा। सर्वेत्रवितसर्व संख्यातबुद्धिर्गुणातिगो मुच्यते सर्वपापैः॥ ॥ गुरुशिष्यसंवादे ४१ ॥ ब्रह्मोवाच ॥ केचिद्ब्रह्ममयं वृक्षं केचित्परमनामयं। म
न्यंते सर्वमप्येतदव्यक्तप्रभवाव्ययं। उच्छ्वासमात्रमपि चेदंतकाले समो भवेत्। आत्मानमुपसंगम्य सोमृतत्वाय कल्प्यते। निमेषमात्रमपि चेत्संयम्यात्मा
नमात्मनि। गच्छत्यात्मप्रसादेन विदुषां प्राप्यमव्ययं। प्राणायामैरथ प्राणान्संयम्य च पुनः पुनः। दशद्वादशभिर्वापि चतुर्विंशात्परं ततः। एवं पूर्वं प्रसन्ना
त्मा लभते यद्यदिच्छति। अव्यक्तात्सत्वमुद्रिक्तममृतत्वाय कल्प्यते। सत्वात्परतरं नान्यत्प्रशंसंतीह तद्विदः। अनुमानाद्विजानीमः पुरुषं सत्वसंश्रयं।
न शक्यमन्यथा गंतुं पुरुषं तमथो द्विजाः। क्षमा धृतिरहिंसा च समता सत्यमार्जवं। ज्ञानं योगो यसंन्यासः सात्विकं वृत्तमुच्यते। एतेनैवानुमानेन मन्यंते
थमनीषिणः। सत्वं च पुरुषश्चैकः तत्र नास्ति विचारणा। आहुरेवं च विद्वांसो ये ज्ञाने न प्रतिष्ठिताः। क्षेत्रज्ञसत्वयोरैक्यमित्येतन्नोपपद्यते। पृथग्भूतस्ततः
सत्वमित्येतत्त्वविचारितं। पृथग्भावश्च विज्ञेयः सहभावश्च तत्वतः। तथैवैकत्वनानात्वमिष्यते विदुषां नयः। मशकोदुंबरे चैक्यं पृथक्त्वमपि दृश्यते। मत्स्य
यथान्यः स्याद पृथक्संप्रयोगस्तथानयोः। संबंधस्तोयबिंदूनां पर्णे कोकनदस्य च॥ ॥ गुरुरुवाच॥ इत्युक्तवंतं विप्रास्ते तदा लोकपितामहं। पुनः संश
यमापन्नाः पप्रच्छुर्द्विजसत्तमाः॥ ॥ ऋषय ऊचुः॥ कोवाप्विदिह धर्माणामनुष्ठेयतमः स्मृतः। व्याहतामिव पश्यामो धर्मस्य विविधां गतिं। ऊर्ध्वं देहाद्वदंत्ये
के नैतदस्तीति चापरे। केचित्संशयितं सर्वं निःसंशयमथापरे। अनित्यं नित्यमित्येके नास्त्यस्तीत्यपि चापरे। एकरूपं द्विधेत्येके व्यामिश्रमिति चापरे। जटा
जिनधराश्चैके मुंडाः केचिच्च संवृताः। स्नानं केचिदिच्छंति स्नानमिच्छंति चापरे। आहारं केचिदिच्छंति केचिच्चानशने रताः। कर्म केचित्प्रशंसंति केचिद्भो
गं पृथग्विधं। धनानि केचिदिच्छंति निर्धनत्वमथापरे। उपास्यं साधनं त्वेके नेति चान्ये तथा जनाः। अहिंसानिरताः केचित्केचिद्धिंसापरायणाः। पुण्येन यश

न

३३

सेत्येके नैतदस्तीति चापरे। सद्भावनिरताश्चान्ये केचित्संशयिताः स्मृताः। दुःखादन्ये सुखादन्ये ध्यानमित्यपरे स्थिताः। यज्ञमित्यपरे धीराः प्रदानमिति चापरे। स
र्वमेके प्रशंसंति न सर्वमपरे जनाः। तपस्त्वन्ये प्रशंसंति स्वाध्यायमपरे जनाः। ज्ञानं संन्यासमित्येके स्वभावं भूतचिंतकाः। एवं व्युत्थापिते धर्मे बहुधा विप्रधाविते।
निश्चयं नाधिगच्छामः संमूढाः सुरसत्तम। इदं श्रेय इदं श्रेय इत्येवं व्युत्थितो जनः। यो हि यस्मिन्रतो धर्मे स तं पूजयते सदा। तत्र नो विहता प्रज्ञा मनश्च बहुली
कृतं। एतदाख्यातुमिच्छामः श्रेयः किमिति सत्तम। अतः परं च यद्गुह्यं तद्भवान्वक्तुमर्हति। सत्वक्षेत्रज्ञयोश्चैव संबंधः केन हेतुना। एवमुक्तः स तैर्विप्रैर्भगवा
न्लोकभावनः। तेभ्यः प्रसन्नो धर्मात्मा याथातथ्येन बुद्धिमान्॥ ॥ गुरुशिष्यसंवादे ४२ ॥ ब्रह्मोवाच ॥ हंत वः संप्रवक्ष्यामि याथातथ्येन सत्तमाः। गुरुणा शिष्यमा
साद्य यदुक्तं तन्निबोधत। समस्तमिह तच्छ्रुत्वा सम्यगेवोपधार्यतां। अहिंसा सर्वभूतानामेतत्कृत्यतमं महत्। एतत्पदमनुद्विग्नं वरिष्ठं धर्मलक्षणं। ज्ञानं निः
श्रेय इत्याहुर्वृद्धा निश्चयदर्शिनः। तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वपातकैः। हिंसापराश्च ये केचिद्ये च नास्तिकवृत्तयः। लोभमोहसमायुक्तास्ते वै निरयगामिनः।
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतंद्रिताः। यस्मिंल्लोके प्रमोदंते जायमानाः पुनः पुनः। कुर्वंति ये च कर्माणि श्रद्दधाना विपश्चितः। अनाशीर्योगसंयुक्तास्ते
धीराः साधुदर्शिनः। अतः परं प्रवक्ष्यामि सत्वक्षेत्रज्ञयोर्यथा। संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः। विषयो विषयित्वं च संबंधोयमिहोच्यते। विषयी पुरु
षो नित्यं सत्वं च विषयः स्मृतः। व्याख्यातं पूर्वकल्पेन मशकोदुंबरे यथा। भुज्यमानं न जानीते नित्यं सत्वमचेतनं। तत्र स्वेवं विजानीते यो भुंक्ते यश्च भुज्यते।
नित्यं द्वंद्वसमायुक्तं सत्वमाहुर्गुणात्मकं। निर्द्वंद्वो निष्कलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः। समः संज्ञागतस्त्वेवं यथा सर्वत्र दृश्यते। उपभुंक्ते सदा सत्वमपःपु
ष्करपर्णवत्। सर्वैरपि गुणैर्विद्वान्व्यतिषक्तो न लिप्यते। जलबिंदुर्यथा लोलः पद्मिनीपत्रसंस्थितः। एवमेवाप्यसंयुक्तः पुरुषः स्यान्न संशयः। द्रव्यमात्रम

ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
३४

भूतत्वं पुरुषस्येति निर्णयः॥ यथा द्रव्यं च कर्त्ता च संयोगोप्यनयोस्तथा॥ यथा प्रदीपमादाय कश्चित्तमसि तिष्ठति। तथा सत्वप्रदीपेन गच्छंति परमैषिणः॥ यावद्द्रव्य
गुणस्तावत्प्रदीपः संप्रकाशते। क्षीणद्रव्यगुणं ज्योतिरंतर्द्धानाय गच्छति। व्यक्तः सत्वगुणस्त्वेवं पुरुषोव्यक्त इष्यते। एतद्विप्रा विजानीत हंत भूयो ब्रवीमि ते। सह
स्रेणापि दुर्मेधा न बुद्धिमधिगच्छति। चतुर्थेनापि वांशेन बुद्धिमान्सुखमेधते। एवं धर्मस्य विज्ञेयं संसाधान्युपायतः। उपायज्ञो हि मेधावी सुखमत्यंतमश्नुते। य
थाध्वानमपाथेयः प्रपन्नो मानवः क्वचित्। क्लेशेन याति महता विनश्यत्यंतरापि वा। तथा कर्मसु विज्ञेयं फलं भवति वा न वा। पुरुषस्यात्मनिःश्रेयः शुभाशुभनिदर्शि
नं। यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते। अदृष्टपूर्वं सहसा तत्वदर्शनवर्जितः। तमेव च तथाध्वानं रथेनेहाशुगामिना। यायादश्वप्रयुक्तेन तथा बुद्धिमतां
गतिः। ऊर्द्ध्वं पर्वतमारुह्य नान्ववेक्षेत भूतलं। रथेन रथिनं पश्यन्क्लिश्यमानमचेतनं। यावद्रथपथस्तावद्रथेन स तु गच्छति। क्षीणे रथपथे प्राज्ञो रथमुत्सृज्य
गच्छति। एवं गच्छति मेधावी तत्वयोगविधानवित्। समाज्ञाय महाबुद्धिरुत्तरादुत्तरोत्तरं। यथा महार्णवं घोरमप्लवः संप्रगाहते। बाहुभ्यामेव संमोहाद्वधमृ
र्छत्यसंशयं। नावा चापि तथा प्राज्ञो विभागज्ञस्त्वरित्रवान्। अक्लांतः सलिलं गच्छेत्क्षिप्रं संतरति ध्रुवं। तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः॥ व्याख्यातं पू
र्वकल्पेन यथा रथपदातिनोः। स्नेहात्संमोहमापन्नो नाविनाशी यथा तथा। ममत्वेनाभिभूतः स तत्रैव परिवर्त्तते। नावं न शक्यमारुह्य स्थले विपरिवर्त्तितुं।
तथैव रथमारुह्य नाप्सु चर्य्या विधीयते। एवं कर्मकृतं चित्रं विषयस्थं पृथक्पृथक्। यथा कर्मकृतं लोके तथा तदुपपद्यते। यथैव गंधिनो रस्यं न रूपस्पर्शव
द्ववत्। मन्यंते मुनयो बुद्ध्या तत्प्रधानं प्रचक्षते। तत्र प्रधानमव्यक्तमव्यक्तस्य गुणो महान्। महाप्रधानभूतस्य गुणोहंकार एव च। अहंकारप्रधानस्य महाभू
तकृतो गुणः। पृथक्त्वेन च भूतानां विषया वै गुणाः स्मृताः। बीजधर्मं तथाव्यक्तं तथैव प्रसवात्मकं। बीजधर्मा महानात्मा प्रसव इति नः श्रुतं। बीजधर्मा त्व

३४

हंकारः प्रसवश्च पुनः पुनः। बीजप्रसवधर्माणि महाभूतानि पंच वै। बीजधर्मिणमित्याहुः प्रसवं च प्रकुर्वते। विशेषाः पंचभूतानि तेषां चित्तमशेषतः। तत्रैकगु
णमाकाशं द्विगुणो वायुरुच्यते। त्रिगुणं ज्योतिरित्याहुरापश्चापि चतुर्गुणाः। पृथ्वी पंचगुणा ज्ञेया द्रुमस्थावरसंकुला॥ सर्वभूतकरी देवी शुभाशुभनिदर्शिनी॥
शब्दः स्पर्शस्तथा रूपं रसो गंधश्च पंचमः॥ एते पंच गुणा भूम्या विज्ञेया द्विजसत्तमाः। पार्थिवश्च महागंधो गंधश्च बहुधा स्मृतः। तस्य गंधस्य वक्ष्यामि विस्तरेण
बहून्गुणान्। इष्टश्चानिष्टगंधश्च मधुरोम्लः कटुस्तथा॥ निर्हारी संहतः स्निग्धो रूक्षो विशद एव च। एवं दशविधो ज्ञेयः पार्थिवो गंध इत्युत। शब्दः स्पर्शस्तथा रू
पं रसश्चापां गुणाः स्मृताः। रसज्ञानं च वक्ष्यामि रसास्तु विविधाः स्मृताः। मधुरोम्लः कटुस्तिक्तः कषायो लवणस्तथा। एवं षड्विधविस्तारो रसो वारिमयस्तथा॥
शब्दः स्पर्शस्तथा रूपं त्रिगुणं ज्योतिरुच्यते। ज्योतिषश्च गुणो रूपं रूपं च बहुधा स्मृतं। शुक्लं कृष्णं तथा रक्तं नीलं पीतारुणं तथा। ह्रस्वं दीर्घं तथा स्थूलं चतुरस्रं
दिवृत्तवत्। एतद्द्वादशविस्तारं तेजसो रूपमुच्यते। विज्ञेयं ब्राह्मणैर्नित्यं धर्मज्ञैः सत्यवादिभिः। शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरुच्यते। वायोश्चापि गुणः
स्पर्शः स्पर्शश्च बहुधा स्मृतः। उष्णः शीतः सुखो दुःखं स्निग्धो विशद एव च। कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो दारुणो मृदुः। एवं द्वादशविस्तारो वायव्यो
गुण उच्यते। विधिवद्ब्राह्मणैः सिद्धैर्धर्मज्ञैस्तत्वदर्शिभिः॥ तत्रैकगुणमाकाशं शब्द इत्येव च स्मृतः॥ तस्य शब्दस्य वक्ष्यामि विस्तरेण गुणान्बहून्। षड्ज
ऋषभगांधारौ मध्यमः पंचमस्तथा। अतः परं तु विज्ञेयो निषादो धैवतस्तथा। इष्टश्चानिष्टशब्दश्च संहतः प्रविभागवान्। एवं दशविधो ज्ञेयः शब्द आकाश
संभवः। आकाशमुत्तमं भूतमहंकारस्ततः परः। अहंकारात्परा बुद्धिर्बुद्धेरात्मा तथा परः। तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः। परावरज्ञो भूतानां
[illegible]। विविक्तः सर्वकर्मणां। सर्वभूतात्मभूतात्मा गच्छत्यात्मानमक्षरं॥ गुरुशिष्यसंवादे॥ ब्रह्मोवाच॥ भूतानामथ पंचानां यथैषामीश्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रं मनः। विषये च विसर्गे च भूतानां मन उच्यते। अधिष्ठाता मनो नित्यं भूतानां महतां तथा। बुद्धिरैश्वर्यमाचष्टे क्षेत्रज्ञः स उच्यते। इंद्रियाणि मनो युंक्ते क्षेत्र-
ज्ञस्य स उच्यते। अधिष्ठाता मनो नित्यं सदश्वानिव सारथिः। इंद्रियाणि मनो बुद्धिः क्षेत्रज्ञे युंजते सदा। महाबुद्धिसमायुक्ते बुद्धिसंयमनं रथं। समारुह्य
स भूतात्मा समंतात्परिधावति। इंद्रियग्रामसंयुक्तो मनःसारथिरेव च। बुद्धिसंयमनो नित्यं महाब्रह्ममयो रथः। एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथं।
स धीरः सर्वभूतेषु न मोहमधिगच्छति। अव्यक्तादिविशेषांतं त्रसस्थावरसंकुलं। सूर्यचंद्रप्रभालोकं ग्रहनक्षत्रमंडितं॥ नदीपर्वतजालैश्च सर्वतः परिभूषि-
तं। विविधाभिस्तथैवाद्भिः सर्वतः समलंकृतं। आजीवः सर्वभूतानां सर्वप्राणवतां गतिः। एतद्ब्रह्मवनं नित्यं तस्मिंश्चरति क्षेत्रवित्। लोकेस्मिन्यानि भूतानि
स्थावराणि चराणि च। तान्येवाग्रे प्रलीयंते पश्चाद्भूतकृता गुणाः। गुणेभ्यः सर्वभूतानि एष भूतसमुच्छ्रयः। देवा मनुष्या गंधर्वाः पिशाचासुरराक्षसाः। सर्वे स्वभा-
वतः सृष्टा न क्रियाभ्यो न कारणात्॥ एते भूतकृतो विप्रा जायंतीह पुनः पुनः। तेभ्यः प्रसूतास्तेष्वेव महाभूतेषु पंचसु। प्रलीयंते यथाकालमूर्मयः सागरे यथा।
विश्वसृग्भ्यस्तु भूतेभ्यो महाभूता नियच्छति॥ एतेभ्यो वापि पंचभ्यो मुक्तो गच्छेत्परां गतिं। प्रजापतिरिदं सर्वं मनसैवासृजत्प्रभुः। तथैव देवानृषयस्तपसा प्र-
तिपेदिरे। तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा। त्रैलोक्यं तपसा सिद्धाः पश्यंतीह समाहिताः। औषधान्यगदादीनि नानाविद्याश्च सर्वशः। तपसैव प्रसिद्ध्यं-
ते तपोमूलं हि साधनं। यद्दुरापं दुराधर्षं दुराम्नायं दुरुत्सहं। तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमं। सुरापो ब्रह्महा स्तेयी भ्रूणहा गुरुतल्पगः। तपसैव सुतप्ते-
न मुच्यंते किल्बिषात्ततः। मनुष्याः पितरो देवाः पशवो मृगपक्षिणः। यानि चान्यानि भूतानि त्रसानि स्थावराणि च। तपःपरायणा नित्यं सिध्यंते तपसा सदा। तथै-
व तपसा देवा महात्मानो दिवं गताः। आशीर्युक्तानि कर्माणि कुर्वते ये त्वतंद्रिताः। अहंकारसमायुक्तास्ते सकाशे प्रजापतेः। ध्यानयोगेन सिद्धेन निर्ममा निर-

हंकृताः। प्राप्नुवंति महात्मानो महांतं लोकमुत्तमं। ध्यानयोगादुपागम्य प्रसन्नमनसः सदा। सुखोपचयमव्यक्तं प्रविशंत्यात्मचिंतया। ध्यानयोगादुपागम्य
निर्ममा निरहंकृताः। अव्यक्तं प्रविशंतीह महांतं लोकमुत्तमं। अव्यक्तादेव संभूताः सत्वसंख्यामागताः पुनः। रजस्तमोभ्यां निर्मुक्ताः सत्वमास्थाय केवलं। विमु-
क्ताः सर्वपापेभ्यः सर्वं त्यजति निष्कलः। क्षेत्रज्ञ इति तं विद्याद्यस्तं वेद स वेदवित्। चित्तं चित्तादुपागम्य मुनिरासी त संयतः। यच्चित्तं तन्मनो वश्यं गुण-
मेतत्सनातनं। अव्यक्तादिविशेषांतमविद्यालक्षणं स्मृतं। निबोधत तथा हीदं गुणैर्लक्षणमित्युत। द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतं। ममेति च
भवेन्मृत्युर्न ममेति च शाश्वतं। कर्म केचित्प्रशंसंति मंदबुद्धितरा नराः। ये तु वृद्धा महात्मानो न प्रशंसंति कर्म ते। कर्मणा जायते जंतुर्मूर्तिमान्षोडशात्म-
कः। पुरुषं ग्रसते नित्यं तद्ग्राह्यममृताशिनं। तस्मात्कर्मसु निःस्नेहा ये केचित्पारदर्शिनः। विद्यामयोयं पुरुषो न तु कर्ममयः स्मृतः। अपूर्वममृतं नित्यं य ए-
वमविचारिणां। य एवं विंदते त्मानमग्राह्यममृताशिनं। अग्राह्योमृतो भा ति स एभिः कारणैर्ध्रुवः। अपोह्य सर्वसंकल्पान्संयम्यात्मानमात्मनि। स
तद्ब्रह्म शुभं वेत्ति यस्माद्भूयो न जायते। प्रसादेनैव सत्वस्य प्रसादमिदमाप्नुयात्। लक्षणं हि प्रसन्नस्य यथा स्वप्नः प्रदर्शनं। गतिः परैषा मुक्तानां ये ज्ञानपरि-
निष्ठिताः। प्रवृत्तयश्च याः सर्वाः पश्यंति परिणामजाः। एषा गतिरसक्तानामेष धर्मः सनातनः। एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिंदितं। समेन सर्वभूतेषु निस्पृ-
हेन निराशिषा। शक्या गतिरियं गंतुं सर्वत्र समदर्शिना॥ एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः। एवमाचरत क्षिप्रं ततः सिद्धिमवाप्स्यथ॥ गुरुरुवाच।
इत्युक्तास्ते तु मुनयो ब्रह्मणा गुरुणा तथा। कृतवंतो महात्मानस्ततो लोकमवाप्नुयुः। त्वमप्येतन्महाभाग यथोक्तं ब्रह्मणो वचः। सम्यगाचर धर्मात्मंस्त-
तः सिद्धिमवाप्स्यसि॥ वासुदेव उवाच। इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमं॥ चकार सर्वं कौंतेय ततो मोक्षमवाप्तवान्। कृतकृत्यः स तु तदा शिष्यः कु-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचख्युः सत्कृमिस्सेव पार्थापामिंगतेऽजसे। ततो रथमास्थाय प्रयातौ तौ कृष्णपांडवौ। विदुरं प्रणतौ कृष्णौ [illegible] ७

अ.ध.

३६

रुकुलोद्वह॥ तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति॥ अर्जुन उवाच॥ कोऽयं सौत्रामणः कृष्ण कस्य शिष्यो महायशाः। श्रोतव्यं चेन्मयैतद्धि तत्त्वमाचक्ष्व मेऽवि
भो॥ वासुदेव उवाच॥ अहं गुरुर्महाबाहो मनःशिष्यं च विद्धि मे। त्वत्प्रीत्या गुह्यमेतच्च कथितं ते धनंजय। मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह। अध्या
त्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत। ततस्त्वं सम्यगाचीर्णे धर्मेऽस्मिन्कुरुनंदन। सर्वपापविशुद्धात्मा मोक्षं प्राप्स्यसि केवलं। पूर्वमप्येतदेवोक्तं युद्धकाल उप
स्थिते। मया तव महाबाहो तस्मादत्र मनः कुरु। मया तु भरतश्रेष्ठ चिरदृष्टः पितामहः। तमहं द्रष्टुमिच्छामि संमते तव फाल्गुन॥ वैशं॥ इत्युक्तवचनं कृ
ष्णं प्रत्युवाच धनंजयः। गच्छावो नगरं कृष्ण गजसाह्वयमद्य वै। समेत्य तत्र राजानं धर्मात्मानं युधिष्ठिरं। समनुज्ञाप्य दुर्द्धर्ष स्वां पुरीं गंतुमर्हसि॥ इत्या
श्वमेधिके गुरुशिष्यसंवादः समाप्तः॥ वैशं॥ ततोऽभ्ययोजयत्कृष्णो युज्यतामिति दारुकं। मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः॥ तथैव चानुयात्राणि
चोदयामास पांडवः। सज्जयध्वं प्रयास्यामो नगरं नागसाह्वयं। इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशांपते। रथस्थं तु महातेजा वासुदेवं धनंजयः। पुनरेवा
ब्रवीद्वाक्यमिदं भरतसत्तम। त्वत्प्रसादाज्जयः प्राप्तो राज्ञा वृष्णिकुलोद्वह। निहताः शत्रवश्चैव प्राप्तं राज्यमकंटकं। नाथवंतश्च भवता पांडवा मधुसूदन। भ
वंतं प्लवमासाद्य तीर्णाः स्म कुरुसागरं। विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वभावन। यथाहं त्वाभिजानामि यथा चाहं भवन्मनाः। त्वत्तेजःसंभवो नित्यं हुता
त्मा मधुसूदन। वंतं प्लवमासाद्य तीर्णाः [illegible] गरं। विश्वक[illegible]र्मन्नमस्ते[illegible] विश्वा[illegible] यथाहं त्वाभिजानामि यथा चाहं भवन्मनाः। त्वत्तेजःसं
वो नित्यं हुता[illegible] मधुसूदन। रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो॥ त्वयि विश्वामते विश्वं यदिदं स्थाणुजंगमं। त्वं हि सर्वं विकुरुषे भूतग्रामं सनातनं। पृथि
वीं चांतरिक्षं च तथा स्थावरजंगमं। हसितं तेऽमलाज्योत्स्ना ह्यृतवश्चेंद्रियाणि च। प्राणो वायुः सततगः क्रोधो मृत्युः सनातनः। प्रसादे चापि पद्मा श्रीर्नित्यं त्वयि म

३६

विदुरं च महाबुद्धिं राजानं च युधिष्ठिरं। ७

ने.२

वै

हामते रतिस्तुष्टिर्धृतिः क्षांतिस्त्वयि चेदं चराचरं। त्वमेवेह युगांतेषु निधनं प्रोच्यसेऽनघ। सुदीर्घेणापि कालेन न ते शक्या महागुणाः। आत्मा च परमात्मा च नमस्तेन
लिनेक्षण। विदितो मे सुदुर्द्धर्ष नारदाद्देवलात्तथा। कृष्णद्वैपायनाच्चैव तथा कुरुपितामहात्। त्वयि सर्वं समायत्तं त्वमेको नरेश्वरः। एतदनुग्रहसंयुक्तमेतदुक्तं त्वया
नघ। एतत्सर्वमहं सम्यगाचरिष्ये जनार्दन। इदं चाद्भुतमत्यर्थं कृतमस्मत्प्रियेप्सया। यत्पापो निहतः संख्ये कौरव्यो धृतराष्ट्रजः। त्वया दग्धं हि तत्सैन्यं त्वया विजि
तमाहवे। भवता तत्कृतं कर्म येनावाप्तो जयो मया। दुर्योधनस्य संग्रामे तव बुद्धिपराक्रमैः। कर्णस्य च वधोपायो यथावत्संप्रदर्शितः। सैंधवस्य च पापस्य भूरिश्र

भ

वस एव च। अहं चैव प्रीयमाणेन त्वया देवकिनंदन। यदुक्तं तत्करिष्यामि न हि मेऽत्र विचारणा। राजानं च समासाद्य धर्मात्मानं युधिष्ठिरं। चोदयिष्यामि धर्मज्ञ गम
नार्थं तवानघ। रुचितं हि ममैतत्ते द्वारकागमनं प्रति। अचिराच्चैव दृष्टा त्वं मातुलं मधुसूदन। बलदेवं च दुर्द्धर्षं तथान्यान्वृष्णिपुंगवान्। एवं संभाषमाणौ तौ प्रा
प्तौ वारणसाह्वयं। तथा विविशतुश्चोभौ संप्रहृष्टनराकुलं। तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमं। ददृशाते महाराजं धृतराष्ट्रं नरेश्वरं। भीमसेनं च दुर्द्धर्षं मा
द्रीपुत्रौ च पांडवौ। धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितं। गांधारीं च महाप्राज्ञां पृथां कृष्णां च भारत। सुभद्राद्याश्च ताः सर्वा भरतानां स्त्रियस्तथा। ददृशाते स्त्रि
यः सर्वा गांधारीपरिचार्य वै। ततः समेत्य राजानं धृतराष्ट्रमरिंदमं। निवेद्य नामधेयं च तस्य पादाववंदतां। गांधार्याश्च पृथायाश्च धर्मराजस्य चैव हि। भीमस्य च
महाबाहो तथा पादाववंदतां। क्षत्तारं चैव संपूज्य पृष्ट्वा कुशलमव्ययं। तैः सार्द्धं नृपतिं वृद्धं ततस्तं पर्युपासतां। ततो निशि महाबाहो धृतराष्ट्रः कुरूद्वहान्।
जनार्दनं च मेधावी व्यसर्जयत स्वान्गृहान्। तेऽनुज्ञाता नृपतिना ययुः स्वं स्वं निवेशनं। धनंजयगृहानेव ययौ कृष्णस्तु वीर्यवान्। तत्रार्चितो यथान्यायं सर्वका
मैरुपस्थितः। कृष्णः सुष्वाप मेधावी धनंजयसहायवान्। प्रभातायां तु शर्वर्यां कृतपूर्वाह्णिकक्रियौ। धर्मराजस्य भवनं जग्मतुः परमार्चितौ। यत्रास्ते स महाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व०
३७
रू

त्योधर्मराजो युधिष्ठिरः॥ ततस्तौ तत्प्रतिकृत्य दहशाते महाबलौ। धर्मराजं समासीनं देवराजमिवाश्विनौ। तौ समासाद्य राजानं वार्ष्णेयकुरुपुंगवौ। निषीद
तुरनुज्ञातौ प्रीयमाणेन तेन तौ। ततः स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ। प्रोवाच वदतां श्रेष्ठो वचनं राजसत्तमः॥ ॥ युधिष्ठिर उ०॥ विवक्षू हि युवां मन्ये
वीरौ यदुकुरूद्वहौ। ब्रूतं कर्ताऽस्मि सर्वं वां न चिरान्मा विचार्यताम्। इत्युक्तः फाल्गुनस्तत्र धर्मराजानमब्रवीत्। विनीतवदुपागम्य वाक्यं वाक्यविशारदः। अयं
चिरोषितो राजन्वासुदेवः प्रतापवान्। भवंतं समनुज्ञाप्य पितरं द्रष्टुमिच्छति। स गच्छेदभ्यनुज्ञातो द्वारकां यदि मन्यसे। आनर्त्तनगरीं वीरस्तमनुज्ञातुमर्हसि
॥ युधिष्ठिर उ०॥ पुंडरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन। पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं प्रभो। रोचते मे महाबाहो गमनं तव केशव। मातुलश्चिरदृष्टो मे त्व
या देवी च देवकी। मातुलं वसुदेवं त्वं बलदेवं च माधव। पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः। स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम्। फाल्गुनं नकुलं
चैव सहदेवं च माधव। आनर्त्तान्वलोक्य त्वं पितरं च महाभुज। इहागच्छेः पुनरागच्छ हयमेधं ममानघ। स गच्छ रत्नान्यादाय विविधानि वसूनि च। यच्चाप्यन्यन्म
नोज्ञं ते तदप्यादत्स्व सात्वत। इयं हि वसुधा सर्वा प्रसादात्तव माधव। अस्मानुपगता वीर निहताश्चापि शत्रवः। एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे। वासु
देवो वरः पुंसामिदं वचनमब्रवीत्। तवैव रत्नानि धनं च केवलं धरा च कृत्स्ना तु महाभुजाद्य वै। यदस्ति चान्यद्द्रविणं गृहे मम त्वमेव तस्येश्वर नित्यमीश्वर। त
तस्तथोक्तः प्रतिपूजितस्तदा गदाग्रजो धर्मसुतेन वीर्यवान्। पितृष्वसामभ्यवदद्यथाविधि संपूजितश्चाप्यगमत्प्रदक्षिणम्। तया स सम्यक्प्रतिनंदितस्ततस्
तथैव सर्वैर्विदुरादिभिस्तथा। विनिर्ययौ नागपुराद्गदाग्रजो रथेन दिव्येन चतुर्भुजः प्रभुः। रथं सुभद्रामधिरोप्य भाविनीं युधिष्ठिरस्यानुमते जनार्दनः। पि
तृष्वसुश्चापि महाभुजस्तदा विनिर्ययौ पौरजनाभिसंवृतः। तमन्वयाद्वानरवर्यकेतनः ससात्यकिर्माद्रवतीसुतावपि। अगाधबुद्धिर्विदुरश्च माधवं स्वयं च

जनेश्वर।४
३७

नू
भीमो गजराजविक्रमः। निवर्त्तयित्वा कुरुराजवर्द्धनांस्ततः स सर्वान्विदुरं च वीर्यवान्। जनार्दनो दारुकमाह सत्वरः प्रचोदयाश्वानिति सात्यकिं तदा। ततो
ययौ शत्रुगणावमर्द्दनः शिनिप्रवीरानुगतो जनार्दनः। यथा निहत्यारिगणाञ्छतक्रतुर्दिवं तथानर्त्तपुरीं प्रतापवान्॥ ॥ इत्याश्वमेधिके॥ वैशम्
त० ॥ तयोः प्रयांतौ वार्ष्णेयं द्वारकां भरतर्षभाः। परिष्वज्य न्यवर्त्तंत सानुयात्राः परंतपाः॥ पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फाल्गुनः। आ च क्षुर्विषयाच्चैनं ददर्श
स पुनः पुनः। कृच्छ्रेणैव तथा पार्थो गोविंदे विनिवेशितां। संजहार तदा दृष्टिं कृष्णश्चाप्यपराजितः। तस्य प्रयाणे यान्यासन्निमित्तानि पुनः पुनः। बहून्यद्भुत
रूपाणि तानि मे गदतः शृणु। वायुर्वेगेन महता रथस्य पुरतो ववौ। कुर्वन्निःशर्करं मार्गं विरजस्कमकंटकम्। ववर्ष वासवश्चापि तोयं शुचि सुगंधि च।
दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्वनः। स प्रयातो महाबाहुः समेषु मरुधन्वसु। ददर्शाथ मुनिश्रेष्ठमुत्तंकममितौजसम्। स तं संपूज्य तेजस्वी मुनिं पृ
थुललोचनम्। पूजितस्तेन च तथा पर्यपृच्छदनामयम्। स पृष्टः कुशलं तेन संपूज्य मधुसूदनम्। उत्तंको ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवम्। कच्चिच्छौरे त्वया गत्वा कु
रुपांडवसद्म तत्। कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि। अपि संधाय तान्वीरानुपावृत्तोऽसि केशव। संबंधिनः स्वदयितान्सततं वृष्णिपुंगव। कच्चि
त्पांडुसुताः पंच धृतराष्ट्रस्य चात्मजाः। लोकेषु विहरिष्यंति त्वया सह परंतप। स्वराष्ट्रेषु च राजानः कच्चित्प्राप्स्यंति वै सुखम्। कौरवेषु प्रशांतेषु त्वया नाथेन
माधव। या मे संभावना तात त्वयि नित्यमवर्त्तत। अपि सा सफला कृष्ण कृता ते भरतान्प्रति॥ ॥ वासुदेव उवाच ॥ कृतो यत्नो मया ब्रह्मन्सौभ्रात्रे कौरवा
न्प्रति। नाशक्यंत यदा साम्ये ते स्थापयितुमंजसा। ततस्ते निधनं प्राप्ताः सर्वे ससुतबांधवाः। न दिष्टमप्यतिक्रांतुं शक्यं बुद्ध्या बलेन वा। महर्षे विदितं नूनं सर्वमेतत्तवानघ। तेऽत्यक्रामन्मतिं मह्यं भीष्मस्य विदुरस्य च। ततो यमक्षयं जग्मुः समासाद्येतरेतरम्। पंच वै पांडवाः शिष्टा हतमित्रा हतात्मजाः। धार्तराष्ट्राश्च निहताः सर्वे ससुतबांधवाः। इत्युक्तवति कृष्णे तु उत्तंकः क्रोधमूर्च्छितः। उत्तंकः प्रत्युवाचैनं रो
षादुत्फुल्ललोचनः॥ ॥ उत्तंक उवाच ॥ यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपुंगवाः। संबंधिनः प्रियास्तस्माच्छप्स्येऽहं त्वां न संशयः। न च ते प्रसभं यस्मात्ते नि गृह्य

या२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृणु मे विस्तरेणेदं यद्वक्ष्ये द्विजसत्तम। ५

अश्व. ३८

निवारिताः॥ तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन। त्वया शक्तेन महता मिथ्याचारेण माधव। उपचीर्णाः कुरुश्रेष्ठा नश्यंतः समुपेक्षिताः॥ वासुदेव उवाच॥
शृणु मे विस्तरेणेदं यद्वक्ष्ये द्विजपुंगव। गृहाणानुनयं चापि तपस्वी ह्यसि भार्गव। श्रुत्वा तमेतदध्यात्मं मुंचेथाः शापमद्य वै। न च मां तपसाल्पेन शक्तोऽभिभवितुं
पुमान्। न च ते तपसो नाशमिच्छामि जयतां वर। तपस्ते सुमहद्दीप्तं गुरवश्चापि तोषिताः। कौमारं ब्रह्मचर्यं ते जानामि [illegible]
[illegible] द्विजसत्तम। दुःखार्जितस्य तपसस्तस्मान्नेच्छामि तेऽव्ययं॥ उत्तंकोपाख्याने॥ उत्तंक उवाच॥ ब्रूहि केशव तत्त्वेन त्वमध्यात्ममनिंदितम्। श्रुत्वा
श्रेयो विधास्यामि शापं वा ते जनार्दन॥ वासुदेव उवाच॥ तमोरजश्च सत्वं च विद्धि भावान्मदाश्रयान्। तथा रुद्रान्वसूंश्चापि विद्धि मत्प्रभवान्द्विज। मयि सर्वाणि
भूतानि सर्वभूतेषु चाप्यहं। स्थित इत्यभिजानीहि मा तेऽभूदत्र संशयः॥ तथा दैत्यगणान्सर्वान्यक्षगंधर्वराक्षसान्। नागानप्सरसश्चैव विद्धि मत्प्रभवान्द्वि
ज। [illegible]हं। सदसच्चैव यत्प्राहुरव्यक्तं व्यक्तमेव च। अक्षरं च क्षरं चैव सर्वमेतन्मदात्मकं। ये चाश्रमेषु वै धर्माश्चतुर्षु विहिता मुने
दैवानि चैव कर्माणि विद्धि सर्वं मदात्मकं। असच्च सदसच्चैव यद्विश्वं सदसत्परं। ततः परं नास्ति चैव देवदेवात्सनातनात्॥ ॐकारप्रमुखान्वेदान्विद्धि मां त्वं भृगूद्व
ह। यूपं होमं चरुं सोमं त्रिदशाप्यायनं मखे। होतारमपि हव्यं च विद्धि मां भृगुनंदन। अध्वर्युः कल्पकश्चापि हविः परमसंस्कृतं। उद्गाता चापि मां स्तौति गीतिघो
षैर्महाध्वरे। प्रायश्चित्तेषु मां ब्रह्मन्शांतिमंगलवाचकाः। स्तुवंति विश्वकर्माणं सततं द्विजसत्तमाः। विद्धि मां च तं धर्ममजरं द्विजसत्तम। मानसं दयितं विप्रस
र्वभूतदयात्मकं। तत्राहं वर्तमानैश्च निवृत्तैश्चैव मानवैः। बह्वीः संसरमाणो वै योनीर्वर्तामि सत्तम। धर्मसंरक्षणार्थाय धर्मसंस्थापनाय च। तैस्तैर्वेशैश्च रू
पैश्च त्रिषु लोकेषु भार्गव। अहं विष्णुरहं ब्रह्मा शक्रोऽथ प्रभवाप्ययः। भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च। अधर्मे वर्तमानानां सर्वेषां महमच्युतः। धर्मस्य से

३८

तुर्बध्नामि चलिते चलिते युगे। तां तां योनिं प्रविश्याहं प्रजानां हितकाम्यया। यदा त्वहं देवयोनौ वर्तामि भृगुनंदन। तदाहं देववत्सर्वमाचरामि न संशयः। यदा गंध
र्वयोनौ वा वर्तामि भृगुनंदन। तदाहं देववत्सर्वमाचरामि न संशयः। यदा गांधर्वयोनौ वा वर्तामि भृगुनंदन। तदा गंधर्ववच्चेष्टाः सर्वाश्चेष्टामि भार्गव। नागयोनौ त
दा चैव तदा वर्तामि नागवत्। यक्षराक्षसयोन्योस्तु यथावद्विचराम्यहं। मानुषे वर्तमाने तु कृपणं याचिता मया। न च ते जातसंदेहा वचो गृह्णंति मे हितं। भयं च मह
दुद्दिश्य त्रासिताः कुरवो मया। क्रुद्धेन भूत्वा च पुनर्यथावदनुदर्शिताः। ते धर्मेणाहसंयुक्ताः परीताः केन कर्म्मणा। धर्मेण निहता युद्धे गताः स्वर्गं न संशयः।
लोकेषु पांडवाश्चैव गताः ख्यातिं द्विजोत्तम। एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि॥ उत्तंकोपाख्याने॥ उत्तंक उवाच॥ अभिजानामि जगतः कर्तारं त्वां
जनार्दन। नूनं भवत्प्रसादोऽयमिति मे नास्ति संशयः। चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत। विनिवृत्तश्च मे शाप इति विद्धि परंतप। यदि त्वनुग्रहं कंचित्त्वत्तोऽर्हामि
जनार्दन। द्रष्टुमिच्छामि ते रूपमैश्वरं तद्विदर्शय॥ वैशं॥ ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः। शाश्वतं वैष्णवं धीमान्ददृशे यद्धनंजयः। स ददर्श महात्मा
नं विश्वरूपं महाभुजं। सहस्रसूर्यप्रतिमं दीप्तिमत्पावकोपमं। सर्वमाकाशमावृत्य तिष्ठंतं विश्वतोमुखं। तद्दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमुत्तमं। विस्मयं च ययौ वि
प्रस्तद्दृष्ट्वा रूपमैश्वरं॥ उत्तंक उवाच॥ विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसंभव। पद्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः। द्यावापृथिव्योर्यन्मध्यं जठरेण
तदावृतं। भुजाभ्यामावृताश्चाशास्त्वमिदं सर्वमच्युत। संहरस्व पुनर्देव रूपमक्षय्यमुत्तमं। पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतं॥ वैशं॥ तमुवाच प्रसन्ना
त्मा गोविंदो जनमेजय। वरं वृणीष्वेति तदा तमुत्तंकोऽब्रवीदिदं। पर्याप्त एष एवाद्य वरस्त्वत्तो महाद्युते। यत्ते रूपमिदं कृष्ण पश्यामि प्रभवात्ययं। तमब्रवी
त्पुनः कृष्णो मा त्वमत्र विचारय। अवश्यमेतत्कर्तव्यममोघं दर्शनं मम॥ उत्तंक उवाच॥ अवश्यं करणीयं वै यद्येतन्मन्यसे विभो। तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि रा

घ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
३९

दुर्लभं ॥ ततः प्रहृत्य तत्तेजः प्रोवाचोत्तंकमीश्वरः । गच्छन्मे मतिचिंत्योऽहमित्युक्त्वा द्वारकां ययौ ॥ ततः कदाचिद्भगवानुत्तंकस्तोयकांक्षया । तृषितः परिचक्राम
मरौ स स्मार चाच्युतं ॥ ततो दिग्वाससं धीमान्मातंगं मलपंकिलं । अपश्यत मरौ तस्मिन्श्वयूथपरिवारितं ॥ भीषणं बद्धनिस्त्रिंशं बाणकार्मुकधारिणं ॥ तस्या
धः स्रोतसोऽपश्यद्वारि भूरि द्विजोत्तमः ॥ स्मरन्नेव च तं प्राह मातंगः प्रहसन्निव । एह्युत्तंक प्रतीच्छस्व मत्तो वारि भृगूद्वह ॥ कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाहृ
तं ॥ इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनंदत । चिक्षेप च स तं धीमान्वाग्भिरुग्राभिरच्युत ॥ पुनः पुनश्च मातंगः पिबस्वेति तमब्रवीत् । न चापिबत्स सक्रोधः क्षुभि
तेनांतरात्मना ॥ तथा हि निश्चयात्तेन प्रत्याख्यातो महात्मना । श्वभिः सह महाराज तत्रैवांतरधीयत ॥ उत्तंकस्तं तथा दृष्ट्वा ततो व्रीडितमानसः ॥ मेने प्रलब्ध
मात्मानं कृष्णेनामित्रघातिना ॥ अथ तेनैव मार्गेण शंखचक्रगदाधरः । आजगाम महाबाहुरुत्तंकश्चैनमब्रवीत् ॥ न युक्तं तादृशं दातुं त्वया पुरुषसत्तम ॥ स
लिलं विप्रमुख्येभ्यो मातंगस्रोतसा विभो ॥ इत्युक्तवचनं धीमान्महाबुद्धिर्जनार्दनः । उत्तंकं श्लक्ष्णया वाचा सांत्वयन्निदमब्रवीत् ॥ यादृशेनेह रूपेण योग्यं
दातुं वृतेन वै । तादृशं खलु ते दत्तं तच्च त्वं नाववुध्यसे ॥ मया त्वदर्थमुक्तो हि वज्रपाणिः पुरंदरः । उत्तंकायामृतं देहि तोयरूपमिति प्रभो ॥ स मामुवाच देवेंद्रो न म
र्त्योऽमर्त्यतां व्रजेत् । अन्यमस्मै वरं देहीत्यसकृद्भृगुनंदन ॥ अमृतं देहि विप्रायमयोक्तः स शचीपतिः ॥ स मां प्रसाद्य देवेंद्रः पुनरेवेदमब्रवीत् ॥ यदि देयमवश्यं वै मा
तंगोऽहं महाद्युते । भूत्वामृतं प्रदास्यामि भार्गवाय महात्मने ॥ यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै । प्रदातुमेष गच्छामि भार्गवायामृतं प्रभो ॥ प्रत्याख्यातस्त्वहं
तेन न दास्यामि कथंचन ॥ स तथा समयं कृत्वा तेन रूपेण वासवः ॥ उपस्थितस्त्वया चापि प्रत्याख्यातोऽमृतं ददत् ॥ चंडालरूपी भगवान्सुमहांस्ते व्यतिक्रमः ॥ यत्तु
शक्यं मया कर्तुं भूय एव तवेप्सितं । तोयेप्सां तव दुर्धर्षां करिष्ये सफलामहं ॥ येष्वहःसु तव ब्रह्मन्सलिलेच्छा भविष्यति । तदा मरौ भविष्यंति जलपूर्णाः पयोधराः ॥

ह

३९

रसवर्षप्रदास्यंति ते तोयं भृगुनंदन ॥ उत्तंकमेवमाहेत्युक्त्वा ख्यातिं यास्यंति चापि ते ॥ इत्युक्तः प्रीतिमान्विप्रः कृष्णेन स बभूव ह । अद्याप्युत्तंकमेघाख्या मरौ वर्षंति भा
रत ॥ ॥ उत्तंकोपाख्याने ॥ जनमेजय उवाच ॥ उत्तंकः केन तपसा संयुक्तः सुमहातपाः । यः शापं दातुकामोऽभूद्विष्णवे प्रभविष्णवे ॥ वैशं० ॥ उत्तंको महता युक्त
स्तेजसा जनमेजय । गुरुभक्तः स तेजस्वी नान्यत्किंचिदपूजयत् ॥ सर्वेषामृषिपुत्राणामेष चासीन्मनोरथः । औत्तंकीं गुरुवृत्तिं वै प्राप्नुयामिति भारत ॥ गौतमस्य तु
शिष्याणां बहूनां जनमेजय । उत्तंकेऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा ॥ स तस्य दमशौचाभ्यां विक्रांतेन च कर्मणा । सम्यक्चैवोपचारेण गौतमः प्रीतिमानभूत् ॥
अथ शिष्यसहस्राणि समनुज्ञाय गौतमः । उत्तंकं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत ॥ तं क्रमेण जरा तात प्रतिपेदे महामुनिं । न चान्वबुध्यत तदा स मुनिर्गुरुवत्स
लः ॥ ततः कदाचिद्राजेंद्र काष्ठान्यानयितुं ययौ । उत्तंकः काष्ठभारं च महांतं समुपानयत् ॥ स तु भाराभिभूतात्मा काष्ठभारमरिंदम । निष्पिपेष क्षितौ राजन्परि
श्रांतो बुभुक्षितः ॥ तस्य काष्ठे विलग्नाभूज्जटा रूप्यसमप्रभा ॥ ततः काष्ठैः सह तदा पपात धरणीतले ॥ ततः स भारनिष्पिष्टः क्षुधाविष्टश्च भार्गवः ॥ दृष्ट्वा तां वयसो
ऽवस्थां रुरोदार्तस्वरं तदा ॥ ततो गुरुसुता तस्य पद्मपत्रनिभेक्षणा । जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना ॥ पितुर्नियोगाद्धर्मज्ञा शिरसावनता तदा ॥ तस्या नि
पेततुर्दग्धौ करौ तैरश्रुबिंदुभिः ॥ न हि तानश्रुपातांस्तान्शक्ता धारयितुं मही ॥ गौतमस्त्वब्रवीद्विप्रमुत्तंकं प्रीतमानसः ॥ कस्मात्तात तवाद्येह शोकोत्तरमिदं म
नः ॥ स त्वं ब्रूहि विप्रर्षे श्रोतुमिच्छामि तत्त्वतः ॥ ॥ उत्तंक उवाच ॥ भवद्गतेन मनसा भवत्प्रियचिकीर्षया ॥ भवद्भक्तिगतेनेह भवद्भावानुगेन च ॥ जरा चेनावबु
द्धेयं नाभिज्ञातं सुखं मया ॥ शतवर्षोषितं मां हि न त्वमभ्यनुजानिथाः ॥ भवता ह्यभ्यनुज्ञाताः शिष्याः प्रत्यवरा मया ॥ उपपन्ना द्विजश्रेष्ठ शतशोऽथ सहस्रशः ॥ गौतम उ० ॥
त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव । व्यतिक्रामन्महा[कालो] नावबुद्धो द्विजर्षभ ॥ किं तु यद्यद्य ते श्रद्धा गमनं प्रति भार्गव । अनुज्ञां प्रतिगृह्य त्वं स्वगृहान्गच्छ

ळो

उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
४०

माविशं॥ उतंक उवाच॥ गुर्वर्थं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम तमपाकृत्य गच्छेयमनुज्ञातस्त्वया विभो॥ गौतम उवाच॥ दक्षिणापरितोषो वै गुरूणां सद्भिरुच्य
ते तव ह्याचरतो ब्रह्मंस्तुष्टोऽहं वै न संशयः इत्थं च परितुष्टं मां विजानीहि भृगूद्वह युवा षोडशवर्षो हि यद्योऽद्य भविता भवान् ददामि पत्नीं कन्यां च स्वां ते दुहितरं
द्विज। एतामृते नाङ्गना त्वामन्या त्वत्तेजोऽर्हति सेवितुं ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीं। गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत्। किं भवत्यै प्रयच्छामि
गुर्वर्थं विनियुंक्ष्व मां। प्रियं हि तव कांक्षामि प्राणैरपि धनैरपि। यद्दुर्लभं हि लोकेऽस्मिन्रत्नमत्यद्भुतं महत्। तदानयेयं तपसा न हि मेऽस्त्यत्र संशयः॥ अहल्योवा
च॥ परितुष्टास्मि ते विप्र नित्यं भक्त्या तवानघ। पर्याप्तमेतद्भद्रं ते गच्छ तात यथेच्छकं॥ वैशं॥ उतंकस्तु महाराज पुनरेवाब्रवीद्वचः। आज्ञापयस्व मां मातः क
र्तव्यं च तव प्रियं॥ अहल्योवाच॥ सौदासपत्नी विधृते दिव्ये वै मणिकुंडले। ते समानय भद्रं ते गुर्वर्थः सुकृतो भवेत्। स तथेति प्रतिश्रुत्य जगाम जनमेजय।
गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा। स जगाम ततः शीघ्रमुतंको ब्राह्मणर्षभः। सौदासं पुरुषादं वै भिक्षितुं मणिकुंडले। गौतमस्त्वब्रवीत्पत्नीमुतंको ना
द्य दृश्यते। इति पृष्टा तमाचष्ट कुंडलार्थं गतं च सा। ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतं। शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति॥ अहल्योवाच॥ अ
जानंत्या नियुक्तः स भगवन्ब्राह्मणो मया। भवत्प्रसादान्न भयं किंचित्तस्य भविष्यति। इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः। उतंकोऽपि वने शून्ये राजानं दद
र्श ह॥ उतंकोपाख्याने॥ वैशं॥ स तं दृष्ट्वा गुणश्रेष्ठो राजानं घोरदर्शनं। दीर्घश्मश्रुधरं नृणां शोणितेन समुक्षितं। चकार न व्यथां विप्रो राजा त्वेनमथाब्र
वीत्। प्रत्युत्थाय महातेजा भयकर्त्ता यमोपमः। दिष्ट्या त्वमसि कल्याण षष्ठे काले ममांतिकं। भक्ष्यं मृगयमाणस्य संप्राप्तो द्विजसत्तम॥ उतंक उवाच॥
राजन्गुर्वर्थिनं विद्धि चरंतं मामिहागतं। न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः॥ राजोवाच॥ षष्ठे काले ममाहारो विहितो द्विजसत्तम। न च शक्यः समुत्स्रष्टुं

४०

१५५॥

क्षुधितेन मयाद्य वै॥ उतंक उवाच॥ एवमस्तु महाराज समयः क्रियतां तु मे। गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशं। संश्रुतश्च मया योऽर्थो गुरवे राजसत्तम॥
त्वदधीनः स राजेंद्र भिक्षे त्वां नरेश्वर। ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि नित्यदा। दाता त्वं च नरश्रेष्ठ पात्रभूतः क्षिताविह। पात्रं प्रतिग्रहे चापि विद्धि मां नृप
सत्तम। उपाहृत्य गुरोरर्थं त्वदायत्तमरिंदम। समयेनेह राजेंद्र पुनरेष्यामि ते वशं। सत्यं ते प्रतिजानामि नात्र मिथ्या कथंचन। अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कु
तोऽन्यथा॥ सौदास उवाच॥ यदि मत्तस्त्वदायत्तो गुर्वर्थः कृत एव सः। यदि चास्मि प्रतिग्राह्यः सांप्रतं तद्ब्रवीहि मे॥ उतंक उवाच॥ प्रतिग्राह्यो मतो मे त्वं सदैव पु
रुषर्षभ। सोऽहं त्वामनुसंप्राप्तो भिक्षितुं मणिकुंडले॥ सौदास उवाच॥ पत्न्यास्ते मम विप्रर्षे रुचिरे मणिकुंडले। वरयस्वान्यमेवैनं सा ते दास्यति सुव्रत॥
उतंक उवाच॥ न व्यपदेशेन प्रमाणं यदि ते वयं। प्रयच्छ कुंडले मे त्वं सत्यवाग्भव पार्थिव॥ वैशं॥ इत्युक्तस्त्वब्रवीद्राजा तमुतंकं वचः पुनः। गच्छ मद्
वचनाद्देवीं ब्रूहि देहीति सत्तम। सैवमुक्ता त्वया नूनं मद्वाक्येन शुचिस्मिता। प्रदास्यति द्विजश्रेष्ठ कुंडले ते न संशयः॥ उतंक उवाच॥ क्व पत्नी भवतः शक्या
मया द्रष्टुं नरेश्वर। स्वयं वापि भवान्पत्नीं किमर्थं नोपसर्पति॥ सौदास उवाच॥ द्रक्ष्यति त्वं भवानद्य कस्मिंश्चिद्वनिर्झरे। षष्ठे काले न मे हि या न श
क्या द्रष्टुमद्य वै॥ वैशं॥ उतंकस्तु तथोक्तः स जगाम भरतर्षभ। मदयंतीं च दृष्ट्वा सो ज्ञापयत्स्वं प्रयोजनं। सौदासवचनं श्रुत्वा ततः सा पृथुलोचना।
प्रत्युवाच महाबुद्धिमुतंकं जनमेजय। एवमेतन्महाभाग नानृतं वदसेऽनघ। अभिज्ञानं तु किंचित्त्वं समानयितुमर्हसि। इमे हि दिव्ये मणिकुंडले मे देवा
श्च यक्षाश्च महोरगाश्च। तैस्तैरुपायैरपहर्तुकामाश्छिद्रेषु नित्यं परितर्कयंति। निक्षिप्तमेतद्भुवि पन्नगास्तु रत्नं समासाद्य परामृषेयुः। यक्षास्तथोच्छिष्ट
धृतं सुराश्च निद्रावशाद्वापि परिधर्षयेयुः। छिद्रेष्वेतेषु ये नित्यं क्रियते द्विजसत्तम। देवराक्षसनागानामप्रमत्तेन धार्यते। स्यंदते हि दिवा रत्नं रात्रौ च द्विजस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
४१
५८

त्तमा। नक्षत्रग्रहताराणां प्रभामाक्षिप्य वर्त्तते। एते ह्यामुच्य भगवन् क्षुत्पिपासाभयं कुतः॥ विषाग्निश्वापदेभ्यश्च भयं जातु न विद्यते। ह्रस्वेन चैते आमुक्ते भ
वतो ह्रस्वके तदा। अनुरूपेण चामुक्ते तत्प्रमाणे हि जायतां। एवंविधे ममैते वै कुंडले परमार्चिते। त्रिषु लोकेषु विज्ञाते तदभिज्ञानमानय॥ उत्तंक उपा
नो॥ वैशं॥ स मित्रसहमासाद्य त्वभिज्ञानमयाचत। तस्मै ददावभिज्ञानं स चेक्ष्वाकुवरस्तथा॥ सौदास उवाच॥ न चैवैषा गतिः क्षेम्या न चान्या विद्यते ग
तिः॥ एतन्मे मतमाज्ञाय प्रयच्छ मणिकुंडले। इत्युक्तस्तामुत्तंकस्तु भर्तुर्वाक्यमथाब्रवीत्। श्रुत्वा वचस्तदा प्रादात्तस्मै मणिकुंडले। [illegible]
[illegible] मयाब्रवीत्। [illegible]॥ अवाप्य कुंडले ते तु राजानं पुनरब्रवीत्। किमेतद्गुह्यवचनं श्रोतुमिच्छामि पार्थिव॥ सौ
दास उवाच॥ प्रजानिसर्गाद्विप्रान्वै क्षत्रियाः पूजयंति हि। विप्रेभ्यश्चापि बहवो दोषाः प्रादुर्भवंति च। सोऽहं द्विजेभ्यः प्रणतो विप्राद्दोषमवाप्तवान्। गतिम
न्यां न पश्यामि दमयंतीसहायवान्। न चान्यामपि पश्यामि गतिं गतिमतां वर। स्वर्गद्वारस्य गमने स्थाने च द्विजसत्तम। न हि राज्ञा विशेषेण विरुद्धेषु द्विजाति
षु। शक्यं नृलोके स्थातुं वै प्रेत्य वा सुखमेधितुं। न हीप्सिते मयैते ते ददाम्यहं स्वमणिकुंडले॥ उत्तंक उवाच॥ राजन्स्वस्येह कर्तास्मि पुनरेष्यामि ते वशं। प्रश्नं च
कंचित्प्रष्टुं त्वां निवृत्तोस्मि परंतप॥ सौदास उ॥ ब्रूहि विप्र यथाकामं प्रतिवक्तास्मि ते वचः। छेत्तास्मि संशयं ते ते न मेऽत्रास्ति विचारणा। यः कृतस्तेह समयः
सफलं तं कुरुष्व मे। उत्तंक उ॥ प्राहुर्वाक्संगतं मित्रं धर्मनैपुणदर्शिनः। मित्रेषु यश्च विषयस्तेन मित्र्येव तं विदुः। स भवान्मित्रतामेत्य संप्राप्तो मम पार्थिव।
स मे बुद्धिं प्रयच्छस्व संमतां पुरुषर्षभ। अवाप्तार्थोऽयमद्येह भवांश्च पुरुषादकः। भवत्सकाशं गंतुं क्षमं मम न वेति वै॥ सौदास उवाच॥ [illegible]
[illegible] स्मिते वचः। छेत्तास्मि [illegible] विचारणा। यः कृतस्तेह समयः सफलं तं कुरुष्व मे। उत्तंक उवाच॥ प्राहुर्वाक्संगतं मित्रं धर्म

४१

न

र्य

नैपुणदर्शिनः। मित्रेषु यश्च विषयस्तेन मित्र्येव तं विदुः। स भवान्मित्रतामेत्य संप्राप्तो मम पार्थिव। स मे बुद्धिं प्रयच्छस्व संमतां पुरुषर्षभ। अवाप्तार्थोऽयमद्येह
भवांश्च पुरुषादकः। भवत्सकाशं गंतुं क्षमं मम न वेति वै॥ सौदास उ॥ क्षमं चेदिह वक्तव्यं मया द्विजवरोत्तम। मत्समीपं द्विजश्रेष्ठ नागंतव्यं कथंचन। एवं त
व प्रपश्यामि श्रेयो भृगुकुलोद्वह। आगच्छतो हि ते विप्र भवेन्मृत्युर्न संशयः॥ वैशं॥ इत्युक्तः स तदा राज्ञा क्षमं बुद्धिमता हितं। अनुज्ञाप्य महाराज महल्यां
प्रति जग्मिवान्। गृहीत्वा कुंडले दिव्ये गुरुपत्न्याः प्रियंकरः। जवेन महता प्रायाद्गौतमस्याश्रमं प्रति। यथा तयो रक्षणं वै मदयंत्याभिभाषितं। तथा ते कुंडले
बध्वा तथा कृष्णाजिनेन तु। स कस्मिंश्चित्क्षुधाविष्टः फलभारसमन्वितं। बिल्वं ददर्श विप्रर्षिरारुरोह ततस्ततं। शाखामासज्य तच्चैव कृष्णाजिनमरिं
दम। पातयामास बिल्वानि तदा स द्विजपुंगवः। अथ पातयमानस्य बिल्वापहृतचेतसः। न्यपतंस्तानि बिल्वानि तस्मिन्नेवाजिने विभो। यस्मिंस्ते कुंडले बि
द्धे तदा द्विजवरेण वै। बिल्वप्रहारैस्तस्याथ व्यशीर्यद्बंधनं ततः। सकुंडलं तदजिनं पपात सहसा तरोः। विशीर्णबंधने तस्मिन्गते कृष्णाजिने महीं। अपश्यद्भुज
गः कश्चित्ते तत्र मणिकुंडले। ऐरावतकुलोद्भूतः शीघ्रो भूत्वा तदा हि सः। विदश्यास्येन वल्मीकं विवेशाथ स कुंडले। ह्रियमाणे तु दृष्ट्वा स कुंडले भुज
गेन वै। पपात वृक्षात्सोद्वेगो दुःखात्परमकोपनः। स दंडकाष्ठमादाय वल्मीकमखनत्तदा। अहानि त्रिंशदव्यग्रः पंच चान्यानि भारत। क्रोधामर्षाभिसं
तप्तस्तदा ब्राह्मणसत्तमः। तस्य वेगमसह्यं तमसहंती वसुंधरा। दंडकाष्ठाभिभिन्नांगी चचाल भृशमातुरा। ततः खनत एवाथ विप्रर्षेर्धरणीतलं। नागलोक
स्य पंथानं कर्तुकामस्य निश्चयात्। रथेन हरियुक्तेन तं देशमुपजग्मिवान्। वज्रपाणिर्महातेजा ददर्श च द्विजोत्तमं॥ वैशं॥ स तु तं ब्राह्मणो भूत्वा तस्य दुःखे
न दुःखितः। उत्तंकमब्रवीत्तात नैतच्छक्यं त्वयेति वै। इतो हि नागलोको वै योजनानि सहस्रशः। न दंडकाष्ठसाध्यं च मन्ये कार्यमिदं तव॥ उत्तंक उवाच॥ नागलो

र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णा

अश्व· ४२

केयदिव्रस्तस्तु नशकोस्कुंडले मया। धाक्षं प्राँव्रिमो ह्यामिषश्यतस्ते द्विजोत्तम ॥ वैशं ॥ यदा स नाशकत्तस्य निश्चयं कर्दमव्यथा। वज्रपाणिस्तदा दंडं वज्राख्येणयु
जोयह। ततो वज्रप्रहारैस्तैर्दार्य्यमाणा वसुंधरा। नागलोकस्य पंथानमकरोज्जनमेजय। स तेन मार्गेण तदा नागलोकं विवेश ह। ददर्श नागलोकं च योजन
निसहस्रशः। प्राकारनिचयैर्दिव्यैर्मणिमुक्तास्वलंकृतैः। उपपन्नं महाभाग शातकुंभमयैस्तदा। वापीः स्फटिकसोपाना नदीश्च विमलोदकाः। ददर्श वृक्षांश्च
सुबहून्नानाद्विजगणायुतान्। तस्य लोकस्य च द्वारं ददर्श स भृगूद्वहः। पंचयोजनविस्तारमायतं शतयोजनं। नागलोकमुत्तंकः प्रेक्ष्य दीनोभवत्तदा
निराशश्चाभवत्तत्र कुंडलाहरणे पुनः। तत्र प्रोवाच तुरगस्तं कृष्णः श्वेतवालधिः। ताम्रास्यनेत्रः कौरव्य प्रज्वलन्निव तेजसा। धमस्वापानमेतन्मे ततस्त्वं वि
प्रलप्स्यते। ऐरावतसुतेनेह तवानीते हि कुंडले। मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथंचन। त्वयैतद्धि समाचीर्णं गौतमस्याश्रमे तदा॥ उत्तंक उवाच॥
कथं भवंतं जानीयामुपाध्यायाश्रमं प्रति। जन्मयाचीर्णपूर्वं च श्रोतुमिच्छामि तत्त्वतः॥ अश्व उवाच॥ गुरोर्गुरुं मां जानीहि ज्वलनं जातवेदसं। त्वया ह्यहं स
दा विप्र गुरोरर्थे विपूजितः। विधिवत्सततं विप्र शुचिना भृगुनंदन। तस्माच्छ्रेयो विधास्यामि तवैवं कुरु मा चिरं। इत्युक्तस्तु तदाकार्षीदुत्तंकश्चित्रभानुना।
धूतार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया। ततोस्य रोमकूपेभ्यो धमतस्तत्र भारत। धूमः प्रादुरभूद्भीमो नागलोकभयावहः। तेन धूमेन महता वर्द्धमानेन
भारत। नागलोके महाराज न प्राज्ञायत किंचन। हाहाभूतमभूत्सर्वमैरावतनिवेशनं। वासुकिप्रमुखानां च नागानां जनमेजय। न प्राकाशंत वेश्मानि धूमरुद्धा
नि भारत। नीहारसंवृतानीव वनानि गिरयस्तथा। ते धूमरक्तनयना वह्नितेजोभितापिताः। आजग्मुर्निश्चयं ज्ञातुं भार्गवस्य महात्मनः। श्रुत्वा च निश्चयं तस्य
महर्षेरतितेजसः। संभ्रांतनयनाः सर्वे पूजां चक्रुर्यथाविधि। सर्वे प्रांजलयो नागा वृद्धबालपुरोगमाः। शिरोभिः प्रणिपत्योचुः प्रसीद भगवन्निति। प्रसाद्य ब्रा

वस

त स्या

४२

|| समाप्तं || ॥ ५७

ह्मणं ते तु पाद्यमर्घ्यं निवेद्य च। प्रायच्छन्कुंडले दिव्ये पन्नगाः परमार्चिते। ततः संपूजितो नागैस्तदोत्तंकः प्रतापवान्। अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म
तत्। स गत्वा त्वरितो राजन्गौतमस्य निवेशनं। प्रायच्छत्कुंडले दिव्ये गुरुपत्न्यास्तदानघ। एवं महात्मना तेन त्रीन्लोकाञ्जनमेजय। परिक्रम्याहृते दिव्ये तत
स्ते मणिकुंडले। एवं प्रभावः स मुनिरुत्तंको भरतर्षभ। परेण तपसा युक्तो यस्मात्त्वं परिपृच्छसि॥ उत्तंकोपाख्यानं॥ जनमेजय उवाच॥ उत्तंकस्य वरं द
त्वा गोविंदो द्विजसत्तम। अत ऊर्द्ध्वं महाबाहुः किं चकार महायशाः॥ वैशं॥ दत्वा वरमुत्तंकाय प्रायात्सात्यकिना सह। द्वारकामेव गोविंदः शीघ्रवे
गैर्महाहयैः। सरांसि सरितश्चैव वनानि च गिरींस्तथा। अतिक्रम्याससादाथ रम्यां द्वारवतीं पुरीं। वर्त्तमाने महाराज गिरौ रैवतके तथा। उपायात्सुंडरीकाक्षो
युयुधानानुगस्तथा। अलंकृतस्तु स गिरिर्नानारूपविचित्रितैः। बभौ रत्नमयैः कोशैः संवृतः पुरुषर्षभ। कांचनस्रग्भिरग्र्याभिः सुमनोभिस्तथैव च। वासोभि
श्च महाशैलः कल्पवृक्षैश्च सर्वशः। दीपवृक्षैश्च सौवर्णैरलीढ्णपुपशोभितः। गुहानिर्झरदेशेषु दिवाभूतो बभूव ह। पताकाभिर्विचित्राभिः सघंटाभिः स
मंततः। पुंभिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत्। अतीव प्रेक्षणीयोभून्मेरुर्मुनिगणैरिव। मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत। गायतां पर्वतें
द्रस्य दिवस्पृगिव निस्वनः। प्रमत्तमत्तसंमत्तक्ष्वेडितोत्कृष्टसंकुलः। तथा किलकिलाशब्दैर्भूधरोभून्मनोहरः। विपणापणवान्रम्यो भक्ष्यभोज्यविहा
रवान्। वस्त्रमाल्योत्करयुतो वीणावेणुमृदंगवान्। सुरामैरेयमिश्रेण भक्ष्यभोज्येन चैव ह। दीनांधकृपणादिभ्यो दीयमानेन चानिशं। बभौ परमकल्याणो
महस्तस्य महागिरेः। पुण्यावसथवान्वीर पुण्यकृद्भिर्निषेवितः। विहारो वृष्णिवीराणां महे रैवतकस्य च। स नगो वेश्मसंकीर्णो देवलोक इवाबभौ। तदा च
कृष्णसांनिध्यमासाद्य भरतर्षभ। शक्रसद्मप्रतीकाशो बभूव स हि शैलराट्। ततः संपूज्यमानः स विवेश भवनं शुभं। गोविंदः सात्यकिश्चैव जगाम भवनं स्वकं।

ते

वे

नृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेश च प्रहृष्टात्मा चिरकालप्रवासकः॥ कृत्वा नमस्कारं कर्म्मदानं वै च शिववासव॥ उपायातं तु वार्ष्णेयं भोजवृष्ण्यंधकास्तथा॥ अभ्यगच्छन्महात्मानं देवा इव शतक्रतुं॥ मतानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा॥ अभ्यवादयत प्रीतः पितरं मातरं तथा॥ ताभ्यां स संपरिष्वक्तः सांत्वितश्च महाभुजः॥ उपोपविष्टः सर्वैस्तैर्वृष्णिभिः परिवारितः॥ स विश्रांतो महातेजाः कृतपादावनेजनः॥ कथयामास तत्सर्वं पृष्टः पित्रा महाहवं॥ ॥ अश्वमेधिके ॥ व सुदेवउवाच ॥ श्रुतवानस्मि वार्ष्णेय संग्रामं परमाद्भुतं॥ नराणां वदतां पुत्र कथोद्यातेषु नित्यशः॥ त्वं तु प्रत्यक्षदर्शी च कार्यज्ञश्च महाभुज॥ तस्मात्प्रब्रूहि संग्रामं याथातथ्येनमेनघ॥ यथा तदभवद्युद्धं पांडवानां महात्मनां॥ भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमं॥ अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः॥ नानावेशाकृतिमतां नानादेशनिवासिनां॥ ॥ वैशं ॥ इत्युक्तः पुंडरीकाक्षः पित्रा मातुस्तदंतिके॥ शशंस कुरुवीराणां संग्रामे निधनं यथा॥ ॥ वासुदेवउवाच ॥ अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनां॥ बहुलत्वान्न संख्यातुं शक्यान्यब्दशतैरपि॥ प्राधान्यतस्तु गदतः समासेनैव मे शृणु॥ कर्माणि पृथिवीशानां यथावदमरद्युते॥ भीष्मः सेनापतिरभूदेकादशचमूपतिः॥ कौरव्यः कौरवेंद्राणां देवानामिव वासवः॥ शिखंडी पांडुपुत्राणां नेता सप्तचमूपतिः॥ बभूव रक्षितो धीमान्श्रीमता सव्यसाचिना॥ तेषां तदभवद्युद्धं दशाहानि महात्मनां॥ कुरूणां पांडवानां च सुमहल्लोमहर्षणं॥ ततः शिखंडी गांगेयं युध्यमानं महाहवे॥ जघान बहुभिर्वाणैः सह गांडीवधन्वना॥ अकरोत्स ततः कालं शरतल्पगतो मुनिः॥ अयनं दक्षिणं हित्वा उत्तरायणकांक्षया॥ ततः सेनापतिरभूद्द्रोणोऽस्त्रविदुषां वरः॥ प्रवीरः कौरवेंद्रस्य काव्यो दैत्यपतेरिव॥ अक्षौहिणीभिः शिष्टाभिर्नवभिर्द्विजसत्तमः॥ संवृतः समरश्लाघी गुप्तः कृपवृषादिभिः॥ धृष्टद्युम्नस्त्वभून्नेता पांडवानां महास्त्रवित्॥ गुप्तो भीमेन तेजस्वी मित्रेण वरुणो यथा॥ स तु सेनापरिवृतो द्रोणप्रेप्सुर्महामनाः॥ पितुर्निकारान्संस्मृत्य रणे कर्म्माकरोन्महत्॥

तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसंगरे॥ नानादेशगता वीराः प्रायशो निधनं गताः॥ दिनानि पंच तद्युद्धमभूत्परमदारुणं॥ ततो द्रोणः परिश्रांतो धृष्टद्युम्नवशं गतः॥ ततः सेनापतिरभूत्कर्णो दौर्योधने बले॥ अक्षौहिणीभिः शिष्टाभिर्वृतः पंचभिराहवे॥ तिस्रस्तु पांडुपुत्राणां चमूर्बीभत्सुपालिताः॥ हतप्रवीरभूयिष्ठा बभूवुः समवस्थिताः॥ ततः पार्थं समासाद्य पतंग इव पावकं॥ पंचत्वमगमत्सौतिर्द्वितीयेऽहनि दारुणः॥ हते कर्णे तु कौरव्या निरुत्साहा हतौजसः॥ अक्षौहिणीभिस्तिसृभिर्मद्रेशं पर्यवारयन्॥ हतवाहनभूयिष्ठाः पांडवापि युधिष्ठिरं॥ अक्षौहिणा निरुत्साहाः शिष्टया पर्यवारयन्॥ अवधीन्मद्रराजानं कुरुराजो युधिष्ठिरः॥ तस्मिंस्तथार्द्धदिवसे कृत्वा कर्म्म सुदुष्करं॥ हते शल्ये तु शकुनिं सहदेवो महामनाः॥ आहर्त्तारं कलेस्तस्य जघानामितविक्रमः॥ निहते शकुनौ राजा धार्त्तराष्ट्रः सुदुर्म्मनाः॥ अपाक्रमद्गदापाणिर्हतभूयिष्ठसैनिकः॥ तमन्वधावत्संक्रुद्धो भीमसेनः प्रतापवान्॥ ह्रदे द्वैपायने चापि सलिलस्थं ददर्श तं॥ हतशिष्टेन सैन्येन समंतात्परिवार्य तं॥ अथोपविविशुर्हृष्टा ह्रदस्थं पंच पांडवाः॥ विगाह्य सलिलं त्वाशु वाग्बाणैर्भृशविक्षतः॥ उत्थाय स गदापाणिर्युद्धाय समुपस्थितः॥ ततः स निहतो राजा धार्त्तराष्ट्रो महामृधे॥ भीमसेनेन विक्रम्य पश्यतां पृथिवीक्षितां॥ ततस्तु पांडवं सैन्यं प्रसुप्तं शिबिरे निशि॥ निहतं द्रोणपुत्रेण पितुर्वधममृष्यता॥ हतपुत्रा हतबला हतमित्रा मया सह॥ युयुधानद्वितीयेन पंच शिष्टाश्च पांडवाः॥ सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत॥ युयुत्सुश्चापि कौरव्यो मुक्तः पांडवसंश्रयात्॥ निहते कौरवेंद्रे तु सानुबंधे सुयोधने॥ विदुरः संजयश्चैव धर्मराजमुपस्थितौ॥ एवं तदभवद्युद्धमहान्यष्टादश प्रभो॥ यत्र ते पृथिवीपाला निहताः स्वर्गमावसन्॥ ॥ वैशं ॥ शृण्वतां तु महाराज कथां तां रोमहर्षणीं॥ दुःखशोकपरीक्लेशा वृष्णीनामभवंस्तदा॥ ॥ इत्याश्वमेधिके ॥ वैशं ॥ कथयन्नेव तु तदा वासुदेवः प्रतापवान्॥ महाभारतयुद्धं तत्कथांते पितुरग्रतः॥ अभिमन्योर्वधं वीरः सोऽत्यक्रामन्महामतिः॥ अप्रियं वसुदेवस्य मा भूदिति जनार्द्दनः॥ मा दौहित्रवधं श्रुत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॰ष्व॰
४४

वसुदेवो महात्ययं ॥ दुःखशोकाभिसंतप्तो भवेदिति महामतिः ॥ सुभद्रा तु तमुत्क्रान्तमात्मजस्य वधं रणे । आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भुवि । तामपश्यन्नि
पतितां वसुदेवश्च क्षितौ तदा । दृष्ट्वैव च पपातोर्व्यां सोऽपि दुःखेन मूर्छितः । ततः स दौहित्रवधदुःखशोकसमाहतः । वसुदेवो महाराज कृष्णं वाक्यमथाब्रवी
त् ॥ ननु त्वं पुण्डरीकाक्ष सत्यवाग्भुवि विश्रुतः । यद्दौहित्रवधं मेऽद्य नाख्यापयसि शत्रुहन् । तद्भागिनेयनिधनं तत्त्वेनाचक्ष्व मे प्रभो । सदृशाक्षस्तव कथं शत्रुभि
र्निहतो रणे । दुर्मरं तव वार्ष्णेय काले प्राप्ते नृभिः सदा । यत्र मे हृदयं दुःखाच्छतधा न विदीर्यते । किमब्रवीत्त्वां संग्रामे सुभद्रां मातरं प्रति । मां चापि पुण्डरीकाक्ष
चपलाक्षः प्रियो मम । आहवं पृष्ठतः कृत्वा कच्चिन्न निहतः परैः । कच्चिन्मुखं न गोविन्द तेनाजौ विकृतं कृतं । स हि कृष्ण महातेजाः श्लाघन्निव ममाग्रतः । बालभा
वेन विनयमात्मनोऽकथयत्प्रभुः । कच्चिन्न विसृष्टो बालो द्रोणकर्णकृपादिभिः । धरण्यां निहतः शेते तन्ममाचक्ष्व केशव । स हि द्रोणं च भीष्मं च कर्णं च रथि
नां वरं । स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम । एवंविधं बहु तदा विलपन्तं सुदुःखितं । पितरं दुःखिततरो गोविन्दो वाक्यमब्रवीत् । न तेन विकृतं वक्त्रं कृतं संग्रा
ममूर्द्धनि ॥ न पृष्ठतः कृतश्चापि संग्रामस्तेन दुस्तरः । निहत्य पृथिवीपालान्सहस्रशतसंघशः । खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः । एको ह्येकेन सततं
युध्यमानो युधि प्रभो । न स शक्येत संग्रामे निहन्तुमपि वज्रिणा । समाहूते तु संग्रामे पार्थे संसप्तकैस्तदा । पर्यवार्यत सं
क्रुद्धैः स द्रोणादिभी रणे । ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे पितः । दौहित्रस्तव वार्ष्णेय दौःशासनिवशं गतः । नूनं च स गतः स्वर्गं जहि शोकं महामते । न हि
व्यसनमासाद्य सीदन्ति कृतबुद्धयः । द्रोणकर्णप्रभृतयो येन प्रतिसमाहिताः । रणे महेन्द्रप्रतिमाः स कथं नाप्नुयाद्दिवं । स शोकं जहि दुर्धर्ष मा च मन्युवशं गमः ॥ ४४
शस्त्रपूतां हि स गतिं गतः परपुरंजयः । तस्मिंस्तु निहते वीरे सुभद्रेयं स्वसा मम । दुःखार्ताथो पृथां प्राप्य कुररीव ननाद ह । द्रौपदीं च समासाद्य पर्यपृच्छत दुःखिता ।

आर्ये क्व दारकाः सर्वे द्रष्टुमिच्छामि तानहं । अस्याः श्रुत्वा वचनं सर्वास्ताः कुरुयोषितः । भुजाभ्यां परिगृह्यैतां चुक्रुशुः परमार्तवत् । उत्तरां चाब्रवीद्भद्रे भर्ता स क्व नु ते
गतः । क्षिप्रमागमनं मह्यं तस्मै त्वं विनिवेदय । ननु नाम स वैराटि श्रुत्वा मम गिरं पुरा । भवनान्निष्पतत्याशु कस्मान्नाभ्येति ते पतिः । अभिमन्यो कुशलिनो मातु
लास्ते महारथाः । कुशलं चाब्रुवन्सर्वे त्वां युयुत्सुमिहागतं । आचक्ष्व मेऽद्य संग्रामं यथापूर्वमरिंदम । कस्मादेवं विलपतीं नाद्येह प्रतिभाषसे । एवमादि तु वार्ष्णे
य्यास्तस्यास्तत्परिदेवितं । श्रुत्वा पृथा सुदुःखार्ता शनैर्वाक्यमथाब्रवीत् । सुभद्रे वासुदेवेन तथा सात्यकिना रणे । पित्रा च लालितो बालः स हतः कालध
र्मणा । ईदृशो मर्त्यधर्मोऽयं मा शुचो यदुनन्दिनि । पुत्रो हि तव दुर्धर्षः संप्राप्तः परमां गतिं । कुले जातासि महति क्षत्रियाणां महात्मनां । मा शुचश्चपलाक्षं त्वं प
द्मपत्रनिभेक्षणे । उत्तरां त्वमवेक्षस्व गुर्विणीं मा शुचः शुभे । पुत्रमेषा हि तस्याशु जनयिष्यति भामिनी । एवमाश्वासयित्वैनां कुन्ती यदुकुलोद्वह । विहाय शो
कं दुर्धर्षं श्राद्धमस्य ह्यकल्पयत् । समनुज्ञाप्य धर्मज्ञा राजानं भीममेव च । यमौ यमोपमौ चैव ददौ दानान्यनेकशः । ततः प्रदाय बह्वीर्गा ब्राह्मणेभ्यो यदूद्वह
समाहृष्यत वार्ष्णेयी वैराटीमब्रवीदिदं । वैराटि नेह संतापस्त्वया कार्यो यशस्विनि । भर्तारं प्रति सुश्रोणि गर्भस्थं रक्ष मे शिशुं । एवमुक्त्वा ततः कुन्ती विर
राम महाद्युते । तामनुज्ञाप्य चैवेमां सुभद्रां समुपानयं । एवं स निधनं प्राप्तो दौहित्रस्तव मानद । संतापं त्यज दुर्धर्ष मा च शोके मनः कृथाः ॥ इत्याश्वमेधिके
पर्वणि ॥ विंशं ॥ एतच्छ्रुत्वा तु पुत्रस्य वचः शूरात्मजस्तदा । विहाय शोकं धर्मात्मा ददौ श्राद्धमनुत्तमं । तथैव वसुदेवोऽपि स्वस्रीयस्य महात्मनः । दयितस्य
पितुर्नित्यमकरोदौर्ध्वदेहिकं । षष्टिं शतसहस्राणि ब्राह्मणानां महौजसां । विधिवद्भोजयामास भोज्यं सर्वगुणान्वितं । आच्छाद्य च महाबाहुर्धनतृष्णाम
पानुदत् । ब्राह्मणानां तदा कृष्ण समभूद्रोमहर्षणं । सुवर्णं चैव गाश्चैव शयनाच्छादनं तथा । दीयमानं तदा विप्राः प्रवृद्धमिति चाब्रुवन् । वासुदेवोऽथ दाशार्हो ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वदेवः समाप्तकिशश्च अभिमन्योस्तदाश्वाद्भुमकुर्वन्न सत्यकस्तथा [illegible] विप्राः प्रस्तामिति वासुदेवो यदा शार्ङ्गी अतीवदुःखसंतप्ता नशमं चोपले
भिरे। तथैव पांडवा वीरा नगरे नागसाह्वये। नोपागच्छंत वै शांतिमभिमन्युं विना कृताः॥ सुबहूनि च राजेंद्र दिवसानि विराटजा। नाभुंक्त पतिदुःखार्त्ता तदभूत्करु
णं महत्। कुक्षिस्थ एव तस्याथ गर्भो वै संप्रमीयते। आजगाम ततो व्यासो ज्ञात्वा दिव्येन चक्षुषा। समागम्याब्रवीद्धीमान् पृथां पृथुललोचनां। उत्तरां च महातेजाः
शोकः संत्यज्यतामयं। जनिष्यति महातेजाः पुत्रस्तव यशस्विनि। प्रभावाद्वासुदेवस्य मम व्याहरणादपि। पांडवानामयं चांते पालयिष्यति मेदिनीं। धनंजयं च
संप्रेक्ष्य धर्मराजस्य शृण्वतः। व्यासो वाक्यमुवाचेदं हर्षयन्निव भारत। पौत्रस्तव महाभागो जनिष्यति महामनाः। पृथ्वीं सागरपर्यंतां पालयिष्यति चैव ह। त
स्माच्छोकं कुरुश्रेष्ठ जहि त्वमरिकर्षण। विचार्यमत्र न हि ते सत्यमेतद्भविष्यति। यच्चापि वृष्णिवीरेण कृष्णेन कुरुनंदन। पुरोक्तं तत्तथा भावि मा तेत्रास्तु विचार
णा। विबुधानां गतो लोकानक्षयानात्मनिर्जितान्। न स शोच्यस्त्वया वीर न चान्यैः कुरुभिस्तथा। एवं पितामहेनोक्तो धर्मात्मा स धनंजयः। त्यक्त्वा शोकं महाराज
हृष्टरूपोऽभवत्तदा। पितापि तव धर्मज्ञ गर्भे तस्मिन्महामते। अवर्द्धत यथाकालं शुक्लपक्षे यथा शशी। ततः संचोदयामास व्यासो धर्मात्मजं नृपं। अश्वमेधं प्रति त
दा ततः सोंतर्हितोऽभवत्। धर्मराजोपि मेधावी श्रुत्वा व्यासस्य तद्वचः। वित्तस्यानयने तात चकार गमने मतिं॥ ॥ इत्याश्वमेधिके ६१ ॥ जनमेजय उ० ॥ श्रुत्वैतद्वचनं
ब्रह्मन् व्यासेनोक्तं महात्मना। अश्वमेधं प्रति तदा किं भूयः प्रचकार ह। रत्नं च यन्मरुत्तेन निहितं वसुधातले। तदवाप कथं चेति तन्मे ब्रूहि द्विजोत्तम॥ वैशं॥ श्रु
त्वा द्वैपायनवचो धर्मराजो युधिष्ठिरः। भ्रातॄन्सर्वान्समानाय्य काले वचनमब्रवीत्। अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि। श्रुतं वो वचनं वीराः सौहृदाद्यन्महा
त्मना। कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता। तपोवृद्धेन महता सुहृदां हितमिच्छता। गुरुणा धर्मशीलेन व्यासेनाद्भुतकर्मणा। भीष्मेण च महाप्राज्ञ गोवि

मि

देन च धीमता। संस्मृत्य तदहं सम्यक्कर्तुमिच्छामि पांडवाः। तस्माद्यागं करिष्यामः सर्वेषां ह्यागिनो हितं। अनुबंधे च कल्याणं यद्वचो ब्रह्मवादिनः। इयं हि वसुधा
सर्वा क्षीणरत्ना कुरूद्वहाः। तच्चाचष्ट तदा व्यासो मरुत्तस्य धनं नृपाः॥ यद्येतद्वो बहुमतं मन्यध्वं वा क्षमं यदि। तदानयामो हि धनं कथं वा भीम मन्यसे। इत्युक्ते
वाक्ये नृपतौ तदा कुरुकुलोद्वह। भीमसेनो नृपश्रेष्ठं प्रांजलिर्वाक्यमब्रवीत्। रोचते मे महाबाहो यदिदं भाषितं त्वया। व्यासाख्यातस्य वित्तस्य समुपानय
ने प्रति। यदि तत्प्राप्नुयामेह धनमाविक्षितं प्रभो। कृतमेव महाराज भवेदिति मतिर्मम। ते वयं प्रणिपातेन गिरीशस्य महात्मनः। तदानयाम तद्वित्तम
मत्यर्च्य कपर्दिनं। तं विभुं देवदेवेशं तस्यैवानुचरांश्च तान्। प्रसाद्यार्थमवाप्स्यामो नूनं वाग्बुद्धिकर्मभिः। रक्षंति ये च तद्द्रव्यं किंकरा रौद्रदर्शनाः। ते च
वश्या भविष्यंति प्रसन्ने वृषभध्वजे। श्रुत्वैवं ब्रुवतस्तस्य वाक्यं भीमस्य भारत। अर्जुनप्रमुखास्ते वै तथेत्येवाब्रुवन्वचः। कृत्वा तु पांडवाः सर्वे रत्नाहरण
निश्चयं। सेनामाज्ञापयामासुर्नक्षत्रेहनि च ध्रुवे। ततो ययुः पांडुसुता ब्राह्मणान्स्वस्ति वाच्य च। अर्चयित्वा सुरश्रेष्ठं पूर्वमेव महेश्वरं। मोदकैः पायसेना
थ मांसापूपैस्तथैव च। आशास्य च महात्मानं प्रययुर्मुदिता भृशं। तेषां प्रयास्यतां तत्र मंगलानि शुभान्यथ। प्राहुः प्रहृष्टमनसो द्विजा नागराश्च ये। ततः
प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च। ब्राह्मणानग्निसहितान्प्रययुः पांडुनंदनाः। समनुज्ञाप्य राजानं पुत्रशोकसमाहतं। धृतराष्ट्रं सभार्यं वै पृथां पृथुलो
चनां। मूले निक्षिप्य कौरव्यं युयुत्सुं धृतराष्ट्रजं। संपूज्यमानाः पौरैश्च ब्राह्मणैश्च मनीषिभिः॥ ॥ इत्याश्वमेधिके ॥ वैशं॥ ततस्ते प्रययुर्हृष्टाः प्रहृष्टनरवाहनाः।
रथघोषेण महता पूरयंतो वसुंधरां। संस्तूयमानाः स्तुतिभिः सूतमागधवंदिभिः॥ स्वेन सैन्येन संवीता यथादित्याः स्वरश्मिभिः। पांडुरेणातपत्रेण ध्रियमाणे
न मूर्द्धनि। बभौ युधिष्ठिरस्तत्र पौर्णमास्यामिवोडुराट्। जयाशिषः प्रहृष्टानां नराणां पथि पांडवः। प्रत्यगृह्णाद्यथान्यायं यथावत्पुरुषर्षभ। तथैव सैनिका राजन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जानमन्वयांतिये। तेषां हलहलाशब्दो दिवं स्तब्ध्वा व्यतिष्ठत॥ सर्वांभिसरितश्चैव नास्मुपवना निच। अत्यक्रामन्महाराजो गिरिं वाप्यन्वपद्यत। तस्मिन्देशे वराजेंद्रयत्र ताद्व्यमुत्तमं॥ चक्रे निवेशनं राजा पांडवः सहसैनिकैः। शिवे देशे समे चैव तदा भरतसत्तम। अग्रतो ब्राह्मणान्कृत्वा तपोविद्या दमान्वितान्॥ पुरोहितं च कौरव्य वेदवेदांगपारगं। प्राग्निवेशं तु राजानं ब्राह्मणाः सपुरोधसः॥ कृत्वा शांतिं यथान्यायं सर्वशः पर्यवारयन्॥ कृत्वा तु मध्ये राजानं समंत्रिं च यथाविधि। षट्पथं नवसंस्थानं निवेशं चक्रिरे तदा। मत्तानां वारणेंद्राणां निवेशं च यथाविधि। कारयित्वा स राजेंद्रो ब्राह्मणानिदमब्रवीत्॥ अस्मिन्कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे। यथा भवन्तो मन्यंते कर्तुमर्हथ तत्तथा। न नः कालात्ययो वै स्यादिहैव परिलंबतां॥ इति निश्चित्य विप्रेंद्राः क्रियतां यदनंतरं। श्रुत्वैतद्वचनं राज्ञो ब्राह्मणाः सपुरोगमाः। इदमूचुर्वचो हृष्टा धर्मराजप्रियेप्सवः॥ अद्यैव नक्षत्रमहश्च पुण्यं यतामहे श्रेष्ठतमं क्रियासु। अंभोभिरद्येह वसाम राजन्नुपोष्यतां चापि भवद्भिरद्य॥ श्रुत्वा तु तेषां द्विजसत्तमानां कृतोपवासा रजनीं नरेंद्राः। ऊषुः प्रतीताः कुशसंस्तरेषु यथाध्वरे प्रज्वलिता हुताशनाः॥ ततो निशा साव्यगमन्महात्मनां कृतोपवासा रजनीं नरेंद्राः। ऊषुः प्रतीताः कुशसंस्तरेषु संशृण्वतां विप्रसमीरिता गिरः। ततः प्रभाते विमले द्विजर्षभा वचो ब्रुवन्धर्मसुतं नराधिपं॥ ब्राह्मणा ऊचुः॥ क्रियतामुपहारोद्य त्र्यंबकस्य महात्मनः। दत्वोपहारं नृपते ततः स्वार्थं यतामहे। श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिरः। गिरीशस्य यथान्यायमुपहारमुपाहरत्। आज्येन तर्पयित्वाग्निं विधिवत्संस्कृतेन च। मंत्रसिद्धं चरुं कृत्वा पुरोधाः प्रययौ तदा॥ स गृहीत्वा सुमनसो मंत्रपूता नराधिप। मोदकैः पायसेनाथ मांसैश्चोपाहरद्बलिं। सुमनोभिश्च चित्राभिर्लाजैरुच्चावचैरपि। सर्वं स्विष्टतमं कृत्वा विधिवद्वेदपारगः॥ किंकराणां ततः पश्चाच्चकार बलिमुत्तमं। यक्षेंद्राय कुबेराय मणिभद्राय चैव ह। तथान्येषां च यक्षाणां भूताधिपतयश्च ये। कृसरेण समांसेन निवापैस्तिलसंयुतैः। ओदनं कुंभशः कृत्वा पुरोधाः समुपाहरत्। ब्राह्म

णेभ्यः सहस्राणि गवां दत्वा तु भूमिपः। नक्तंचराणां भूतानां व्यादिदेश बलिं तदा। धूपगंधनिरुद्धं तत्सुमनोभिश्च संवृतं। शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिव॥ कृत्वा पूजां तु रुद्रस्य गणानां चैव सर्वशः। ययौ व्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति। पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च। सुमनोभिर्विचित्राभिरपूपैः कृसरेण च। शंखादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः। अर्चयित्वा द्विजाग्र्यान्स स्वस्ति वाच्य च वीर्यवान्। तेषां पुण्याहघोषेण तेजसा समवस्थितः। प्रीतिमान्स कुरुश्रेष्ठः खानयामास तं निधिं। ततः पात्रीः सकरकाः बहुरूपा मनोरमाः। भृंगाराणि कटाहानि कलशान्वर्धमानकान्। बहूनि च विचित्राणि भाजनानि सहस्रशः। उद्धारयामास तदा धर्मराजो युधिष्ठिरः। तेषां लक्षणमथासीन्महान्करपुटस्तदा। लक्षं च भाजनं राजंस्तुलार्धमभवन्नृप। वाहनं पांडुपुत्रस्य तत्रासीत्तु विशांपते। षष्टिरुष्ट्रसहस्राणि शतानि द्विगुणा हयाः। वारणाश्च महाराज सहस्रशतसंमिताः। शकटानि रथाश्चैव तावदेव सहस्रशः। खराणां पुरुषाणां च परिसंख्या न विद्यते। एतद्वित्तं तदभवद्यदुद्दध्रे युधिष्ठिरः। षोडशाष्टौ चतुर्विंशत्सहस्रं भारलक्षणं। एतेष्वाधाय तद्द्रव्यं पुनरभ्यर्च्य पांडवः। महादेवं प्रतिययौ पुनर्नागाह्वयं प्रति। द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितं। गव्यूतिमात्रे न्यवसत्सर्वत्र पुरुषर्षभः। सा पुराभिमुखी राजन्जगाम महती चमूः। कृच्छ्राद्द्रविणभारार्ता हर्षयंती कुरूद्वहान्॥ इति श्रीअश्वमेधिके विशं॥ एतस्मिन्नेव काले तु वासुदेवोपि वीर्यवान्। उपायाद्वृष्णिभिः सार्द्धं पुरं वारणसाह्वयं। समयं वाजिमेधस्य विदित्वा पुरुषर्षभः। यथोक्तो धर्मपुत्रेण व्रजन्स्वपुरीं प्रति। रौक्मिणेयेन सहितो युयुधानेन चैव ह। चारुदेष्णेन साम्बेन गदेन कृतवर्मणा। सारणेन च वीरेण निशठेनोल्मुकेन च। बलदेवं पुरस्कृत्य सुभद्रासहितस्तदा। द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः। समाश्वासयितुं चापि क्षत्रिया निहतेश्वराः। तानागतान्समीक्ष्यैव धृतराष्ट्रो महीपतिः। प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः। तत्रैव न्यवसत्कृष्णः स्वर्चितः पुरुषोत्तमः। विदुरेण महाते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
५६
श्री

नृ

णा स्त्रैथैवच युयुत्सुना। वसत्सु वृष्णिवीरेषु तत्राथ जनमेजय। जज्ञे तव पिता राजन् परिक्षित्परवीरहा। स तु जातो महाराज ब्रह्मास्त्रेणैव पीडितः। शवभूतो निरुत्स्वनि
श्रेष्ठो हर्षशोकविवर्द्धनः। हृष्टानां सिंहनादेन जनानां तत्र निस्वनः। प्रविश्य प्रदिशः सर्वाः पुनरेव व्युपारमत। ततः सोऽतित्वरः कृष्णो विवेशांतःपुरं तदा। यु
युधानद्वितीयो वै व्यथितेन्द्रियमानसः। ततस्त्वरितमायांतीं ददर्श पितृष्वसां। क्रोशंतीमभिधावेति वासुदेव पुनः पुनः। पृष्ठतो द्रौपदी चैव सुभद्रां च यश
स्विनीं। विक्रोशंत्यश्च करुणं पांडवानां स्त्रियो नृप। ततः कृष्णं समासाद्य कुंती भोजसुता तदा। प्रोवाच राजशार्दूल बाष्पगद्गदया गिरा। वासुदेव महाबाहो
सुप्रजा देवकी त्वया। त्वं नो गतिः प्रतिष्ठा च त्वदायत्तमिदं कुलं। यदुप्रवीर योऽयं ते स्वस्रीयस्यात्मजः प्रभो। अश्वत्थाम्ना हतो जातस्तं त्वं जीवय केशव। त्वया ह्ये
तत्प्रतिज्ञातमैषीके यदुनंदन। अहं संजीवयिष्यामि मृतं जातमिति प्रभो। सोऽयं जातो मृतस्तात पश्यैनं पुरुषर्षभ। उत्तरां च सुभद्रां च द्रौपदीं मां च माधव। धर्म
पुत्रं च भीमं च फाल्गुनं नकुलं तथा। सहदेवं च दुर्द्धर्ष सर्वान्नस्त्रातुमर्हसि। अस्मिन्प्राणाः समायत्ताः पांडवानां ममैव च। पांडोश्च पिंडो दाशार्ह तथैव श्वशु
रस्य मे। अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य च। प्रियमुत्पादयाद्य त्वं प्रेतस्यापि जनार्द्दन। उत्तरा हि पुरोक्तं वै कथयत्यरिसूदन। अभिमन्योर्वचः कृष्ण प्रिय
त्वात्ते न संशयः। अब्रवीत्किल दाशार्ह वैराटीमार्जुनिस्तदा। मातुलस्य कुलं भद्रे तव पुत्रो गमिष्यति। गत्वा वृष्ण्यंधककुलं धनुर्वेदं ग्रहीष्यति। अस्त्राणि
च विचित्राणि नीतिशास्त्रं च के[illegible]वलं। इत्येतत्प्रणयात्तात सौभद्रः परवीरहा। कथयामास दुर्द्धर्षस्तथा चैतन्न संशयः। ता त्वां वयं प्रणम्येह याचामो मधुसू
दन। कुलस्यास्य हितार्थं त्वं कुरु कल्याणमुत्तमं। एवमुक्ते ततः कुंती पर्य्यश्रुह्वा जनार्दनं। भूमौ निपतिता चैनोसां त्वया मास भारत। ॥ इत्याश्वमेधिके ॥ ५५
॥ वैशं ॥ उत्थितायां पृथायां तु सुभद्रा भ्रातरं तदा। दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत्। पुंडरीकाक्ष पश्यस्व पौत्रं पार्थस्य धीमतः। परिक्षीणेषु कुरुषु

एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना। उत्कृत्य भाक्तदुःखार्ता ताश्चान्या न्यपतन्भुवि। अशुं वंश्य महाराज सर्वा बाष्पाविलेक्षणाः।
स्वस्रीयो वासुदेवस्य मृतो जात इति प्रभो। २

परिक्षीणं गतायुषं। इषीका द्रोणपुत्रेण भीमसेनार्थमुद्यता। सोत्तरायां निपतिता विजये मयि चैव ह। सेयं विदीर्णहृदये मयि तिष्ठति केशव। पश्य पश्यामि दुर्द्धर्ष सहपुत्रं तु नं
विभो। किन्नु वक्ष्यति धर्मात्मा धर्मराजो युधिष्ठिरः। भीमसेनार्जुनौ चापि माद्रवत्याः सुतौ च तौ। श्रुत्वाभिमन्योस्तनयं जातं च मृतमेव च। मुषिता इव वार्ष्णेय द्रोणपुत्रेण पां
डवाः। अभिमन्युः प्रियः कृष्ण भ्रातॄणां नात्र संशयः। ते श्रुत्वा किंनु वक्ष्यंति द्रोणपुत्रास्त्रनिर्जिताः। भविता तेऽत परं दुःखं किं तदन्यज्जनार्द्दन। अभिमन्योः सुतं कृष्ण मृतं
जातमरिंदम। माहं प्रसादये कृष्ण त्वामद्य शिरसानता। पृथेयं द्रौपदी चैव ताः पश्य पुरुषोत्तम। यदा द्रोणसुतो गर्भान्पांडूनां हंति माधव। तदा किल त्वया द्रौणिः क्रु
द्धेनोक्तोऽरिमर्द्दन। अकामं त्वां करिष्यामि ब्रह्मबंधो नराधम। अहं संजीवयिष्यामि किरीटितनयात्मजं। इत्येतद्वचनं श्रुत्वा जानाना हं बलं तव। प्रसादये त्वां दुर्द्धर्ष नी
वतादभिमन्युजः। यद्येतत्त्वं प्रतिश्रुत्य न करोषि वचः शुभं। सफलं वृष्णिशार्दूल मृतां मामवधारय। अभिमन्योः सुतो वीर न संजीवति यद्ययं। जीवति त्वयि दुर्द्धर्ष किं
करिष्याम्यहं त्वया। संजीवयैनं दुर्द्धर्ष मृतं त्वमभिमन्युजं। सदृशाक्षसुतं वीर सस्यं वर्षन्निवांबुदः। त्वं हि केशव धर्मात्मा सत्यवाक्सत्यविक्रमः। सतां वाचमृतां
कर्तुमर्हसि त्वमरिंदम। इच्छन्नपि हि लोकांस्त्रीञ्जीवयेथा मृतानिमान्। किं पुनर्दयितं जातं स्वस्रीयस्यात्मजं मृतं। प्रभावज्ञास्मि ते कृष्ण तस्मादेतद्ब्रवीमि ते। कुरुष्व
पांडुपुत्राणामिमं परमनुग्रहं। स्वसेति वा महाबाहो हतपुत्रेति वा पुनः। प्रपन्ना मामियं चेति दयां कर्तुमिहार्हसि। ॥ इत्याश्वमेधिके ॥ वैशं ॥ एवमुक्तस्तु राजेंद्र
केशिहा दुःखमूर्छितः। तथेति व्याजहारोच्चैर्ह्लादयन्निव तं जनं। वाक्येनैकेन हि तदा तं जनं पुरुषर्षभ। ह्लादयामास स विभुर्घर्मार्तं सलिलैरिव। ततः स प्राविश
त्तूर्णं जन्मवेश्म पितुस्तव। अर्चितं पुरुषव्याघ्र सितैर्माल्यैर्यथाविधि। अपां कुंभैः सुपूर्णैश्च विन्यस्तैः सर्वतोदिशं। घृतेन तिंदुकालातैः सर्षपैश्च महाभुजः। अस्त्रैश्च विमलै
र्न्यस्तैः पावकैश्च समंततः। वृद्धाभिश्चापि रामाभिः परिवार्य्यार्थमच्युतः। दक्षैश्च परितो वीर भिषग्भिः कुशलैस्तथा। ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः। द्रव्याणि स्थ

मधुपुष्पेभ्य

हरेश्विर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
५८

पितानिस्म विधिवत्कुशलैर्ज्जनैः। तथायुक्तं च तत् दृष्ट्वा जन्मवेश्म पितुस्तव। हृष्टोभवद्धृषीकेशः साधु साध्विति चाब्रवीत्। तथा ब्रुवति वार्ष्णेये प्रहृष्टवदने तदा। द्रौपदी
त्वरिता गत्वा वैराटीं वाक्यमब्रवीत्। अयमायाति ते भद्रे श्वशुरो मधुसूदनः। पुराणर्षिरचिंत्यात्मा समीपमपराजितः। सापि बाष्पकलां वाचं निगृह्याश्रूणि चैव ह।
सुसंवीताभवद्देवी देववत्कृष्णमीक्षती। सा तथा दूयमानेन हृदयेन तपस्विनी। दृष्ट्वा गोविंदमायांतं कृपणं पर्यदेवयत्। पुंडरीकाक्ष पश्याबां बालाविह निराकृतौ।
अभिमन्युं च मां चैव हतौ तुल्यं जनार्द्दन। वार्ष्णेय मधुहन्वीर शिरसा त्वां प्रसादये। द्रोणपुत्रास्त्रनिर्द्दग्धं जीवयैनं ममात्मजं। यदि स्म धर्मराजेन भीमसेनेन वा पुनः।
त्वया वा पुंडरीकाक्ष वाक्यमुक्तमिदं भवेत्। अजानतीमिषीकेयं जनित्रीं हंत्विति प्रभो। अहमेव विनष्टा स्यां नेदमेवंगतं भवेत्। गर्भस्थस्यास्य बालस्य ब्रह्मा
स्त्रेण निपातनं। कृत्वा नृशंसं दुर्बुद्धिर्द्रौणिः किं फलमश्नुते। सा त्वां प्रसाद्य शिरसा याचे शत्रुनिबर्हण। प्राणांस्त्यक्ष्यामि गोविंद नायं संजीवते यदि। अस्मिन्हि
हवाः साधो ये मया सन्मनोरथाः। ते द्रोणपुत्रेण हताः किं नु जीवामि केशव। आसीन्मम मतिः कृष्ण पूर्णोत्संगा जनार्द्दन। अभिवादयिष्ये हृतादिदं वितथं कृतं। चप
लो कृष्ण दायादे मृते मिथु पुरुषर्षभ। विफला मे कृताः कृष्ण हृदि सर्वे मनोरथाः। चपला कृष्ण किलातीव प्रियस्तेन मधुसूदन। सुतं पश्य सुतं तस्य ब्रह्मास्त्रेण निपाति
तं। कृतघ्नोयं नृशंसोयं यथास्य जनकस्तथा। यः पांडवीं श्रियं त्यक्त्वा गतोद्य यमसादनं। मया चैतत्प्रतिज्ञातं रणमूर्द्धनि केशव। अभिमन्यौ हते वीर त्वामेष्याम्यचि
रादिवा। तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया। इदानीमागतां तात किं नु वक्ष्यति फाल्गुनिः।। इत्याश्वमेधिके वैशं॥ सैवं विलप्य करुणं सोन्मादेव तपस्विनी। उ
त्तरा न्यपतद्भूमौ कृपणा पुत्रगृद्धिनी। तां तु दृष्ट्वा निपतितां हतपुत्रपरिच्छदां। चुक्रोश कुंती दुःखार्त्ता सर्वाश्च भरतस्त्रियः। मुहूर्त्तमिव तद्राजन्पांडवानां निवेशनं।
अप्रेक्षणीयमभवदार्त्तस्वरनिनादितं। सा मुहूर्त्तं च राजेंद्र पुत्रशोकाभिपीडिता। कश्मलाभिहता वीर वैराटी त्वभवत्तदा। प्रतिलभ्य तु सा संज्ञामुत्तरा भरतर्षभ। अंकमा

५८

श्य

रोप्य तं पुत्रमिदं वचनमब्रवीत्। धर्मज्ञस्य सुतः सन्सन्नधर्मं नावबुध्यसे। यस्त्वं वृष्णिप्रवीरस्य कुरुषेणाभिवादनं। पुत्र गत्वा मम वचो ब्रूयास्त्वं पितरं त्विदं। दुर्मरं प्राणिनां
वीरकाले प्राप्ते कथंचन। याहं त्वया विहीनाद्य पत्या पुत्रेण चैव ह। मर्त्तव्ये सति जीवामि हतस्वस्तिरकिंचना। अथवा धर्मराज्ञाहमनुज्ञाता महाभुज। भक्षयिष्ये विषं
तीक्ष्णं प्रवेक्ष्ये वा हुताशनं। अथवा दुर्मरं तात यदिदं मे सहस्रधा। पतिपुत्रविहीनाया हृदयं न विदीर्यते। उत्तिष्ठ पुत्र पश्येमां दुःखितां प्रपितामहीं। आर्त्तामुपप्लुतां
दीनां निमग्नां शोकसागरे। आर्यां च पश्य पांचालीं सात्वतीं च तपस्विनीं। मां च पश्य सुदुःखार्त्तां व्याधविद्धां मृगीमिव। उत्तिष्ठ पश्य वदनं लोकनाथस्य धीमतः। पुं
डरीकपलाशाक्षं पुरेव चपलेक्षणः। एवं विप्रलपंतीं तां दृष्ट्वा निपतितां पुनः। उत्तरां ताः स्त्रियः सर्वाः समुत्थापयंस्ततः। उत्थाय च पुनर्धैर्यात्तदा मत्स्यपतेः सुता।
प्रांजलिः पुंडरीकाक्षं भूमावेवाभ्यवादयत्। श्रुत्वा स तस्या विपुलं विलापं भरतर्षभ। उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं प्रत्यसंहरत्। प्रतिजज्ञे च दाशार्हस्तस्य जीवितमच्यु
तः। अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयन् जगत्। न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति। एष संजीवयाम्येनं पश्यतां सर्वदेहिनां। नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि
कदाचन। न च युद्धात्परावृत्तस्तथा संजीवतामयं। यथा मे दयितो धर्मो ब्राह्मणाश्च विशेषतः। अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा। यथाहं नाभिजानामि विज
ये न कदाचन। विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः। यथा सत्यं च धर्मश्च मयि नित्यं प्रतिष्ठितौ। तथा मृतः शिशुरयं जीवितादभिमन्युजः। यथा कंसश्च केशी च धर्मे
णानिहतौ मया। तेन सत्येन बालोयं पुनः संजीवतामिह। इत्युक्तो वासुदेवेन स बालो भरतर्षभ। शनैः शनैर्महाराज प्रास्पंदत सचेतनः।। इत्याश्वमेधिके।। वैशं।।
ब्रह्मास्त्रं तु तदा राजन्कृष्णेन प्रतिसंहृतं। तदा तद्वेश्म ते पित्रा तेजसाभिविदीपितं। ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत्। अंतरिक्षे च वागासीत्साधु केशव साधु
विति। तदस्त्रं ज्वलितं चापि पितामहमगात्तदा। ततः प्राणान्पुनर्लेभे पिता तव जनेश्वर। व्यचेष्टत च बालोसौ यथोत्साहं यथाबलं। बभूवुर्मुदिता राजन्नुत्तरायास्ततः स्त्रियः

६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
५९

ब्राह्मणास्त्रजया मासुर्गोविंदस्यैव शासनात्। ततस्ते मुदिताः सर्वाः प्रशशंसुर्जनार्दनं। स्त्रियो भरतसिंहानां नावं लब्ध्वेव पारगाः।। कुंती द्रुपदपुत्री च सुभद्रा चोत्तरा त
था। स्त्रियश्चान्या नृसिंहानां बभूवुर्हृष्टमानसाः।। तत्र मल्ला नटा झल्ला ग्रंथिकाः सौखशायिकाः।। सूतमागधसंघाश्च अस्तुवन्कुरुनंदनं। कुरुवंशस्तवाख्याभिराशीर्भि
र्भरतर्षभ। उत्थायाभ्युद्ययौ काले कुंतीपुत्रो यदुनंदनं। अभ्यवादयत प्रीत्या सह पुत्रेण भारत। तस्य कृष्णो ददौ प्रीतो बहुरत्नं विशेषतः।। तथान्येभ्यो वृष्णिशार्दूलो नाम चा
स्याकरोत्प्रभुः। पितुस्तव महाराज सत्यसंधो जनार्दनः। परिक्षीणे कुले यस्माज्जातोऽयमभिमन्युजः।। परिक्षिदिति नामास्य भवत्वित्यब्रवीत्तदा।। सोवर्द्धत यथाका
ले पिता तव जनाधिपः। मनःप्रह्लादनं चासीत्सर्वलोकस्य भारत।। मासजातस्तु ते वीर पिता भवति भारत। अथाजग्मुः सुबहुलं रत्नमादाय पांडवाः।। तान्समीपागता
न्वृष्णिनिर्ययुर्वृष्णिपुंगवाः।। अलंचकुश्च माल्यौघैः पुरुषा नागसाह्वयं। पताकाभिर्विचित्राभिर्ध्वजैश्च विविधैरपि। वेश्मानि समलंचक्रुः पौराश्चापि जनाधिप। दे
वतायतनानां च पूजा बहुविधास्तथा।। संदिदेशाथ विदुरः पांडुपुत्रप्रियेप्सया। राजमार्गाश्च तत्रासन्कुसुमैरभिसंवृताः।। शुशुभे तत्पुरं चापि समुद्रौघसमस्वनं। नर्तकै
श्चापि नृत्यद्भिर्गायनानां च निस्वनैः। आसीद्वैश्रवणस्येव निवासस्तत्पुरं तदा।। बंदिभिश्च नरै राजन्स्त्रीसहायैः सहस्रशः।। तत्र तत्र विविक्तेषु समंतादुपशोभितं। प
ताकाधूयमानाश्च श्वसता मातरिश्वना।। अदर्शयन्निव तदा कुरून्वै दक्षिणोत्तरान्। अघोषयंस्तदा चापि पुरुषा राजधूर्गताः।। सर्वरात्रं विहारोद्य रत्नाहरणलक्षणः।।
इत्याश्वमेधिके परिक्षिज्जन्म।। वैशं।। तान्समीपागताञ्श्रुत्वा पांडवाञ्शत्रुकर्षणान्। वासुदेवः सहामात्यः प्रत्युद्यातो दिदृक्षया।। ते समेत्य यथान्यायं पांडवा वृष्णिभिः
सहाँयावाशथिवोलंचैव सर्वमासीत्समाहृतं। ते कोशं समग्रतः कृत्वा विविशुः स्वपुरं तदा।। पांडवाः प्रीतमनसः सामात्याः सह सुहृद्गणैः।। ते समेत्य यथान्यायं धृतराष्ट्रं जना
धिपं। कीर्तयंतस्त्व नामानि तस्य पादौ ववंदिरे। धृतराष्ट्रस्य ते गांधारीं सुबलात्मजां। कुंतीं च राजशार्दूल तदा भरतसत्तमाः। विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च

विविशुः सहिता राजन्पुरं वारणसाह्वयं।। सहितास्तस्य सैन्यस्य रथनेमिस्वनेन च।२

राम
५९

पूज्यमानाः स्म ते वीरा व्यरोचंत विशांपते। ततस्तत्परमाश्चर्यं विचित्रं महदद्भुतं। शुश्रुवुस्ते तदा वीराः पितुस्ते जन्म भारत।। तदुपश्रुत्य तत्कर्म वासुदेवस्य धीम
तः। पूजार्हं पूजयामासुः कृष्णं देवकिनंदनं। ततः कतिपयाहस्य व्यासः सत्यवतीसुतः। आजगाम महातेजा नगरं नागसाह्वयं।। तस्य सर्वे यथान्यायं पूजां चक्रुः कु
रूद्वहाः।। सह वृष्ण्यंधकव्याघ्रैरुपासां चक्रिरे तदा।। तत्र नानाविधाकाराः कथाः समनुकीर्त्य वै। युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत्।। भवत्प्रसादाद्भग
वन्यदिदं रत्नमाहृतं। उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ। तदनुज्ञातुमिच्छामि भवता मुनिसत्तम। त्वदधीना वयं सर्वे कृष्णस्य च महात्मनः।। व्यास उ।।
अनुजानामि राजेंद्र क्रियतां यदनंतरं। यजस्व वाजिमेधेन विधिवद्दक्षिणावता।। अश्वमेधो हि राजेंद्र पावनः सर्वपाप्मनां। तेनेष्ट्वा त्वं विपाप्मा वै भविता नात्र सं
शयः।। वैशं।। इत्युक्तः स तु धर्मात्मा कुरुराजो युधिष्ठिरः। अश्वमेधस्य कौरव्य चकाराहरणे मतिं। समनुज्ञाप्य तत्सर्वं कृष्णद्वैपायनं नृपः।। वासुदेवमथाभ्येत्य वाग्मी
वचनमब्रवीत्। देवकी सुप्रजा देवी त्वया पुरुषसत्तम। यद्ब्रूयां त्वं महाबाहो तत्कृथास्त्वमर्हसि। त्वत्प्रभावार्जितान्भोगानश्नीयं यदुनंदन। पराक्रमेण बुद्ध्या च त्व
येयं निर्जिता मही। दीक्षयस्व त्वमात्मानं त्वं हि नः परमो गुरुः। त्वयीष्टवति दाशार्ह विपाप्मा भविता ह्यहं। त्वं हि यज्ञोऽक्षरः सर्वस्त्वं धर्मस्त्वं प्रजापतिः।। त्वं गतिः सर्वभू
तानामिति मे निश्चिता मतिः।। वासुदेव उवाच।। त्वमेवैतन्महाबाहो वक्तुमर्हस्यरिंदम। त्वं गतिः सर्वभूतानामिति मे निश्चिता मतिः। त्वं चाद्य कुरुवीराणां धर्मेणाभि
विराजसे। गुणीभूताः स्म ते राजंस्त्वं नो राजा गुरुर्मतः।। यजस्व मदनुज्ञातः प्राप्यएष क्रतुस्त्वया। युनक्तु नो भवान्कार्ये यत्र वांछसि भारत।। सत्यं ते प्रतिजानामि सर्वं कर्तास्मि
तेऽनघ।। भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ। इष्टवंतो भविष्यंति त्वयीष्टवति भारत।। इत्याश्वमेधिके।। वैशं।। एवमुक्तस्तु कृष्णेन धर्मपुत्रो युधिष्ठिरः। व्यासमामंत्र्य मे
धावी ततो वचनमब्रवीत्।। यदाकालं भवान्वेत्ति हयमेधस्य तत्त्वतः। दीक्षयस्व तदा मां त्वं त्वय्यायत्तो हि मे क्रतुः।। व्यास उ।। अहं पैलोऽथ कौंतेय याज्ञवल्क्यस्तथैव च। विधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
५०

नंयथाकालंतकन्नरोनसंशयः। चैत्र्यांहिपौर्णमास्यांतुतवदीक्षाभविष्यति। संभारांसंभ्रियंतांचयज्ञार्थंपुरुषर्षभ। अश्वविद्याविदश्चैवसूताविप्राश्चतद्विदः। मेध्यमश्वं
परीक्षंतांतवयज्ञार्थसिद्धये। तमुत्सृज्ययथाशास्त्रंपृथिवींसागरांबरां। सपर्यटतुयशोदीप्तंतवपार्थिवदर्शयन्। वैशं। इत्युक्तःसतथेत्युक्त्वापांडवःपृथिवीपतिः। च
कारसर्वंराजेंद्रोयथोक्तंब्रह्मवादिना। संभाराश्चैवराजेंद्रसर्वेसंकल्पितास्तव। ससंभारान्समाहृत्यनृपोधर्मसुतस्तदा। न्यवेदयदमेयात्माकृष्णद्वैपायनायवैत
तोब्रवीन्महातेजाव्यासोधर्मात्मजंनृपं। यथाकालंयथायोगंसज्जाःस्मस्तववदीक्षणे। स्फ्यश्चकूर्चश्चसौवर्णोयच्चान्यदपिकौरवात्रयोग्यंभवेत्किंचित्तदोकंक्रियता
मिह। अश्वश्चोत्सृज्यतामद्यपृथ्यामथययाक्रमं। सुगुप्तश्चरतांचापियथाशास्त्रंयथाविधि। युधिष्ठिरउवाच। अयमश्वोयथाब्रह्मन्नुत्सृष्टःपृथिवीमिमां। चरिष्य
तियथाकामंतत्रवैसंविधीयतां। पृथिवींपर्यटंतंहितुरगंकामचारिणं। कःपालयेदितिमुनेतद्भवान्वक्तुमर्हति। वैशं। इत्युक्तःसतुराजेंद्रकृष्णद्वैपायनोब्रवीत्। भी
मसेनादवरजःश्रेष्ठःसर्वधनुष्मतां। जिष्णुःसहिष्णुर्धृष्णुश्चसएनंपालयिष्यति। शक्तःसहिमहींजेतुंनिवातकवचांतकः। तस्मिन्ह्यस्त्राणिदिव्यानिदिव्यंसंहन
नंतथा। दिव्यंधनुश्चेषुधीचसएनमनुयास्यति। सहिधर्मार्थकुशलःसर्वविद्याविशारदः। यथाशास्त्रंनृपश्रेष्ठचारयिष्यतितेहयं। राजपुत्रोमहाबाहुःश्यामोराजीवलो
चनः। अभिमन्योःपितावीरःसएनंपालयिष्यति। भीमसेनोपितेजस्वीकौंतेयोमितविक्रमः। समर्थोरक्षितुंराष्ट्रंनकुलश्चविशांपते। सहदेवस्तुकौरव्यसमाधास्यति
बुद्धिमान्। कुटुंबतंत्रंविधिवत्सर्वमेवमहायशाः। तत्तुसर्वंयथान्यायमुक्तःकुरुकुलोद्वहः। चकारफाल्गुनंचापिसंदिदेशहयंप्रति। युधिष्ठिरउवाच। एह्यर्जुनत्वया
वीरहयोयंपरिपाल्यतां। त्वमर्होरक्षितुंह्येनंनान्यःकश्चनमानवः। येचापित्वांमहाबाहोप्रत्युदीयुर्नराधिपाः। तैर्विग्रहोयथानस्यात्तथाकार्यंत्वयानघ। आख्यात
व्यश्चभवतायज्ञोयंममसर्वशः। पार्थिवेभ्योमहाबाहोसमयेगम्यतामिति। वैशं। एवमुक्त्वासधर्मात्माभ्रातरंसव्यसाचि नं। भीमंचनकुलंचैवपुरगुप्तौसमादधत्।

यपंव उरसोवर्ण

५७

विधिवत्पालयामासधर्मराजस्यशासनात् ।१४

उ

१०

कुटुंबतंत्रेचतदासहदेवंयुधांपतिं। अनुमान्यमहीपालंधृतराष्ट्रंयुधिष्ठिरः। इत्याश्वमेधिके। वैशं। दीक्षाकालेतुसंप्राप्तेततस्तेसुमहर्त्विजः। विधिवद्दीक्षयामासुरश्वमेधायपा
र्थिवं। कृत्वासपशुबंधांश्चदीक्षितःपांडुनंदनः। धर्मराजोमहातेजाःसहर्त्विग्भिर्व्यरोचत। हयश्चहयमेधार्थंस्वयंसब्रह्मवादिना। उत्सृष्टःशास्त्रविधिनाव्यासेनामिततेजसा।।
सराजाधर्मराड्राजन्दीक्षितोविबभौतदा। हेममालीरुक्मकंठःप्रदीप्तइवपावकः। कृष्णाजिनीदंडपाणिःक्षौमवासाःसधर्मजः। विबभौद्युतिमान्भूयःप्रजापतिरिवाध्वरे।
त[illegible]थैवास्यर्त्विजःसर्वेतुल्यवेषाविशांपते। बभूवुरर्जुनश्चापिप्रदीप्तइवपावकः। श्वेताश्वःकृष्णसारंगंससारानुधनंजयः। विक्षिपन्गांडिवंराजन्बद्धगोधांगुलित्रवान्। तम
श्वंपृथिवीपालमुदायुक्तःससारच। आकुमारंतदाराजन्नागमन्तत्पुरंविभो। इत्युक्तासंकुरुश्रेष्ठप्रयास्यंतंधनंजयं। तेषामन्योन्यसंमर्दादूष्मेवसमजायत। दिदृक्षूणां
हयंतंचतथैवहयसारिणं। ततःशब्दोमहाराजदशाः परिपूरयन्। बभूवप्रेक्षतांनृणांकुंतीपुत्रंधनंजयं। एषगच्छतिकौंतेयस्तुरगश्चैवदीप्तिमान्। यमन्वेतिमहाबाहुः
संस्पृशन्धनुरुत्तमं। एवंशुश्राववदतांगिरोजिष्णुरुदारधीः। स्वस्तितेस्तुव्रजाविघ्नंपुनश्चैहीतिभारत। अथापरेमनुष्येंद्रपुरुषावाक्यमब्रुवन्। नैनंपश्यामसंमर्देध
नुरेतद्धिदृश्यते। एतद्धिभीमनिर्ह्रादंविश्रुतंगांडिवंधनुः। स्वस्तिगच्छत्वरिष्टोवैपंथानमकुतोभयं। निवृत्तमेनंद्रक्ष्यामःपुनरेष्यतिचध्रुवं। एवमाद्यामनुष्याणांस्त्रीणांच
भरतर्षभ। शुश्रावमधुरावाचःपुनःपुनरुदारधीः। याज्ञवल्क्यस्यशिष्यश्चकुशलोयज्ञकर्मणि। प्रायात्पार्थेनसहितःशांत्यर्थंवेदपारगः। ब्राह्मणाश्चमहीपालबहवोवे
दपारगाः। अनुजग्मुर्महात्मानंक्षत्रियाश्चविशोपिच। विधिवत्पृथिवीपालधर्मराजस्यशासनात्। पांडवैःपृथिवीमस्त्रैर्निर्जितामस्त्रतेजसा। चचारसमहाराजयथोद्देशंच
सत्तमा। तत्रयुद्धानिवृत्तानियान्यासन्पांडवस्यह। तानिव[illegible]सामितेवीरचित्राणिमहांतिच। सहयःपृथिवींराजन्प्रदक्षिणमवर्तत। सारंगःफाल्गुनःपूर्वंततश्चैवोभयम
हीपते। अवधूस्युःसराष्ट्राणिपार्थिवानांहयोत्तमः। शनैस्तदासपरीयायश्वेताश्वश्चमहारथः। तत्रसंकलनानैवसिराज्ञामयुतशस्तदा। येयुध्यंतमहाराजक्षत्रियाहतबांध

रा:

मृ

नृ
पः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰ ५१

वाः॥ किराता यवना राजन् बहवो ऽसिधनुर्द्धराः। म्लेंछाश्चान्ये बहुविधाः पूर्वं ये निकृता रणे॥ आर्याश्च पृथिवीपालाः प्रहृष्टनरवाहनाः॥ समीयुः पांडुपुत्रेण बहवो युद्ध-
दुर्म्मदाः॥ एवं युद्धानि वृत्तानि तत्र तत्र महीपते। अर्जुनस्य महीपालैर्नानादेशसमागतैः॥ यानि तु संयतो राजन् प्रवृत्तानि महांति वै। तानि युद्धानि वक्ष्यामि कौंतेयस्य त-
वानघ॥ इत्याश्वमेधिके॥ वैशं॥ त्रिगर्त्तैरभवद्युद्धं कृतवैरैः किरीटिनः। महारथसमाज्ञातैर्हतानां पुत्रनप्तृभिः॥ ते समाज्ञाय संप्राप्तं यज्ञियं तुरगोत्तमं। विषयां-
ते ततो वीरा दंशिताः पर्यवारयन्॥ रथिनो बद्धतूणीराः सदश्वैः समलंकृताः। परिवार्य हयं राजन् ग्रहीतुं संप्रचक्रमुः॥ ततः किरीटी संचिंत्य तेषां तत्र चिकीर्षितं। वार-
यामास तान्वीरान् सांत्वपूर्वमरिंदमः। तदनादृत्य ते सर्वे शरैरभ्यहनंस्तदा। तमोरजोभ्यां संछन्नांस्तान्किरीटी न्यवारयत्॥ तानब्रवीत्ततो जिष्णुः प्रहसन्निव भारत। निव-
र्त्तध्वमधर्मज्ञाः श्रेयो जीवितमेव वः। स हि वीरः प्रयास्यन्वै धर्मराजेन वारितः॥ हयपाने नते पार्थ हंतव्याः पार्थिवा इति। स तदा तद्वचः स्मृत्वा धर्मराजस्य धीमतः॥
तान्निवर्त्तध्वमित्याह न न्यवर्त्तंत चापि ते। ततस्त्रिगर्त्तराजानं सूर्यवर्माणमाहवे॥ निगृह्य शरजालेन प्रजहास धनंजयः। ततस्ते रथघोषेण रथनेमिस्वनेन च॥ पूरयंतो
दिशः सर्वा धनंजयमुपाद्रवन्। सूर्यवर्मा ततः पार्थे शराणां नतपर्वणां॥ शतान्यमुंचद्राजेंद्र लघ्वस्त्रमभिदर्शयन्। तथैवान्ये महेष्वासा ये तस्यानुयायिनः॥ मु-
मुचुः शरवर्षाणि धनंजयवधैषिणः॥ स तान्ज्यामुखनिर्मुक्तैर्बहुभिः सुबहून्शरान्। चिच्छेद शतधा रा जन् ते त्वमोथ पतंस्तदा॥ केतुवर्मा तु तेजस्वी तस्यैवाव-
रजो युवा। युयुधे भ्रातुरर्थाय पांडवेन यशस्विना॥ तमापतंतं संप्रेक्ष्य केतुवर्माणमाहवे। अभ्यहन्निशितैर्बाणैर्बीभत्सुः परवीरहा॥ केतुवर्मण्यभिहते धृतवर्मा
महारथः। रथेनाशु समुत्पत्य शरैर्जिष्णुमवाकिरत्॥ तस्य तां शीघ्रतां वीक्ष्य तुतोषातीव वीर्यवान्। गुडाकेशो महातेजा रणे स धृतवर्मणः॥ न संदधानं ददृशे
नाददानं च तं तदा॥ किरंतमेव स शरान् ददृशे पाकशासनिः। स तु तं पूजयामास धृतवर्माणमाहवे॥ मनसा स मुहूर्तं वै रणे समभिहर्षयन्॥ तं पन्नगमिव क्रुद्धं कुरुवीरः
रू

५१

स्मयन्निव। प्रीतिपूर्वं महाबाहुः प्राणैर्न व्यपरोपयत्॥ स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा। धृतवर्मा शरं दीप्तं मुमोच विजये तदा॥ स तेन विजयस्तूर्णमासीद्वि-
द्धः करे भृशं। मुमोच गांडिवं दुःखात्तत्पपाताथ भूतले॥ धनुषः पततस्तस्य सव्यसाचिकराद्विभो। बभूव सदृशं रूपं शक्रचापस्य पार्थिव॥ तस्मिन्निपतिते दिव्ये मह-
धनुषि पार्थिव। जहास सस्वनं हासं धृतवर्मा महाहवे॥ ततो रोषार्दितो जिष्णुः प्रमृज्य रुधिरं करात्। धनुरादत्त तद्दिव्यं शरवर्षैर्ववर्ष च॥ ततो हलहलाशब्दो दिवस्पृ-
गभवत्तदा। नानाविधानां भूतानां तत्कर्म्मातिप्रशंसतां॥ ततः संप्रेक्ष्य संक्रुद्धं कालांतकयमोपमं। जिष्णुं त्रैगर्त्तका योधाः परीताः पर्यवारयन्॥ अभिसृत्य परीप्सार्थं
ततस्ते धृतवर्मणः। परिवव्रुर्गुडाकेशं तत्राक्रुध्यद्धनंजयः॥ ततो योधान्जघानाशु तेषां दश च चाष्ट च। महेंद्रवज्रप्रतिमैरायसैर्निशितैः शरैः॥ तांस्तु भग्नान्समुप्रेक्ष्य त्व-
रमाणो धनंजयः। शरैराशीविषाकारैर्जघान स्वनवद्धसन्॥ ते भग्नमनसः सर्वे त्रैगर्त्तकमहारथाः॥ दिशोभिदुद्रुवू राजन् धनंजयशरार्द्दिताः॥ त ऊचुः पुरुषव्याघ्रं संस-
प्तकनिषूदनं। तव स्म किंकराः सर्वे सर्वे च वशगास्तव॥ आज्ञापयस्व नः पार्थ प्रह्वान्प्रेष्यानवस्थितान्। करिष्यामः प्रियं सर्वं तव कौरवनंदन॥ एतदाज्ञाय वचनं सर्वांस्तान-
ब्रवीत्तदा। जीवितं रक्षत नृपाः शासनं परिगृह्यतां॥ इत्याश्वमेधिके॥ वैशं॥ प्राग्ज्योतिषमथाभ्येत्य व्यचरत्स हयोत्तमः। भगदत्तात्मजस्तत्र निर्ययौ रणकर्कशः॥ स ह-
यं पांडुपुत्रस्य विषयांतमुपागतं। युयुधे भरतश्रेष्ठ वज्रदत्तो महीपतिः॥ सोभिनिर्याय नगराद्भगदत्तसुतो नृपः। अश्वमायांतमुन्मथ्य नगराभिमुखो ययौ॥ तमालक्ष्य
महाबाहुः कुरूणामृषभस्तदा। गांडीवं विक्षिपंस्तूर्णं सहसा समुपाद्रवत्॥ ततो गांडीवनिर्मुक्तैरिषुभिर्मोहितो नृपः। हयमुत्सृज्य तं वीरस्ततः पार्थमुपाद्रवत्॥ पुनः
प्रविश्य नगरं दंशितः स नृपोत्तमः। आरुह्य नागप्रवरं निर्ययौ रणकर्कशः॥ पांडुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि। दोधूयता चामरेण श्वेतेन च महारथः॥ ततः पार्थं समासा-
द्य पांडवानां महारथं। आह्वयामास बीभत्सुं बाल्यान्मोहाच्च संयुगे॥ स वारणं नगप्रख्यं प्रभिन्नकरटामुखं। प्रेषयामास संक्रुद्धः श्वेताश्वं प्रति पार्थिवः॥ विक्षरंतं यथा

सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदांकुशास्य च भयादुत्पतंतमिवांबुदं । तमापतंतं संप्रेक्ष्य क्रुद्धो राजन्धनंजयः । भूयिष्ठं वारणगतं योधयामास भारत ।१

मेघं परवारणवारणं । शास्त्रवत्कल्पितं संख्ये न सिंहं ... दुर्मदं । प्रचोद्यमानः स गजस्तेन राज्ञा महाबलः । वज्रदत्तस्ततः क्रुद्धो मुमोचाशु धनंजये । तोमरानग्निसंकाशान् शलभानिव वेगितान् । अर्जुनस्तानसंप्राप्तान् गांडीवप्रभवैः शरैः । द्विधा त्रिधा च चिच्छेद ख एव खगमैस्तदा । स तान्दृष्ट्वा तथा छिन्नांस्तोमरान् भगदत्तजः । इषूनसक्तांस्त्वरितः प्राहिणोत्पांडवं प्रति । ततोऽर्जुनस्तूर्णतरं स्वर्णपुंखानजिह्मगान् । प्रेषयामास संक्रुद्धो भगदत्तात्मजं प्रति । स तैर्विद्धो महातेजा वज्रदत्तो महामृधे । भृशाहतः पपातोर्व्यां न त्वेनमजहात्स्मृतिः । ततः स पुनरारुह्य वारणप्रवरं रणे । अव्यग्रः प्रेषयामास जयार्थी विजयं प्रति । तस्मै बाणांस्ततो जिष्णुर्निर्मुक्ताशीविषोपमान् । प्रेषयामास संक्रुद्धो ज्वलितान् ... जनोपमान् । स तैर्विद्धो महानागो विस्रवन् रुधिरं बभौ । गैरिकाईमिवांभो इर्बहुप्रस्रवणस्तदा ॥ इत्याश्वमेधिके वैशं । एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभ । अर्जुनस्य नरेंद्रेण वृत्रेणेव शतक्रतोः । ततश्चतुर्थे दिवसे वज्रदत्तो महाबलः । जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत् । अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे । त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि । त्वया वृद्धो मम पिता भगदत्तः पितुः सखा हतो वृद्धोऽपवायित्वा शिशुं मामद्य योधय । इत्येवमुक्त्वा संक्रुद्धो वज्रदत्तो नराधिपः । प्रेषयामास कौरव्य वारणं पांडवं प्रति । स प्रेष्यमाणो नागेंद्रो वज्रदत्तेन धीमता । उत्पतिष्यन्निवाकाशमभिदुद्राव पांडवं । अग्रहस्तप्रमुक्तेन शीकरेण स नागराट् । समौक्षत गुडाकेशं शैलं नीलमिवांबुदः । स तेन प्रेषितो राज्ञा मेघवद्विनदन्मुहुः । मुखाडंबरसंह्रादैरभ्यद्रवत फाल्गुनं । स नृत्यन्निव नागेंद्रो वज्रदत्तप्रचोदितः । आससाद द्रुतं राजन्कौरवाणां महारथं । तमायांतमथालक्ष्य वज्रदत्तस्य वारणं । गांडीवमाश्रित्य बली न व्यकंपत शत्रुहा । चुक्रोध बलवच्चापि पांडवस्तस्य पते ॥ कार्यविघ्नमनुस्मृत्य पूर्ववैरं च भारत । ततस्तं वारणं क्रुद्धः शरजालेन पांडवः । निवारयामास तदा वेलेव मकरालयं । स नागप्रवरो वीर्यादर्जुनेन निवारितः । तस्थौ शरैर्विभिन्नांगः श्वाविच्छललितो यथा । निवारि

तं नागं दृष्ट्वा भगदत्तात्मजो नृपः । उत्ससर्ज शितान्बाणानर्जुने क्रोधमूर्छितः । अर्जुनस्तु महाराज शरैः शरनिघातिभिः । वारयामास तानस्त्रांस्तदद्भुतमिवाभवत् ॥ ततः पुनरपि क्रुद्धो राजा प्राग्ज्योतिषाधिपः । प्रेषयामास नागेंद्रं बलवच्छ्वसनोपमं । तमापतंतं संप्रेक्ष्य बलवत्पाकशासनिः । नाराचमग्निसंकाशं प्राहिणोद्वारणं प्रति । स तेन वारणो राजन्मर्मण्यभिहतो भृशं । पपात सहसा भूमौ वज्ररुग्ण इवाचलः । स पतन् शुशुभे नागो धनंजयशराहतः । विशन्निव महाशैलो महीं वज्रप्रपीडितः । तस्मिन्निपतिते नागे वज्रदत्तस्य पांडवः । तं न भेतव्यमित्याह ततो भूमिगतं नृपं । अब्रवीद्धि महातेजाः प्रस्थितं मां युधिष्ठिरः । राजानस्ते न हंतव्या धनंजय कथंचन । सर्वमेतन्नरव्याघ्र भवत्वेतावता कृतं । योधाश्चापि न हंतव्या धनंजय रणे त्वया । वक्तव्याश्चापि राजानः सर्वैः सह सुहृज्जनैः । युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयतां ॥ इति भ्रातृवचः श्रुत्वा न हन्मि त्वां नराधिप । उत्तिष्ठ न भयं तेऽस्ति स्वस्तिमान्गच्छ पार्थिव । आगच्छेथा महाराज परां चैत्रीमुपस्थितां । यदाश्वमेधो भविता धर्मराजस्य धीमतः । एवमुक्तः स राजा तु भगदत्तात्मजस्तदा । तथेत्येवाब्रवीद्वाक्यं पांडवेनाभिनिर्जितः ॥ इत्याश्वमेधिके ॥ वैशं ॥ सैंधवैरभवद्युद्धं ततस्तस्य किरीटिनः । हतशेषैर्महाराज हतानां च सुतैरपि । तेऽवतीर्णमुपश्रुत्य विषयं श्वेतवाहनं । प्रत्युद्ययुरमृष्यंतो राजानः पांडवर्षभं । अश्वं च तं परामृष्य विषयांते विषोपमाः । न भयं चक्रिरे पार्थाद्भीमसेनादनंतरात् । ते विदूरादधनुष्पाणिं यज्ञियस्य हयस्य च । बीभत्सुं प्रत्यपद्यंत पदातिनमवस्थितं । ततस्ते तं महावीर्या राजानः पर्यवारयन् । जिगीषंतो नरव्याघ्रं पूर्वं विनिकृता युधि । ते नामान्यथ गोत्राणि कर्माणि विविधानि च । कीर्तयंतस्तदा पार्थं शरवर्षैरवाकिरन् । ते किरंतः शरव्रातान्वारणेंद्रनिवारणान् । रणे जयमभीप्संतः कौंतेयं पर्यवारयन् । ते समीक्ष्य च तं कृष्णमुग्रकर्माणमाहवे । सर्वे युयुधिरे वीरा रथस्थास्तं पदातिनं । ते तमाजघ्निरे वीरं निवातकवचांतकं । संशप्तकनिहंतारं हंतारं सैंधवस्य च । ततो रथसहस्रेण हयानामयुतेन च । कोष्ठकीकृत्य बीभत्सुं प्रहृष्टमनसोऽभवन् । संस्मरंतो वधं वीरा सिंधुराज्ञस्य वाहवे । तय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व·
५३

इयस्य कौरव्य समरे सव्यसाचिना। ततः पर्जन्यवत्सर्वे शरवृष्टीरवासृजन्। तैः कीर्णः शुशुभे पार्थो रविर्मेघांतरे यथा॥ सशरैः समरे छन्नश्चकाशे पांडवर्षभः। पंजरां
तरसंचारी शकुंतइव भारत। ततो हाहाकृतं सर्वं कौंतेये शरपीडिते। त्रैलोक्यमभवद्राजन् [illegible] रजो रणे। ततो ववौ महाराज मारुतो लोमहर्षणः। राहुरग्र
सदादित्यं युगपत्सोममेव च। उल्काश्च जघ्निरे सूर्यं विकीर्यंत्यः समंततः। वेपथुश्चाभवद्राजन्कैलासस्य महागिरेः। मुमुचुश्चास्वमत्युष्णं दुःखशोकसमन्विताः।
सप्तर्षयो जातभयास्तथा देवर्षयोपि च। शशश्चाशु विनिर्भिद्य मंडलं शशिनोपतत्। विपरीता दिशश्चैव सर्वा धूमाकुलास्तथा। रासभारुणसंकाशा धनुष्मंतः स
विद्युतः। आवृत्य गगनं मेघा मुमुचुर्मांसशोणितं। एवमासीत्तदा वीरे शरवर्षेणसंवृते। फाल्गुने भरतश्रेष्ठ तदद्भुतमिवाभवत्। तस्य तेनावकीर्णस्य शरजाले
न सर्वशः। मोहात्पपात गांडीवं आवापश्च करादपि। तस्मिन्मोहमनुप्राप्ते शरजालं महत्तदा। सैंधवा मुमुचुस्तूर्णं गतसत्वे महारथे। ततो मोहं समापन्नं ज्ञात्वा पार्थं दि
वौकसः। सर्वे वित्रस्तमनसस्तस्य शांतिपरा भवन्। ततो देवर्षयः सर्वे तथा सप्तर्षयोपि च। ब्रह्मर्षयश्च विजयं [illegible]ः पार्थस्य धीमतः। ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव।
तस्थावचलवद्धीमान्संग्रामे परमास्त्रवित्। [illegible]। विचकर्ष धनुर्दिव्यं ततः कौरवनंदनः। यंत्रस्येवेह शब्दोभूत्तु महांस्तस्य पुनः पु
नः। ततः स शरवर्षाणि प्रत्यमित्रान्प्रति प्रभुः। ववर्ष धनुषा पार्थो वर्षाणीव सुरेश्वरः। [illegible]। ततस्ते सैंधवा योधाः सर्व एव स
राजकाः। नादृश्यंत शरैः कीर्णाः शलभैरिव पावकाः। तस्य शब्देन वित्रेसुर्भयार्ताश्च विदुद्रुवुः। मुमुचुश्चाश्रु शोकार्ताः शुशुचुश्चापि सैंधवाः। तांस्तु सर्वान्नरव्या
घ्रः सर्वतो व्यचरद्बली। कुलालचक्रवद्राजञ्शरजालैः समार्पयत्। तदिंद्रजालप्रतिमं बाणजालममित्रहा। व्यसृजद्दिक्षु सर्वासु महेंद्र इव वज्रभृत्। मेघजालनिभं
सैन्यं विदार्य शरवृष्टिभिः। विबभौ कौरवश्रेष्ठः शरदीव दिवाकरः॥ इत्याश्वमेधिके ॥ वैशं ॥ ततो गांडीवभृच्छूरो युद्धाय समुपस्थितः। विबभौ युधि दुर्धर्षो हिमवानिव

७५

५३

लो यथा। ततस्ते सैंधवा योधाः पुनरेव व्यवस्थिताः। व्यमुंचंत सुसंरब्धाः शरवर्षाणि भारत। तान्प्रहस्य महावीर्यः पुनरेव व्यवस्थितान्। ततः प्रोवाच कौंतेयो मुमूर्षूञ्श्ल
क्ष्णया गिरा। युध्यध्वं परया शक्त्या यतध्वं विजये मम। कुरुध्वं सर्वकार्याणि महद्वो भयमागतं। एष योत्स्यामि सर्वांस्तु निवार्य शरवागुरां। तिष्ठध्वं युद्धमनसो दर्पं वि
नयितास्मि वः। एतावदुक्त्वा कौरव्यो रोषाद्गांडीवधृक्तदा। ततोथ वचनं स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत। न हंतव्या रणे तात क्षत्रिया विजिगीषवः। जेतव्याश्चेति यत्प्रोक्तं ध
र्मराज्ञा महात्मना। चिंतयामास स तदा फाल्गुनः पुरुषर्षभः। इत्युक्तोहं नरेंद्रेण न हंतव्या नृपा इति। कथं तन्न मृषेदं स्याद्धर्मराजवचः शुभं। न हन्येरंश्च राजानो राज्ञश्चा
ज्ञा कृता भवेत्। इति संचिंत्य स तदा प्रोवाच प्रियहिते रतः। प्रोवाच वाक्यं धर्मज्ञः सैंधवान्युद्धदुर्मदान्। बालान्स्त्रियो वा युष्माकं न हन्स्ये समरस्थितान्। यश्च वक्ष्यति संग्रामे
तवास्मीति पराजयः। प्रोवाच वाक्यं धर्मज्ञः सैंधवान्युद्धदुर्मदान्। बालान्स्त्रियो वा युष्माकं न हन्स्ये समरस्थितान्। यश्च वक्ष्यति संग्रामे तवास्मीति पराजितः। एतच्छ्रु
त्वा वचो मह्यं कुरुध्वं हितमात्मनः। ततोन्यथा कृच्छ्रगता भविष्यथ मयार्दिताः। एवमुक्त्वा तु तान्वीरान्युयुधे कुरुपुंगवः। अर्जुनोतीव संक्रुद्धः संक्रुद्धैर्विजिगीषुभिः। शतं
शतसहस्राणि शराणां नतपर्वणां। मुमुचुः सैंधवा राजंस्तदा गांडीवधन्वनि। शरानापततः क्रूरानाशीविषविषोपमान्। चिच्छेद निशितैर्बाणैरंतरा स धनंजयः। छित्वा
च तानाशु वै तान्कंकपत्राञ्छिलाशितान्। एकैकमेव दशभिर्बिभेद समरे शरैः। ततः प्रासांश्च शक्तीश्च पुनरेव धनंजये। जयद्रथं हतं स्मृत्वा चिक्षिपुः सैंधवा नृपाः। तेषां
किरीटी संकल्पं मोघं चक्रे महाबलः। सर्वांस्तानंतरा छित्वा तदा चुक्रोश पांडवः। तथैवापततां तेषां योधानां जयगृद्धिनां। शिरांसि पातयामास भल्लैः सन्नतपर्वभिः। तेषां
तेषां च तां चैव पुनरेव च धावतां। निवर्त्ततां च शब्दोभूत्पूर्णस्येव महोदधेः। ते वध्यमानास्तु तदा पार्थेनामिततेजसा। यथाबलं यथोत्साहं योधयामासुरर्जुनं। ततस्ते फाल्गु
नेनाजौ शरैः सन्नतपर्वभिः। कृता विसंज्ञा भूयिष्ठाः क्लांतवाहनसैनिकाः। तांस्तु सर्वान्परिम्लानान्विदित्वा धृतराष्ट्रजा। दुःशला बालमादाय नप्तारं प्रययौ तदा। सुरथस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
५४

सुतं वीरं रथे नानागसंनद्ध। शांत्यर्थं सर्वयोधानामभ्यागछत पांडवं। साधनंजयमासाद्य रुरोदार्त्तस्वरं तदा। धनंजयोपि तां दृष्ट्वा धनुर्विससृजे प्रभुः। समुत्सृज्य धनुः प
र्थो विधिवद्भगिनीं तदा। प्राह किंकरवाणीति सा च तं वचनमब्रवीत्। एष ते भरतश्रेष्ठ स्वस्रीयस्यात्मजः प्रभुः। [illegible] शिशुः। अभिवादयते पार्थ तं पश्य
पुरुषर्षभ। इत्युक्तस्तस्य पितरं स पप्रच्छार्जुनस्तदा। क्वासाविति ततो राजन्दुःशला वाक्यमब्रवीत्। पितृशोकाभिसंतप्तो विषादार्त्तोस्य वै पिता। पंचत्वमगमद्वी
र यथा तन्मे निबोध वै। स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वयानघ। त्वामागतं च संश्रुत्य युद्धाय हयसारिणं। पितुश्च मृत्युं दुःखार्त्तो जहौ प्राणान्धनंजय। प्राप्तो बीभत्सु
रित्येव नाम श्रुत्वैव ते कथं। विषादार्त्तः पपातोर्व्यां ममार च ममात्मजः। तं दृष्ट्वा पतितं तत्र ततस्तस्यात्मजं प्रभो। गृहीत्वा समनुप्राप्ता त्वामद्य शरणैषिणी। इत्युक्त्वा
र्त्तस्वरं सा तु रुरोद धृतराष्ट्रजा। दीना दीनं स्थितं पार्थमब्रवीच्चाप्यधोमुखं। स्वसारं मम वेक्षस्व स्वस्रीयात्मजमेव च। कर्तुमर्हसि धर्मज्ञ दयां कुरुकुलोद्वह।
विस्मृत्य कुरुराजानं तं च मंदं जयद्रथं। अभिमन्योर्यथा जातः परीक्षित्परवीरहा। तथायं सुरथाज्जातो मम पौत्रो महाभुजः। यमादाय नरव्याघ्र संप्राप्तास्मि
तवांतिकं। शमार्थं सर्वयोधानां शृणु चेदं वचो मम। एष प्रसाद्य शिरसा प्रशमार्थमरिंदम। याचते त्वां महाबाहो शमं गच्छ धनंजय। बालस्य हतबंधोश्च पार्थ
किंचिदजानतः। प्रसादं कुरु धर्मज्ञ मा मन्युवशमन्वगाः। तमनार्यं नृशंसं च विस्मृत्यास्य पितामहं। आगस्कारिणमत्यर्थं प्रसादं कर्तुमर्हसि। एवं ब्रुवत्यां
करुणं दुःशलायां धनंजयः। संस्मृत्य देवीं गांधारीं धृतराष्ट्रं च पार्थिवं। प्रोवाच दुःखशोकार्त्तः क्षत्रधर्मं विगर्हयन्। धिक्तं दुर्योधनं मंदं राज्यलुब्धं च मानिनं।
यत्कृते बांधवाः सर्वे मया नीता यमक्षयं। इत्युक्त्वा बहु सांत्वादि प्रसादमकरोज्जयः। परिष्वज्य च तां प्रीतो विससर्ज गृहान्प्रति। दुःशला चापि तान्योधानभिवा ५४
त्य र्य महतो रणात्। संपूज्य पार्थं प्रययौ गृहानेव शुभानना। एवं निर्जित्य तान्वीरान्सैंधवान्स धनंजयः। अन्वधावत धावंतं तं हयं कामचारिणं। तारामृगमिवाकाशे यथा देवः नदा

आगतोयं महाबाहो कुरुराजस्य मंदस्य पौत्रकः। प्रसादमस्य बालस्य तस्मात्त्वं कर्तुमर्हसि।८ संचरन्यज्ञियं वीरो विधिवत्तं विशांपते।२

पिनाकधृक्। ससार तं तथा वीरो विधिवद्यज्ञियं हयं। स च वाजी यथेष्टेन तांस्तान्देशान्यथाक्रमं। विचचार यथाकामं कर्म पार्थस्य वर्धयन्। क्रमेण स हय
स्त्वेवं विचरन्भरतर्षभ। मणिपूरपतेर्देशमुपायात्सह पांडवः। श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः। निर्ययौ विनयेनाथ ब्राह्मणाग्र्यपुरःसरः। मणिपू
रेश्वरं त्वेवमुपायातं धनंजयः। नाभ्यनंदत्स मेधावी क्षत्रधर्ममनुस्मरन्। उवाच वचनं धर्मात्मा समन्युः फाल्गुनस्तदा। प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मतः।
संरक्ष्यमाणं तुरगं यौधिष्ठिरमुपागतं। यज्ञियं विषयांते मां नायोत्सीः किं नु पुत्रक। धिक्त्वामस्तु सुदुर्बुद्धे क्षत्रधर्मबहिष्कृतं। यो मां युद्धाय संप्राप्तं साम्नैवा
थ त्वमग्रहीः। न त्वया पुरुषार्थो हि कश्चिदस्तीह जीवता। यस्त्वं स्त्रीवद्युधा प्राप्तं मां साम्ना प्रत्यगृह्णथाः। यद्यहं न्यस्तशस्त्रस्त्वामागच्छेयं सुदुर्मते। प्रक्रियेयं भवेद्यु
क्ता तव स्यान्नराधम। तमेवमुक्तं भर्त्रा तु विदित्वा पन्नगात्मजा। अमृष्यमाणा भित्त्वोर्वीमुलूपी समुपागमत्। सा ददर्श ततः पुत्रं विमृशंतमधोमुखं। संतर्ज्यमा
नमसकृद्भर्त्रा युद्धार्थिना प्रभो। ततः सा चारुसर्वांगी तमुपेत्योरगात्मजा। उलूपी प्राह वचनं धर्म्यं धर्मविशारदं। उलूपीं मां निबोध त्वं मातरं पन्नगात्मजां।
कुरुष्व वचनं पुत्र धर्मस्ते भविता पुनः। मनश्चक्रे महातेजा युद्धाय भरतर्षभ। सन्नह्य कांचनं वर्म शिरस्त्राणं च भानुमत्। तूणीरशतसंबाधमारुरोह रथोत्तमं।
सर्वोपकरणोपेतं युक्तमश्वैर्मनोजवैः। सचक्रोपस्करं श्रीमान्हेमभांडपरिष्कृतं। परमार्चितमुच्छ्रित्य ध्वजं सिंहं हिरण्मयं। प्रययौ पार्थमुद्दिश्य स राजा बभ्रु
वाहनः। ततोभ्येत्य हयं वीरो यज्ञियं पार्थरक्षितं। ग्राहयामास पुरुषैर्हयशिक्षाविशारदैः। गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा स धनंजयः। पुत्रं रथस्थं भूमिष्ठः
संन्यवारयदाहवे। स तत्र राजा तं वीरं शरसंघैरनेकशः। अर्दयामास निशितैराशीविषविषोपमैः। तयोः समभवद्युद्धं पितुः पुत्रस्य चातुलं। देवासुररणप्र

युध्यस्वैनं कुरुश्रेष्ठं धनंजयमरिंदम। पार्थ एव हि ते प्रीतो भविष्यति न संशयः। एवं प्रधर्षितो मात्रा स राजा बभ्रुवाहनः।४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
५५

त्यसुतयोः क्रीयमाणयोः। किरीटिनं स विव्याध शरेणानतपर्वणा। जत्रुदेशे नरव्याघ्रं प्रहसन्बभ्रुवाहनः। सोभ्यगात्सह पुंखेन वल्मीकमिव पन्नगः। विनिर्भि
द्य कौंतेयं प्रविवेश महीतलं। स गाढवेदनो धीमानालंब्य धनुरुत्तमं। दिव्यं तेजः समाविश्य प्रमीत इव सोभवत्। स संज्ञामुपलभ्याथ प्रशस्य पुरुषर्षभः।
पुत्रं शक्रात्मजो वाक्यमिदमाह महाद्युतिः। साधु साधु महाबाहो वत्स चित्रांगदात्मज। सदृशं कर्म्म ते दृष्ट्वा प्रीतिमानस्मि पुत्रक। विमुंचाम्येष ते बाणान्पु
त्र युद्धे स्थिरो भव। इत्येवमुक्त्वा नाराचैरभ्यवर्षदमित्रहा। तान्स गांडीवनिर्मुक्तान्वज्राशनिसमप्रभान्। नाराचानच्छिनद्राजा भल्लैः सर्वान्द्विधा त्रिधा। तस्य पा
र्थः शरैर्दिव्यैर्ध्वजं हेमपरिष्कृतं। सुवर्णतालप्रतिमं क्षुरेणापाहरद्रथात्। हयांश्चास्य महाकायान्महावेगानरिंदम। चकार राजन्निर्जीवान्प्रहसन्निव पांडवः।
स रथादवतीर्य्याथ राजा परमकोपनः। पदातिः पितरं क्रुद्धो योधयामास पांडवं। संप्रीयमाणः पार्थानामृषभः पुत्रविक्रमात्। नात्यर्थं पीडयामास पुत्रं वज्रध
रात्मजः। स मन्यमानो विमुखं पितरं बभ्रुवाहनः। शरैराशीविषाकारैः पुनरेवार्दयद्बली। ततः स बाल्यात्पितरं विव्याध हृदि पत्रिणा। निशितेन सुपुंखेन बल
वद्बभ्रुवाहनः। स बाणस्तेजसा दीप्तो ज्वलन्निव हुताशनः। विवेश पांडवं वेगान्मर्म्म भित्त्वातिदुःखकृत्। स तेनातिभृशं विद्धः पुत्रेण कुरुपुंगवः। महीं जगा
म मोहाविष्टस्ततो राजन्धनंजयः। तस्मिन्निपतिते वीरे कौरवाणां धुरंधरे। सोपि मोहं जगामाथ ततश्चित्रांगदासुतः। व्यायम्य संयुगे राजा दृष्ट्वा च पितरं हतं।
पूर्व्वमेव स बाणौघैर्गाढविद्धोर्जुनेन ह। पपात सोपि धरणीमालिंग्य रणमूर्द्धनि। भर्त्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि। चित्रांगदा परित्रस्ता प्रविवेश रणाजि
रं। शोकसंतप्तहृदया रुदती वेपती भृशं। मणिपूरपतेर्म्माता ददर्श निहतं पतिं। ॥ इत्याश्वमेधिके वैशं ॥ ततो बहुतरं भीरु विलप्य कमलेक्षणा। मुमोह दुःख
संतप्ता पपात धरणीतले। प्रतिलभ्य ततः संज्ञां देवी दिव्यवपुर्धरा। उलूपीं पन्नगसुतां दृष्ट्वेदं वाक्यमब्रवीत्। उलूपि पश्य भर्त्तारं शयानं निहतं रणे। त्वत्कृते मम

५५

नन्तु यमार्य्ये धर्मज्ञा नन्तु यापि पतिव्रता। यत्कृतेयं हि निहतः पतिर्मे घमहारणे। किं तु अस्य पराधोयं यद्गतोयं धनंजय ॥ उलूपुत्राय ॥ १

॥ चित्रांगदोवाच ॥

पुत्रेण बालेन समितिंजयः। क्षमस्व याच्यमाना वै जीवयस्व धनंजयं। ननु त्वमार्य्ये धर्मज्ञा त्रैलोक्ये विदिता शुभे। यद्घातयित्वा पुत्रेण भर्त्तारं नानुशोचसि। ना
हं शोचामि तनयं हतं पन्नगनंदिनि। पतिमेव तु शोचामि यस्यातिथ्यमिदं कृतं। इत्युक्त्वा सा तदा देवी उलूपीं पन्नगात्मजां। भर्त्तारमभिगम्येदमित्युवा
च यशस्विनी। उत्तिष्ठ कुरुमुख्यस्य प्रियकाम मम प्रिय। अयमश्वो महाबाहो मया ते परिमोक्षितः। ननु त्वया नाम विभो धर्मराजस्य यज्ञियः। अयम
श्वोनुसर्त्तव्यः स शेषे किं महीतले। त्वयि प्राणाः समायत्ताः कुरूणां कुरुनंदन। स कस्मात्प्राणदोन्येषां प्राणान्संत्यक्तवानसि। उलूपि साधु पश्येमं
पतिं निपतितं भुवि। पुत्रं चैमं समुत्साह्य घातयित्वा न शोचसि। कामं स्वपितु बालोयं भूमौ मृत्युवशं गतः। लोहिताक्षो गुडाकेशो विजयः साधु जीवतु।
नापराधोस्ति सुभगे नराणां बहुभार्य्यता। प्रमदानां भवत्येष मा ते भूद्बुद्धिरीदृशी। सख्यं चैतत्कृतं धात्रा शश्वदव्ययमेव तु। सख्यं समभिजानीहि सत्यं सं
गतमस्तु ते। पुत्रेण घातयित्वेमं पतिं यदि न मेद्य वै। जीवंतं दर्शयस्यद्य परित्यक्ष्यामि जीवितं। साहं दुःखान्विता देवी पतिपुत्रविनाकृता। इहैव प्राय
मासिष्ये प्रेक्षंत्यास्ते न संशयः। इत्युक्त्वा पन्नगसुतां सपत्नीं चैत्रवाहिनी। ततः प्रायमुपासीना तूष्णीमासीज्जनाधिप ॥ इत्याश्वमेधिके वैशं ॥ ततो
विलप्योपरता भर्त्तुः पादौ प्रगृह्य सा। उपविष्टाभवद्देवी सोच्छ्वासं पुत्रमीक्षती। ततः संज्ञां पुनर्लब्ध्वा स राजा बभ्रुवाहनः। मातरं तामथालोक्य रणभूमा
वथाब्रवीत्। इतो दुःखतरं किं नु यन्मे माता सुखैधिता। भूमौ निपतितं वीरमनुशेते मृतं पतिं। निहंतारं रणेरीणां सर्वशस्त्रभृतां वरं। मया विनिहतं संख्ये
प्रेक्षते दुर्मरं बत। अहोस्या हृदयं देव्या दृढं यन्न विदीर्यते। व्यूढोरस्कं महाबाहुं प्रेक्षंत्या निहतं पतिं। दुर्मरं पुरुषेणेह मन्ये ह्यध्वन्यनागते। यत्र नाहं न मे मा
ता विप्रमुच्येत जीविताः। हाहाधिक्कुरुवीरस्य [illegible] कांचनं धनुः। अपविद्धं हतस्येह मया पुत्रेण पश्यत। भो भो पश्यत मे वीरं पितरं ब्राह्मणा भुवि।

चैत्रवाहनी

स्कं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
५६

स२

शयानं वीरशयने मया पुत्रेण पातितं। ब्राह्मणं कुरुमुख्यः पश्येयुः क्वाहय मरिंदम॥ ऊर्ध्वं तु शांतिकं राज्ञ्यः एणाये यां मया हता। व्यादिशंतु च किं विप्राः प्रायश्चि
त्तमिहाद्य मे। सुनृशंसस्य पापस्य पितृहंतू रणाजिरे। इह त्वाद्य द्वादशसमा हत्वा पितरमद्य वै। ममेह सुनृशंसस्य संवीतस्यास्य चर्मणा। शिरःकपाले चास्यैव युंजं
तः पितुरद्य मे। प्रायश्चित्तं हि नास्त्यद्य हत्वाद्य पितरं मम। पश्य नागोत्तमसुते भर्तारं निहतं मया। कृतं प्रियं मया तेऽद्य निहत्य समरेऽर्जुनं। सोऽहमद्य गमिष्यामि
गतिं पितृनिषेवितां। न शक्नोम्यात्मनात्मानमहं धारयितुं शुभे। सा त्वं मयि मृते मातस्तथा गांडीवधन्विनि। भव प्रीतिमती देवि सत्येनात्मानमालभे। इत्युक्त्वा
स ततो राजा दुःखशोकसमाहतः। उपस्पृश्य महाराजा दुःखाद्वचनमब्रवीत्। शृण्वंतु सर्वभूतानि स्थावराणि चराणि च। त्वं च मातर्यथा सत्यं ब्रवीमि भुजगो
त्तमे। यदि नोत्तिष्ठति जयः पिता मे नरसत्तमः। अस्मिन्नेव रणोद्देशे शोषयिष्ये कलेवरं। न हि मे पितरं हत्वा निष्कृतिर्विद्यते क्वचित्। नरकं प्रतिपत्स्यामि ध्रुवं गुरुव
धार्दितः। वीरं हि क्षत्रियं हत्वा गोशतेन प्रमुच्यते। पितरं हि निहत्यैवं दुर्लभा निष्कृतिर्मम। एष एको महातेजाः पांडुपुत्रो धनंजयः। पिता च मम धर्मात्मा तस्य
मे निष्कृतिः कुतः। इत्येवमुक्त्वा नृपते धनंजयसुतो नृपः। उपस्पृश्याभवत्तूष्णीं प्रायोपेतो महामतिः॥ ॥ इत्याश्वमेधिके पर्वणि प्रायोपविष्टे नृपतौ मणिपूरेश्व
रे तदा। पितृशोकसमाविष्टे सह मात्रा परंतप। उलूपी चिंतयामास तदा संजीवनं मणिं। स चोपातिष्ठत तदा पन्नगानां परायणं। तं गृहीत्वा तु कौरव्य कुरव्य
कुलनंदिनी। मनःप्रह्लादिनीं वाचं सैनिकानामथाब्रवीत्। उत्तिष्ठ मा शुचः पुत्र नैष जिष्णुस्त्वया हतः। अजेयः पुरुषैरेष तथा देवैः सवासवैः। मया तु मोहि
नी नाम मायैषा संप्रदर्शिता। प्रियार्थं पुरुषेंद्रस्य पितुस्तेऽद्य यशस्विनः। जिज्ञासुर्ह्येष पुत्रस्य बलस्य तव कौरव। संग्रामे युध्यतो राजन्नागतः परवीरहा। तस्मा
दसि मया पुत्र युद्धाय परिचोदितः। मा पापमात्मनः पुत्र शंकेथा ह्यण्वपि प्रभो। ऋषिरेष महानात्मा पुराणः शाश्वतोऽक्षरः। नैनं शक्तो हि संग्रामे जेतुं शक्रोऽपि

५६

न

पुत्रक। अयं तु मे मणिर्दिव्यः समानीतो विशांपते। मृतान्मृतान्पन्नगेंद्रान्यो जीवयति नित्यदा। एनमस्योरसि त्वं च स्थापय पितुः प्रभो। संजीवितं तदा पार्थं
स त्वं द्रष्टासि पांडवं। इत्युक्तः स्थापयामास तस्योरसि मणिं तदा। पार्थस्यामिततेजाः स पितुः स्नेहात्पापकृत्। तस्मिन्न्यस्ते मणौ वीरो जिष्णुरुज्जीवितः प्रभुः।
चिरसुप्त इवोत्तस्थौ मृष्टलोहितलोचनः। तमुत्थितं महात्मानं लब्धसंज्ञं मनस्विनं। समीक्ष्य पितरं स्वस्थं ववंदे बभ्रुवाहनः। उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीव
ति प्रभो। दिव्याः सुमनसः पुण्या ववर्ष पाकशासनः। अनाहता दुंदुभयो विनेदुर्मेघनिस्वनाः। साधु साध्विति चाकाशे बभूव सुमहास्वनः। उत्थाय च महा
बाहुः पर्याश्वस्तो धनंजयः। बभ्रुवाहनमालिंग्य समाजिघ्रत मूर्धनि। ददर्श चापि दूरेऽस्य मातरं शोककर्शितां। उलूप्या सह तिष्ठंतीं ततोऽपृच्छद्धनंजयः। कि
मिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत्। रणाजिरममित्रघ्न यदि जानासि शंस मे। जननी च किमर्थं ते रणभूमिमुपागता। नागेंद्रदुहिता चेयमुलूपी किमि
हागता। जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतं। स्त्रीणामागमने हेतुमहमिच्छामि वेदितुं। तमुवाच तदा पृष्टो मणिपूरपतिस्तदा। प्रसाद्य शिरसा विद्वानु
लूपी पृच्छ्यतामिदं॥ इत्याश्वमेधिके। ॥ अर्जुन उवाच॥ किमागमनकृत्यं ते कौरव्यकुलनंदिनि। मणिपूरपतेर्मातुश्च तथैव च रणाजिरे। अकार्षं महमज्ञानाद
यं वा बभ्रुवाहनः। कच्चित्तु राजपुत्री ते सपत्नी चैव भामिनी। चित्रांगदा वरारोहा नापराध्यति किंचन। तमुवाचोरगपतेर्दुहिता प्रहसंत्यथ। न मे त्वमपराद्धो
सि न नृपो बभ्रुवाहनः। न जनित्री तथास्येयं मम या प्रेष्यवत्स्थिता। श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितं। न मे कोपस्त्वया कार्यः शिरसा त्वां प्रसादये। त्व
त्प्रियार्थं हि कौरव्य कृतमेतन्मयानघ। यत्त्वं शृणु महाबाहो निखिलेन धनंजय। महाभारतयुद्धे यत्त्वया शांतनवो नृपः। अधर्मेण हतः पार्थ तस्यैषा नि
ष्कृतिः कृता। न हि भीष्मस्त्वया वीर युध्यमानो निपातितः। शिखंडिना तु संयुक्तस्तमाश्रित्य हतस्त्वया। तस्य शांतिमकृत्वा तु त्यजेथा यदि जीवितं। कर्म

कच्चित्कुशलं का मासिरा प्रोस्य नु अगात्मजे। मम चाच पल्ला पांनिकच्चित्त्वं शुभ्रं मि छसि। कच्चित्ते पृथुलश्रोणि नाप्रियं शुभदर्शने। ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
५७

णातेनपापेनपतेथानिरयेध्रुवं।एषातेविहिताशांतिःपुत्रार्द्धंत्रासवानसि।वसुभिर्वसुधापालगंगायांचमहामते।पुराहिश्रुतमेतद्वैवसुभिःकथितंमया।
गंगायाःसन्निधौराजन्हतेशांतनवेनृपे।आप्लुत्यदेवावसवःसमेत्यचमहानदीं।इदमूचुर्वचोघोरंभागीरथ्यामतेतदा।एषशांतनवोभीष्मोनिहतःसव्यसा
चिना।अयुध्यमानःसंग्रामेसंयुक्तोन्येनमाविनि।तदनेनानिषंगेणवयमद्यधनंजयं।शापेनयोजयामेत्युक्तवत्याह्वितिवसाब्रवीत।तदहंपितुरावेद्य
भृशंप्रव्यथितेंद्रिया।अभवंसवतक्रांत्वाविषादमगमंतदा।पितातुमेवसूनात्वात्वदर्थेममयाचत।पुनःपुनःप्रसाद्यैनांसएनमिदमब्रुवन्।पुत्रस्तस्यम
हाभागमणिपूरेश्वरोयुवा।सएनंरणमध्यस्थःशरैःपातयिताभुवि।एवंकृतेसनागेंद्रमुक्तःशापोभविष्यति।गच्छेतिवसुभिःप्रोक्तोममवेदंशशंसमः।त
क्(?)ज्ञात्वंमयातस्माच्छापादसिविमोक्षितः।नहित्वांदेवराजोपिसमरेषुपराजयेत्।आत्मापुत्रःस्मृतस्तस्मात्तेनेहासिपराजितः।नहिदोषोममतःकथं
वामन्यसेविभो।इत्येवमुक्तोविजयःप्रसन्नात्माब्रवीदिदं।सर्वमेतत्सुप्रियंदेवियद्देविकृतवत्यसि।इत्युक्त्वासोब्रवीत्पुत्रंमणिपूरपतिंजयः।चित्रांगदायाःशृ
एवंतपाःकौरव्यइहितुसदा।युधिष्ठिरस्याश्वमेधःपरांचैत्रीभविष्यति।तत्रागच्छेःसहामात्योमातृभ्यांसहितोनृप।इत्येवमुक्तःपार्थेनसराजावभ्रुवाहनः।उ
वाचपितरंधीमा(न्)।इदमश्वाविलंबेनकृतः।उपायास्याभिधर्मस्यभवतःशासनादहं।अश्वमेधेमहायज्ञेद्विजातिपरिवेषकः।ममत्वनुग्रहार्थायप्रविशस्वपु
रीस्वकां।भार्याभ्यांसहधर्मज्ञमाभूत्तेत्रविचारणा।उषित्वेहनिशामेकांसुखंस्वभवनेप्रभो।पुनरश्वानुगमनंकर्तासिजयतांवर।इत्युक्तःसतुपुत्रेणतदावा
नरकेतनः।स्मयन्नुवाचकौंतेयस्तदाचित्रांगदासुतं।विदितंतेमहाबाहोयथादीक्षांचराम्यहं।नसतावत्प्रवेक्ष्यामिपुरंतेपृथुलोचन।यथाकामंव्रजत्येष
यज्ञियोश्वोनरर्षभ।स्वस्तितेस्तुगमिष्यामिनस्थानंविद्यतेमम।सतत्रविधिवत्तेनपूजितःपाकशासनिः।भार्याभ्यामभ्यनुज्ञातःप्रायाद्भरतसत्तमः। अश्वा

५७

८० अ:२

सि

नुसारीवैश्रीमान्सतुवाजीसमुद्रांतांपर्यटद्वसुधामिमां।निवृत्तोभिमुखोराजन्येनवारणसाह्वयं।अनुगच्छंस्तुरगंनिवृत्तोथकिरीटभृत्।यदृच्छयासमापेदेपुरंराज
गृहं तदा।तमभ्यासगतंदृष्ट्वाजरासंधात्मजात्मजः।क्षत्रधर्मेस्थितोवीरःसमरायाजुहावच।ततःपुरात्सनिष्क्रम्यरथीधन्वीशरीतली।मेघसंधिःपदातिंतंधनंज
यमुपाद्रवत्।आसाद्यचमहातेजामेघसंधिर्धनंजयं।बालवद्वाक्यमहाराजसोवाचेदंनकौशलात्।किमयंचार्यतेवाजीस्त्रीमध्यइवभारत।हयमेनंहरिष्यामिप्रय
तस्वविमोक्षणे।अप्रदत्तायनेमेयुद्धेयदिदित्येपरैःपास्यसे।करिष्यामितवातिथ्यंप्रहरप्रहरामिवा।इत्युक्तःप्रत्युवाचैनंप्रहसन्निवपांडवः।विघ्नकर्तामयावार्यइति
मेव्रतमाहितं।भ्रात्राज्येष्ठेननृपतेतवापिविदितंध्रुवं।प्रहरस्वयथाशक्तिनमन्युर्विद्यतेमम।इत्युक्तःप्राहरत्पूर्वंपांडवंमगधेश्वरः।किरन्शरसहस्राणिवर्षाणि
वसहस्रदृक्।ततोगांडीवभृच्छूरोगांडीवप्रहितैःशरैः।चकारमोघांस्तान्बाणानयत्नाद्भरतर्षभः।समोघंतस्यबाणौघंकृत्वावानरकेतनः।शरान्मुमोचज्वलितान्
दीप्तास्यानिवपन्नगान्।ध्वजेपताकादंडेषुरथयंत्रेहयेषुच।अन्येषुचरथांगेषुनशरीरेनसारथौ।संरक्ष्यमाणःपार्थेनशरीरेसव्यसाचिना।मन्यमानःस्ववीर्यंतंमाग
धःप्राहिणोच्छरान्।ततोगांडीवधन्वातुमागधेनभृशाहतः।बभौवसंतसमयेपलाशःपुष्पितोयथा।अवध्यमानःसोभ्यघ्नन्मागधःपांडवर्षभं।तेनतस्थौससंकौरव्य
लोकवीरस्यदर्शने।सव्यसाचीतुसंक्रुद्धोविकृष्यबलवद्धनुः।हयांश्चकारनिर्जीवान्सारथेश्चशिरोहरत्।धनुश्चास्यमहच्चित्रंक्षुरेणप्रचकर्तह।हस्तावापंपता
कांध्वजंचास्यन्यपातयत्।सराजाव्यथितोव्यश्वोविधनुर्हतसारथिः।गदामादायकौंतेयमभिदुद्राववेगवान्।तस्यापततएवाशुगदांहेमपरिष्कृतां।शरैश्चकर्तब
हुधाबहुभिर्गृध्रवाजितैः।सागदासगदीभूताविशीर्णमणिबंधना।व्यालीविमुच्यमानेवपपातधरणीतले।विरथंविधनुष्कंचगदयापरिवर्जितं।नैच्छन्मारयि
तुंधीमानर्जुनःसमवलायणी।ततएनंविमनसंक्षत्रधर्मेव्यवस्थितं।सांत्वपूर्वमिदंवाक्यमब्रवीत्कपिकेतनः।पर्याप्तःक्षत्रधर्मोयंदर्शितःपुत्रगम्यतां।बह्वेतत्समरेकर्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
५८

तवबालस्य पार्थिव। युधिष्ठिरस्य संदेशो न हंतव्या नृपा इति। तेन जीवसि राजंस्त्वमपराद्धोपि मे रणे। इति मत्वा तदा त्मानं प्रत्यादिष्टं स मागधः। तथ्यमित्यभिगम्यैनं प्रांजलिः प्रत्यपूजयत्। तमर्जुनः समाश्वास्य पुनरेवेदमब्रवीत्। आगंतव्यं परां चैत्रीमश्वमेधे नृपस्य नः। इत्युक्तः स तथेत्युक्त्वा पूजयामास तं हयं। फाल्गुनं च युधां श्रेष्ठं विधिवत्सहदेवजः। ततो यथेष्टमगमत्पुनरेव स केशरी। ततः समुद्रतीरेण वंगान्पुंड्रान्सकोशलान्। तत्र तत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः। विजिग्ये धनुषा राजन्गांडीवेन धनंजयः॥ अश्वानुसारे वैशं। मागधेनार्चितो राजन्पांडवः श्वेतवाहनः। दक्षिणां दिशमास्थाय चारयामास तं हयं। ततः स पुनरावृत्य हयः कामचरो बली। आससाद पुरीं रम्यां चेदीनां शुक्तिसाह्वयां। शरभेणार्चितस्तत्र शिशुपालसुतेन सः॥ युद्धपूर्वेण मानेन पूजया च महाबलः। तत्रार्चितो ययौ राजंस्तदा स तुरगोत्तमः। काशीनंध्रान्कोशलांश्च किरातानथ तंगणान्। पूजां तत्र यथान्यायं प्रतिगृह्य धनंजयः। पुनरावृत्य कौंतेयो दशार्णानगमत्तदा। तत्र चित्रांगदो नाम बलवानरिमर्दनः। तेन युद्धमभूत्तस्य विजयस्यातिभैरवं। तं चापि वशमानीय किरीटी भरतर्षभ। निषादराज्ञो विषयमेकलव्यस्य जग्मिवान्। एकलव्यसुतश्चैनं युद्धेन जगृहे तदा। तत्र चक्रे निषादैः स संग्रामं लोमहर्षणं। ततस्तमपि कौंतेयः समरेष्वपराजितः। जिगाय युधि दुर्धर्षो यज्ञविघ्नार्थमागतं। स तं जित्वा महाराज नैषादिं पाकशासनिः। अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवं। तत्रापि द्राविडैरंध्रै रौद्रैर्माहिषकैरपि तथा कोल्लगिरेयैश्च युद्धमासीत्किरीटिनः। तांश्चापि विजयो जित्वा नातितीव्रेण कर्मणा। तुरंगमवशेनाथ सुराष्ट्रमभितो ययौ। गोकर्णमपि चासाद्य प्रभासमपि जग्मिवान्। ततो द्वारवतीं रम्यां वृष्णिवीराभिपालितां। आससाद हयः श्रीमान्कुरुराजस्य यज्ञियः। तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः। प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत्। ततः पुर्या विनिष्क्रम्य वृष्ण्यंधकपतिस्तदा। सहितो वसुदेवेन मातुलेन किरीटिनः। तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकं। परया भरतश्रेष्ठ पूजया समवस्थितौ। ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः। ततः स

नू

५८

पश्चिमं देशं समुद्रस्य तदा हयः। क्रमेण व्यचरत्स्फीतं ततः पंचनदं ययौ। तस्मादपि स कौरव्य गांधारविषयं हयः। विचचार यथाकामं कौंतेयानुगतस्तदा। तत्र गांधारराजेन युद्धमासीत्किरीटिनः। घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा॥ आश्वमेधिके॥ वैशं॥ शकुनेस्तनयो वीरो गांधाराणां महारथः। प्रत्युद्ययौ गुडाकेशं सैन्येन महताऽवृतः। हस्त्यश्वरथयुक्तेन पताकाध्वजमालिना। अमृष्यमाणास्ते योधा नृपस्य शकुनेर्वधं। अभ्ययुः सहिताः पार्थं प्रगृहीतशरासनाः। स तानुवाच धर्मात्मा बीभत्सुरपराजितः। युधिष्ठिरस्य वचनं न वै तेजगृहुर्हितं। वार्यमाणा हि पार्थेन सांत्वपूर्वममर्षिताः॥ परिवार्य हयं जग्मुस्ततश्चुक्रोध पांडवः। ततः शिरांसि दीप्ताग्रैस्तेषां चिच्छेद पांडवः। क्षुरैर्गांडीवनिर्मुक्तैर्नातियत्नादिवार्जुनः। ते वध्यमानाः पार्थेन हयमुत्सृज्य संभ्रमात्। न्यवर्तंत महाराज शरवर्षार्दिता भृशं। निरुध्यमानस्तेजस्वी गांधारैः पांडुनंदनः। आदिश्यादिश्य तेजस्वी शिरांस्येषां न्यपातयत्। वध्यमानेषु तेष्वाजौ गांधारेषु समंततः। स राजा शकुनेः पुत्रः पांडवं प्रत्यवारयत्। तं युध्यमानं राजानं क्षत्रधर्मे व्यवस्थितं। पार्थोऽब्रवीन्न मे वध्या राजानो राजशासनात्। अलं युद्धेन ते वीर नाद्यास्ति पराजयः। इत्युक्तस्तदनादृत्य वाक्यमज्ञानमोहितः। स शक्रसमकर्माणं समवाकिरदाशुगैः। तस्य पार्थः शिरस्त्राणमर्धचंद्रेण पत्रिणा। अपाहरदसंभ्रांतो यथा जयद्रथशिरस्तथा। तद्दृष्ट्वा विस्मयं जग्मुर्गांधाराः सर्व एव ते। इच्छता तेन न हतो राजेत्येव च ते विदुः। गांधारराजपुत्रस्तु पलायनकृतक्षणः। बभौ तैरेव सहितस्त्रस्तैः क्षुद्रमृगैरिव। तेषां तु तरसा पार्थस्तत्रैव परिधावतां। प्रजहारोत्तमांगानि भल्लैः संनतपर्वभिः। उच्छ्रितांस्तु भुजान्केचिन्नाबुध्यंत शरैर्हृतान्। शरैर्गांडीवनिर्मुक्तैः पृथुभिः पार्थचोदितैः। संभ्रांतनरनागाश्वमथ तद्विद्रुतं बलं। हतविध्वस्तभूयिष्ठमावर्तत मुहुर्मुहुः। न ह्यदृश्यंत वीरस्य केचिदग्र्येऽग्र्यकर्मणः। रिपवः पात्यमाना वै ये सहेयुर्महाशरान्। ततो गांधारराजस्य मंत्रिवृद्धपुरःसरा। जननी निर्ययौ भीता पुरस्कृत्यार्घ्यमुत्तमं। सा न्यवारयदव्यग्रा तं पुत्रं युद्धदुर्मदं। प्रसादयामास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व°
५९

सवतेनि क्रूमाक्लिष्टकारिणं। संपूजयित्वा वीभत्सुं प्रसादमकरोत्प्रभुः। शक्रनेत्राप्पितनयं सांत्वयन्निदमब्रवीत्। नमे प्रियं महावाहो यत्ते बुद्धिरियं कृता॥ प्रति
योद्धुमभित्रघ्न भ्रातेव त्वं ममानघ। गांधारीं मातरं स्मृत्वा धृतराष्ट्रं स्नेनच। तेमनीवसि राजेंद्र त्वं निहताश्च त्वनुगास्तव। मैवं भूः शाम्यतां बैरं मा ते भूद्बुद्धिरीदृशी॥ ग
छेथाश्च परां चैत्री मश्वमेधे नृपस्य नः। इत्युक्त्वा तयोः पार्थो हयं कामविहारिणं। न्यवर्त्तत ततो वाजी येन नागाह्वयं पुरं। तं निवृत्तं तु शुश्राव चारेभ्येव युधिष्ठिरः
श्रुत्वा चार्जुनं कुशलिनं स च हृष्टमना भवत्। विजयस्य च तत्कर्म गांधारविषये तदा। श्रुत्वा चान्येषु देशेषु स सुप्रीतो भवत्तदा। एतस्मिन्नेव काले तु द्वादशीं माघ
पाक्षिकीं। इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः। समानीय महातेजाः सर्वान्भ्रातॄन्महीपतिः। भीमं च नकुलं चैव सहदेवं च कौरव। प्रोवाचेदं वचः काले नराध
र्म्भृतां वरः। आमंत्र्य वदतां श्रेष्ठो भीमं प्रहरतां वरं। वर्ण्यातिभीमसेनासो महाश्वेन तवानुजः। ... पुरुषैः ... धनंजयसारिणः। उपस्थितश्च कालोयं
मभितो वर्त्तते हयः। माघी च पौर्णमासीयं मासः शेषो वृकोदर। तत्प्रस्थाप्यंतु विद्वांसो ब्राह्मणा वेदपारगाः। वाजिमेधार्थसिद्ध्यर्थं देशं पश्यंतु याज्ञियं। इत्युक्तः
स तु तच्चक्रे भीमो नृपतिशासनं। हृष्टः श्रुत्वा गुडाकेशमायांतं पुरुषर्षभं। ततो ययौ भीमसेनः प्राज्ञैः स्थपतिभिः सह। ब्राह्मणानग्रतः कृत्वा कुशलान्यज्ञकर्म
णि। तं देशमालयमास सशालोली विशंकितं। प्रासादमणिसंबाधं मणिप्रवरकुट्टिमं। कारयामास विधिवत्तद्धेमरत्नविभूषितं। स्तंभान्कनकचित्रांश्च तोर
णानि बृहंति च। यज्ञायतनदेशेषु यत्नेन शुद्धकांचनं। अंतःपुराणि राज्ञां च नानादेशसमेयुषां। कारयामास धर्मात्मा तत्र तत्र यथाविधि। ब्राह्मणानां
च वेश्मानि नानादेशसमेयुषां। कारयामास कौंतेयो विविधान्याथ नैकशः। तथा संप्रेषयामास दूतान्नृपतिशासनात्। भीमसेनो महाबाहो राज्ञामक्लि
ष्टकर्मणां। ते प्रियार्थं कुरुपतेराययुर्नृपसत्तमाः। रत्नान्यनेकान्यादाय स्त्रियोश्वानायुधानि च। तेषां निविशतां तेषु शिबिरेषु महात्मनां। नर्दतः सागरस्येव दिव
मापयामास कौरव्यो यज्ञवाटं यथाविधि। सर्वं सपत्नीसदनमाग्नीध्रमपि योत्तमं।४

त
मं°
५९

स्पृगभवत्स्वनः। तेषामभ्यागतानां च स राजा कुरुवर्द्धनः। व्यादिदेशान्नपानानि शय्याश्चाप्यतिमानुषाः। वाहनानां च विविधाः शालाः शा
लाक्षगोरसैः। उपेता भरतश्रेष्ठो व्यादिदेश स धर्मराट्। तथा तस्मिन्महायज्ञे धर्मराजस्य धीमतः। समाजग्मुर्मुनिगणा बहवो ब्रह्मवा
दिनः। ये च द्विजातिप्रवरास्तत्रासन्पृथिवीपते। समाजग्मुः सशिष्यांस्तान्प्रतिजग्राह कौरवः। सर्वांश्च ताननुययौ यावदावसथान्प्रति। स्व
यमेव महातेजा दंभं त्यक्त्वा युधिष्ठिरः। ततः कृत्वा स्थपतयः शिल्पिनोन्ये च ये तदा। कृत्स्नं यज्ञविधिं राज्ञे धर्मराज्ञे न्यवेदयन्। तच्छ्रुत्वा धर्म
राजस्तु कृतं सर्वमतंद्रितः। हृष्टरूपो भवद्राजा सह भ्रातृभिरच्युतः। त्रिवृत्ताम्॥ ॥तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः। हेतुवादान्बहू
न्प्राहुः परस्परजिगीषवः। ददृशुस्ते नृपतयो यज्ञस्य विधिमुत्तमं। देवेंद्रस्येव विहितं भीमसेनेन भारत। ददृशुस्तोरणान्यत्र शातकुंभम
यानि ते। शय्यासनविहारांश्च सुबहून्जनसंचयान्। कटान्पात्रीः कटाहानि कलशान्वर्द्धमानकान्। नहि किंचिदसौवर्णमपश्यन्वसु
धाधिपाः। यूपांश्च शास्त्रपठितान्दारवान्हेमभूषितान्। उपक्लृप्तान्यथाकालं विधिवद्भूरिवर्चसः। स्थलजा जलजा ये च पशवः केच
न प्रभो। सर्वानेव समानीतानपश्यंस्तत्र ते नृपाः। गाश्चैव महिषीश्चैव तथा वृद्धस्त्रियोपि च। औदकानि च सत्त्वानि श्वापदानि वयांसि
च। जरायुजांडजातानि स्वेदजान्युद्भिजानि च। पर्वतानूपजातानि भूतानि ददृशुश्च ते। एवं प्रमुदितं सर्वं पशुगोधनधान्यतः। यज्ञवाटं नृपा
दृष्ट्वा परं विस्मयमागताः। ब्राह्मणानां विशां चैव बहुमृष्टान्नमृद्धिमत्। पूर्णे शतसहस्रे तु विप्राणां तत्र भुंजतां। दुंदुभिर्मेघनिर्घोषो मुहुर्मु
हुरताड्यत। विननादासकृच्चापि दिवसे दिवसे गते। एवं स ववृते यज्ञो धर्मराजस्य धीमतः। अन्नस्य सुबहून्राजन्नुत्सर्गान्पर्वतोपमान्॥

काले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰
६०

[illegible]

दधिकुल्याश्चददृशुः सर्पिषश्च ह्रदाञ्जनाः। जंबूद्वीपो हि सकलो नानाजनपदायुतः। राजन्नदृश्यतैकस्थो राज्ञस्तस्य महामखे। तत्र जाति सहस्राणि पुरुषाश्च ततस्ततः। गृहीत्वा भाजनान्जग्मुर्बहूनि भरतर्षभ। स्रग्विणश्चापि ते सर्वे सुमृष्टमणिकुंडलाः। पर्यवेषन्द्विजातीस्तान्शतशोऽथ सहस्रशः। विविधान्यन्नपानानि पुरुषा येऽनुयायिनः। तेषां तु नृपोपभोज्यानि ब्राह्मणानां ददुश्च ह। ॥ इत्याश्वमेधिके ॥ ॥ वैशंपा ॥ ॥ समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान्। दृष्ट्वा युधिष्ठिरो राजा भीमसेनमभाषत। उपयातान्नरव्याघ्राय एते पृथिवीश्वराः। एतेषां क्रियतां पूजा पूजार्हा हि नराधिपाः। इत्युक्तः स तथा चक्रे नरेंद्रेण यशस्विना। भीमसेनो महातेजा यमाभ्यां सह पांडवः। अथाभ्यगच्छद्गोविंदो वृष्णिभिः सह धर्मजं। बलदेवं पुरस्कृत्य सर्ववृष्णिभृतां वरः। युयुधानेन सहितः प्रद्युम्नेन गदेन च। निशठेनाथ चारुणा तथैव कृतवर्मणा। तेषामपि परां पूजां चक्रे भीमो महाबलः। विविशुस्ते च वेश्मानि रत्नवंति च सर्वशः। युधिष्ठिरसमीपे तु कथांते मधुसूदनः। अर्जुनं कथयामास बहुसंग्रामकर्षितं। स तं पप्रच्छ कौंतेयः पुनः पुनररिंदमः। धर्मजः शक्रजं जिष्णुं समाचष्ट जगत्पतिः। आगमद्द्वारकावासी ममाप्तः पुरुषो नृप। योऽद्राक्षीत्पांडवश्रेष्ठं बहुसंग्रामकर्षितं। स मीपे च महाबाहुमाचष्ट च मम प्रभो। कुरु कार्याणि कौंतेय हयमेधार्थसिद्धये। इत्युक्तः प्रत्युवाचेनं धर्मराजो युधिष्ठिरः। दिष्ट्या स कुशली जिष्णुरुपायाति च माधव। यदिदं संदिदेशास्मिन्पांडवानां बलाग्रणीः। तदाज्ञातुमिहेच्छामि भवता यदुनंदन। इत्युक्तो धर्मराजेन वृष्ण्यंधकपतिस्तदा। प्रोवाचेदं वचो वाग्मी धर्मात्मानं युधिष्ठिरं। इदमाह महाराज पार्थवाक्यं स्मरन्नरः। वाच्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम। आगमिष्यंति राजानः सर्वे वै कौरवर्षभ। प्राप्तानामर्हतां पूजा कर्तव्येति त्वक्षमं हि नः। इत्येतद्वचनाद्राजा विज्ञाप्यो मम मानद। यथा चात्ययिकं न स्यादर्घ्याहरणे भवत्। कर्तुमर्हति तद्राजा भवांश्चाप्यनुमन्यतां। राजद्वेषान्न नश्येयुरिमा राजन्पुनः प्रजाः। इदमन्यच्च कौंतेय वचः स पुरुषोऽब्रवीत्। धनंजयस्य नृपते तन्मे निगदतः शृणु। उपयास्यति यज्ञं नो मणिपूरपतिर्नृपः। पुत्रो मम महातेजा दयितो बभ्रुवाहनः। तं भवान्मदवेक्षार्थं विधिवत्प्रतिपूजयेत्।

इत्याश्वमेधिके

६०

प्रख्यं मनो ह्लादयति प्रभो। बहूनि किल युद्धानि विजयस्य नराधिपैः। पुनरासन्हृषीकेश तत्र तत्र च मे श्रुतं। किं निमित्तं स नित्यं हि पार्थः सुखविवर्जितः। अतीव विजयो धीमान्निति मे दूयते मनः। संचिंतयामि कौंतेयं रहो जिष्णुं जनार्दन। अतीव दुःखभागी स सततं पांडुनंदनः। किं नु तस्य शरीरेऽस्ति लक्षणं कृष्ण निंदितं। अनिष्टं लक्षणं कृष्ण येन दुःखान्युपाश्नुते। अतीव दुःखभागी स सततं कुंतिनंदनः। न हि पश्यामि बीभत्सोर्निंद्यं गात्रेषु किंचन। श्रोतव्यं चेन्मयैतद्वै तन्मे व्याख्यातुमर्हसि। इत्युक्तः स हृषीकेशो ध्यात्वा समहदंतरं। राजानं भोजराजन्यवर्धनो विष्णुरब्रवीत्। न ह्यस्य नृपते किंचित्संश्लिष्टमुपलक्षये। ऋते पुरुषसिंहस्य पिंडिकेऽस्याति कायिके। स ताभ्यां पुरुषव्याघ्रो नित्यमध्वसु वर्तते। न चान्यदनुपश्यामि येनासौ दुःखभाजनः। इत्युक्तः पुरुषश्रेष्ठस्तदा कृष्णेन धीमता। प्रोवाच वृष्णिशार्दूलमेवमेतदिति प्रभो। कृष्णा तु द्रौपदी कृष्णं तिर्यक्सासूयमैक्षत। प्रतिजग्राह तस्यास्तं प्रणयं चापि केशिहा। उवाच वा हृषीकेशः साक्षादिव धनंजयः। तत्र भीमादयस्ते तु कुरवो याजकाश्च ते। रेमुः श्रुत्वा विचित्रां तां धनंजयकथां शुभां। ॥ इत्याश्वमेधिके ॥ ॥ वैशं ॥ तेषां कथयतामेव पुरुषोऽर्जुनसंकथां। उपायाद्वचनान्मर्त्यो विजयस्य महात्मनः। सोऽभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान्। उपायातं नरव्याघ्रं फाल्गुनं प्रत्यवेदयत्। तच्छ्रुत्वा नृपतिश्रेष्ठ हर्षबाष्पाकुलेक्षणः। प्रियाख्याननिमित्तं वै ददौ बहुधनं तदा। ततो द्वितीये दिवसे महाञ्शब्दो व्यवर्धत। आगच्छति नरव्याघ्रे कौरवाणां धुरंधरे। ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः। अभितो वर्तमानस्य तथोच्चैःश्रवसो यथा। तत्र हर्षकरीर्वाचो नराणां शुश्रुवेऽर्जुनः। दिष्ट्यासि पार्थ कुशली धन्यो राजा युधिष्ठिरः। कोऽन्यो हि पृथिवीं कृत्स्नां जित्वा च युधि पार्थिवान्। चारयित्वा हयश्रेष्ठमुपायाद्दृतेऽर्जुनात्। ये व्यतीता महात्मानो राजानः सगरादयः। तेषामपीदृशं कर्म न कदाचन शुश्रुम। नैतदन्ये करिष्यंति भविष्या वसुधाधिपाः। यत्त्वं कुरुकुलश्रेष्ठ दुष्करं कृतवानसि। इत्येवं वदतां तेषां पुंसां कर्णसुखा गिरः। शृण्वन्विवेश धर्मात्मा फाल्गुनो यज्ञसंस्तरं। ततो राजा सहामात्यः कृष्णश्च यदुनंदनः। धृतराष्ट्रं पुरस्कृत्य प्रत्यु

नत्रस्थितानां सर्वेषामिति पाठः।

। वैशंपाय्यनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व
६१

क्रमेणेपनुस्तदा॥ सोभिवाद्य पितुः पादौ धर्मराजस्य धीमतः। भीमादींश्चापि संपूज्य पर्यष्वजत केशवं॥ तैः समेत्यार्चितस्तांश्च प्रत्यर्च्याथ यथाविधि॥ विशश्राम महाबाहुस्तीरं लब्ध्वेव पारगः॥ एतस्मिन्नेव काले च स राजा बभ्रुवाहनः। मातृभ्यां सहितो धीमान् कुरूनभ्याजगाम ह। तत्र वृद्धान् यथावत्स कुरूनन्यांश्च पार्थिवान्॥ अभिवाद्य महाबाहुस्तैश्चापि प्रतिनंदितः॥ प्रविवेश पितामह्याः कुंत्या भवनमुत्तमं॥ ॥ अश्वानुसारः समाप्तः॥ वैशम्॥ स प्रविश्य महाबाहुः पांडवानां निवेशनं। पितामहीमभ्यवदत्साम्ना परमवल्गुना॥ ततश्चित्रांगदा देवी कौरव्यस्यात्मजापि च। पृथां कृष्णां च सहिते विनयेनोपजग्मतुः॥ सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः। ददौ कुंती ततस्ताभ्यां रत्नानि विविधानि च॥ द्रौपदी च सुभद्रा च याश्चाप्यन्या ददुः स्त्रियः। ऊषतुस्तत्र ते देव्यौ महार्हशयनासने। सुपूजिते स्वयं कुंत्या पार्थस्य हितकाम्यया॥ स च राजा महातेजाः पूजितो बभ्रुवाहनः। धृतराष्ट्रं महीपालमुपतस्थे यथाविधि॥ युधिष्ठिरं च राजानं भीमादींश्चापि पांडवान्॥ उपगम्य महातेजा विनयेनाभ्यवादयत्॥ स तैः प्रेम्णा परिष्वक्तः पूजितश्च यथाविधि॥ धनं चास्मै ददुर्भूरि प्रीयमाणा महारथाः॥ तथैव च महीपालः कृष्णं चक्रगदाधरं। प्रद्युम्न इव गोविंदं विनयेनोपतस्थिवान्॥ तस्मै कृष्णो ददौ राज्ञे महार्हमतिपूजितं। रथं हेमपरिष्कारं दिव्याश्वयुजमुत्तमं। धर्मराजश्च भीमश्च फाल्गुनश्च यमौ तदा॥ पृथक्पृथक् च ते वैनं मानार्थाभ्यामयोजयन्॥ ततस्तृतीये दिवसे सत्यवत्यात्मजो मुनिः॥ युधिष्ठिरं समभ्येत्य वाग्मी वचनमब्रवीत्॥ अद्यप्रभृति कौंतेय यजस्व समयो हि ते॥ मुहूर्तो यज्ञियः प्राप्तश्चोदयंतीह याजकाः॥ अहीनो नाम राजेंद्र क्रतुस्तेयं विकल्पवान्॥ बहुत्वात्कांचनस्यास्य ख्यातो बहुसुवर्णकः॥ एवमत्र महाराज दक्षिणां त्रिगुणां कुरु॥ त्रित्वं व्रजतु ते राजन् ब्राह्मणा ह्यत्र कारणं॥ त्रीनश्वमेधानत्र त्वं संप्राप्य बहुदक्षिणान्॥ ज्ञातिवध्याकृतं पापं प्रहास्यसि नराधिप॥ पवित्रं परमं चैतत्पावनानां च उत्तमं॥ यदश्वमेधावभृथं प्राप्स्यसे कुरुनंदन॥ इत्युक्तः स तु तेजस्वी व्यासेनामिततेजसा॥ दीक्षां विवेश धर्मात्मा वाजिमेधाप्तये ततः॥ ततो यज्ञं महातेजा वाजिमेधं महाक्रतुं बहुन्न-

नो

६१

सर्वाण्येव यथाशास्त्रं याजकाः समयोजयन्॥६

-दक्षिणं राजा सर्वकामगुणान्वितं॥ तत्र वेदविदो राजंश्चक्रुः कर्माणि याजकाः॥ परिक्रमंतः शास्त्रज्ञा विधिवत्साधुदीक्षिताः॥ न तेषां स्खलितं किंचिदासीच्चाप्यकृतं तथा॥ क्रमयुक्तं च युक्तं च चक्रुस्तत्र द्विजर्षभाः॥ कृत्वा प्रवर्ग्यं धर्मज्ञा यथावद्द्विजसत्तमाः॥ चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः॥ अभिषूय ततो राजन् सोमं सोमपसत्तमाः॥ सवनान्यानुपूर्व्येण चक्रुः शास्त्रानुसारिणः॥ न तत्र कृपणः कश्चिन्न दरिद्रो बभूव ह॥ क्षुधितो दुःखितो वापि प्राकृतो वापि मानवः॥ भोजनं भोजनार्थिभ्यो दापयामास शत्रुहा॥ भीमसेनो महातेजाः सततं राजशासनात्॥ संस्तरे कुशलाश्चापि [illegible] मानवाः॥ भोजनं भोजनार्थिभ्यो सर्वकर्माणि याजकाः॥ दिवसे दिवसे चक्रुर्यथाशास्त्रार्थदर्शनात्॥ नाषडंगविदत्रासीत्सदस्यस्तस्य धीमतः॥ नाव्रतो नानुपाध्यायो न च वादाक्षमो द्विजः॥ ततो यूपोच्छ्रये प्राप्ते षड्बैल्वान् भरतर्षभ॥ खादिरान्बिल्वसहितांस्तावतः सर्ववर्णिनः॥ देवदारुमयौ द्वौ च यूपौ कुरुपतेर्मखे॥ श्लेष्मातकमयं चैकं याजकाः समकल्पयन्॥ शोभार्थं चापरान्यूपान् कांचनान् भरतर्षभ॥ स भीमः कारयामास धर्मराजस्य शासनात्॥ ते व्यराजंत राजर्षे वासोभिरुपशोभिताः॥ नरेंद्राभिगतास्तद्वद्देवा इव यथा सप्तर्षयो दिवि॥ इष्टकाः कांचनाश्चात्र चयनार्थं कृताभवन्॥ शुशुभे चयनं तत्र दक्षस्येव प्रजापतेः॥ चतुश्चित्यः स तत्रासीदष्टादशकरात्मकः॥ स रुक्मपक्षो निचितस्त्रिकोणो गरुडाकृतिः॥ ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः॥ तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये॥ ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये॥ सर्वांस्तानभ्ययुंजंस्ते तत्राग्निचयकर्मणि॥ यूपेषु नियतास्त्वासीत्पशूनां त्रिशती तथा॥ अश्वरत्नोत्तरा यज्ञे कौंतेयस्य महात्मनः॥ स यज्ञः शुशुभे तस्य साक्षाद्देवर्षिसंकुलः॥ गंधर्वगणसंगीतः प्रनृत्तोऽप्सरसां गणैः॥ स किंपुरुषसंकीर्णः किन्नरैश्चोपशोभितः॥ सिद्धविप्रनिवासैश्च समंतादभिसंवृतः॥ तस्मिन्सदसि नित्यास्तु व्यासशिष्या द्विजर्षभाः॥ सर्वशास्त्रप्रणेतारः कुशला यज्ञसंस्तरे॥ नारदश्च बभूवात्र तुंबुरुश्च महाद्युतिः॥ विश्वावसुश्चित्रसेनस्तथान्ये गीतकोविदाः॥ गंधर्वा

स्याः
ल्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गीतकुशला नृत्येषु च विशारदाः॥ रमयंति स्म तान्विप्रान्यज्ञकर्मांतरेष्वथ॥ इत्याश्वमेधिके वैशं श्रपयित्वा पशूनन्यान्विधिवद्द्विजसत्तमाः। तं तुरंगं यथा
शास्त्रमालभंत द्विजातयः॥ ततः संज्ञाप्य तुरगं विधिवद्याजकास्तदा। उपसंवेशयन्राजंस्ततस्तां द्रुपदात्मजां। कलाभिस्तिसृभी राजन्यथाविधि मनस्विनीं॥
उद्धृत्य तु वपां तस्य यथाशास्त्रं द्विजातयः॥ श्रपयामासुरव्यग्रा विधिवद्भरतर्षभ। तं वपाधूमगंधं तु धर्मराजः सहानुजैः। उपाजिघ्रद्यथाशास्त्रं सर्वपापापहं
तदा॥ शिष्टान्यंगानि यान्यासंस्तस्याश्वस्य नराधिप। तान्यग्नौ जुहुवुर्धीराः समस्ताः षोडशर्त्विजः॥ संस्थाप्यैवं तस्य राज्ञः क्रतुं शक्रस्य तेजसः। व्यासः सशिष्यो भगवा
न्वर्द्धयामास तं नृपं॥ ततो युधिष्ठिरः प्रादाद्ब्राह्मणेभ्यो यथाविधि। कोटीः सहस्रं निष्काणां व्यासाय तु वसुंधरां॥ प्रतिगृह्य धरां राजन्व्यासः सत्यवतीसुतः॥
अब्रवीद्भरतश्रेष्ठं धर्मराजं युधिष्ठिरं। वसुधा भवतस्त्वेषा संन्यस्ता राजसत्तम। निष्क्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थिनः॥ युधिष्ठिरस्तु तान्विप्रान्प्रत्युवाच
महामनाः। भ्रातृभिः सहितो धीमान्मध्ये राज्ञां महात्मनां॥ अश्वमेधे महायज्ञे पृथिवी दक्षिणा स्मृता॥ अर्जुनेन जिता चेयमृत्विग्भ्यः प्रापिता मम॥ वनं प्रवेक्ष्ये
विप्राग्र्या विभजध्वं महीमिमां। चतुर्द्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः॥ नाहमादातुमिच्छामि ब्राह्मणं चैव मे सदा। इत्युक्तवति तस्मिंस्तु भ्रातरो द्रौपदी
तथा। एवमेतदिति प्राहुस्तदभूद्रोमहर्षणं॥ ततोंतरीक्षे वागासीत्साधुसाध्विति भारत। तथैव द्विजसंघानां शंसतां विबभौ स्वनः॥ द्वैपायनस्तदा कृष्णः पुनरेव
युधिष्ठिरं। प्रोवाच मध्ये विप्राणामिदं संपूजयन्मुनिः॥ दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहं। हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धरास्तु ते॥ ततोऽब्रवीद्वासुदे
वो धर्मराजं युधिष्ठिरं। यथाह भगवान्व्यासस्तथा त्वं कर्तुमर्हसि॥ इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह। कोटिकोटीकृतं प्रादाद्दक्षिणां त्रिगुणां क्रतोः॥
न करिष्यति तल्लोके कश्चिदन्यो नराधिपः। यत्कृतं कुरुराजेन मरुत्तस्यानुकुर्वता॥ प्रतिगृह्य तु तद्द्रव्यं कृष्णद्वैपायनो मुनिः। ऋत्विग्भ्यः प्रददौ विद्वांश्चतुर्द्धा व्यभजंश्च ते॥

काञ्चेन महताऽकुः सुवर्णं ब्राह्मणास्ततः ३

धरणीनिष्क्रयं दत्तं तद्धिरण्यं युधिष्ठिरः। धूतपाप्मा जितस्वर्गो मुमुदे भ्रातृभिः सह॥ ऋत्विजस्तमपर्यंतं सुवर्णनिचयं तदा। व्यभजंत द्विजातिभ्यो यथोत्साहं यथासु
खं॥ यज्ञवाटे च यत्किंचिद्धिरण्यं सविभूषणं॥ तोरणानि च यूपांश्च घटाः पात्रीस्तथेष्टकाः॥ युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन्द्विजाः॥ अनंतरं द्विजातिभ्यः क्षत्रिया ज
ह्रिरे वसु। तथा विट्शूद्रसंघाताः सर्वं तद्व्यभजन्द्विजाः॥ [illegible] क्षत्रिया जह्रिरे वसु। तथा विट्शूद्रसंघाताः तथान्ये म्लेच्छजातयः। ततस्ते ब्राह्मणाः
सर्वे मुदिता जग्मुरालयान्। अर्पिता वसुना तेन धर्मराजेन धीमता॥ स्वमंशं भगवान्व्यासः कुंत्यै प्रादाद्धि मानदः। प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः॥ श्वशुरा
त्प्रीतिदायं तं प्राप्य सा प्रीतमानसा। चकार पुण्यकं तेन सुमहत्संघशः पृथा। गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिः सह। सभाज्यमानः शुशुभे महेंद्रस्त्रिदशैरिव
पांडवाश्च महीपालैः समेतैरभिसंवृताः॥ अशोभंत महाराज ग्रहास्तारागणैरिव॥ राजभ्योपि ततः प्रादाद्रत्नानि विविधानि च। गजानश्वानलंकारान्स्त्रियो वासांसि
कांचनं। तद्धनौघमपर्यंतं पार्थः पार्थिवमंडले। विसृजञ्छुशुभे राजा यथा वैश्रवणस्तथा॥ आनीय च तथा वीरं राजानं बभ्रुवाहनं। प्रदाय विपुलं वित्तं गृहा
न्प्रास्थापयत्तदा॥ दुःशलायाश्च तं पौत्रं पार्थिवं भरतर्षभ। स्वराज्येथ पितुर्धीमान्स्वसुः प्रीत्या न्यवेदयत्। नृपतींश्चैव तान्सर्वान्सुविभक्तान्सुपूजितान्। प्रस्थापया मा
स वशी कुरुराजो युधिष्ठिरः॥ गोविंदं च महात्मानं बलदेवं महाबलं॥ तथान्यान्वृष्णिवीरांश्च प्रद्युम्नादीन्सहस्रशः। पूजयित्वा महाराज यथाविधि महाद्युतिः। भ्रातृ
भिः सहितो राजा प्रास्थापयदरिंदमः॥ एवं बभूव यज्ञः स धर्मराजस्य धीमतः। बह्वन्नधनरत्नौघः सुरामैरेयसागरः॥ सर्पिःपंकाह्रदा यत्र बहवश्चान्नपर्वताः॥ रसाला
कर्दमा नद्यो बभूवुर्भरतर्षभ॥ पांडवैश्च महाराज [illegible] नादीयतां भुज्यतां तथा। पशूनां बध्यतां चैव नांतं ददृशिरे जनाः॥ मत्तप्रमत्तमुदितं सुप्रीतयुवतीजनं। मृदंगशंख
नादैश्च मनोरममभूत्तदा। दीयतां भुज्यतां चेष्टं दिवारात्रमवारितं। गीयतां गीयतां चेति तत्र शब्दो महानभूत्॥ तं महोत्सवसंकाशं हृष्टपुष्टजनाकुलं। कथयंति स्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व॰ ९३

पु

स्तत्य

९८

पुरुषानन्यदेशनिवासिनः। वर्षित्वा धनधाराभिः कामैरन्नैस्तथा। विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत्पुरं॥ ॥ इत्याश्वमेधिके ॥ जनमेजय उ॰॥ पितामहस्य मे यज्ञे
धर्मराजस्य धीमतः। [illegible] यदाश्चर्यमभूत्किंचित्तद्भवान्वक्तुमर्हति॥ वैशं॥ श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमं। अश्वमेधे महायज्ञे निवृत्ते यदभू
त्प्रभो। तर्पितेषु द्विजाग्र्येषु ज्ञातिसंबंधिबंधुषु। दीनांधकृपणे चापि तदा भरतसत्तम। घुष्यमाणे महादाने दिक्षु सर्वासु भारत। पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्द्धनि। वि
लान्निःसृत्य नकुलो रुक्मपार्श्वस्तदानघ। वज्राशनिसमं नादममुंचद्वसुधाधिप। सकृदुत्सृज्य तं नादं त्रासयानो मृगद्विजान्। मानुषं वचनं प्राह धृष्टो विलशयो महान्।
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः। उंछवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः। तस्य तद्वचनं श्रुत्वा नकुलस्य विशांपते। विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्ष
भाः। ततः समेत्य नकुलं पर्यपृच्छंत ते द्विजाः। कुतस्त्वं समनुप्राप्तो यज्ञं साधुसमागमं। किं बलं परमं तुभ्यं किं श्रुतं किं परायणं। कथं भवंतं विद्याम यो नो यज्ञं विग
र्हसे। अविलुप्यागमं कृत्स्नं विविधैर्यज्ञियैः कृतं। तथागमं यथान्यायं कर्त्तव्यं च यथा कृतं। पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रदर्शनात्। मंत्राहुतिहुतश्चाग्निर्द
त्तं देयममत्सरं। तुष्टा द्विजातयश्चात्र दानैर्बहुविधैरपि। क्षत्रिया सुप्रयुद्धेन श्राद्धैश्चापि पितामहाः। पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः। अनुक्रोशैस्तथा शूद्रा
दानशेषैः पृथग्जनाः। ज्ञातिसंबंधिनस्तुष्टाः शौचेन च तपस्विनः। देवा हविर्भिः पुण्यैश्च रक्षणैः शरणागताः॥ यदत्र तथ्यं तद्ब्रूहि सत्यं सत्यं द्विजातिषु। यथाश्रुतं
यथादृष्टं हृष्टो ब्राह्मणकाम्यया। आप्तवाक्यस्त्वं प्राज्ञस्त्वं दिव्यं रूपं बिभर्षि च। समागतश्च विप्रैस्त्वं तत्त्वं वक्तुमर्हसि। इति पृष्टो द्विजैस्तैः स प्रहसन्नकुलोऽब्रवीत्। नै
षा मृषा मया वाणी प्रोक्ता दर्पेण वा द्विजाः। यन्मयोक्तमिदं वाक्यं युष्माभिश्चाप्युपश्रुतं। सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो द्विजर्षभाः। उंछवृत्तेर्वदान्यस्य कुरुक्षेत्रनि ९३
वासिनः। इत्यवश्यं मयैतद्धो वक्तव्यं द्विजसत्तमाः। शृणुताव्यग्रमनसः शंसतो मे यथातथं। अनुभूतं च दृष्टं च यन्मयाद्भुतमुत्तमं। उंछवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः।

स्वर्गं येन द्विजः प्राप्तः सभार्यः ससुतस्नुषः। यथा चार्द्धं शरीरस्य ममेदं कांचनीकृतं॥ नकुल उवाच॥ हंत वो वर्त्तयिष्यामि दानस्य परमं फलं। न्यायलब्धस्य सूक्ष्मस्य
विप्रदत्तस्य यद्द्विजाः। धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभिर्वृते। उंछवृत्तिर्द्विजः कश्चित्कपोतिरभवत्तदा। सभार्यः सह पुत्रेण सस्नुषस्तपसि स्थितः। बभूव वृत्तस्थो द्विजस्स
धर्मात्मा नियतेंद्रियः। षष्ठकाले सदा विप्रो भुंक्ते तैः सह सुव्रतः। षष्ठे काले कदाचित्तु तस्याहारो न विद्यते। भुंक्तेऽन्यस्मिन्कदाचित्स षष्ठे काले द्विजोत्तमः। कदाचि
द्धर्मिणस्तस्य दुर्भिक्षे सति दारुणे। न विद्यते तदा विप्राः संचयस्तन्निबोध[illegible]त। क्षीणौषधिसमावायो धनहीनोऽभवत्तदा। काले काले ह्यसंप्राप्ते नैव विद्येत
भोजनं। क्षुधापरिगताः सर्वे प्रातिष्ठंत तदा तु ते। उंछं सदा शुक्लपक्षे मध्यं तपति भास्करे। उष्णार्त्तश्च क्षुधार्त्तश्च स विप्रस्तपसि स्थितः। उंछमप्राप्तवानेव ब्रा
ह्मणः क्षुच्छ्रमान्वितः। स तथैव क्षुधाविष्टः सार्द्धं परिजनेन ह। क्षपयामास तं कालं कृच्छ्रप्राणो द्विजोत्तमः। अथ षष्ठे गते काले यवप्रस्थमुपार्ज्जयेत्। एवं प्र
स्थं तु तं सक्तुं न कुर्वंति तपस्विनः। [illegible] कृतजप्याह्निकास्ते तु हुत्वा वह्निं यथाविधि। कुडवं कुडवं सर्वे व्यभजंत तपस्विनः। अथागच्छद्द्विजः कश्चिदतिथिर्भु
जतां तदा। ते तं दृष्ट्वातिथिं प्राप्तं प्रहृष्टमनसोऽभवन्। तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं तदा। विशुद्धमनसो दांताः श्रद्धादमसमन्विताः। अनसूया गतक्रो
धाः साधवो वीतमत्सराः। त्यक्तमानमदक्रोधा धर्मज्ञा द्विजसत्तमाः। स ब्रह्मचर्यं गोत्रं ते तस्याख्याय परस्परं। कुटीं प्रवेशयामासुः क्षुधार्त्तमतिथिं तदा॥
इदमर्घ्यं च पाद्यं च बृषी चेयं तवानघ। शुचयः शक्तवश्चेमे नियमोपार्जिताः प्रभो। प्रतिगृह्णीष्व भद्रं ते मया दत्ता द्विजर्षभ। इत्युक्तः प्रतिगृह्याथ शक्तूना
कुडवं द्विजः। भक्षयामास राजेंद्र न च तुष्टिं जगाम सः। स उंछवृत्तिः संप्रेक्ष्य क्षुधापरिगतं द्विजं। आहारं चिंतयामास कथं तुष्टो भवेदिति। तस्य भार्याब्रवीद्वाक्यं
मद्भागो दीयतामिति। गच्छत्वेष यथाकामं परितुष्टो द्विजोत्तमः। इति ब्रुवंतीं तां साध्वीं भार्यां स द्विजसत्तमः। क्षुधापरिगतां ज्ञात्वा सक्तून्नाभ्यनंदत। आत्मानु

ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्व· ६४

मो

द्रा

मानतो विद्वान्स मनुविप्रर्षिर्न सत्तदा। ज्ञात्वा दृष्ट्वा क्षुधार्त्तं विश्रांतां ज्ञानां तपस्विनीं। त्वगस्थिभूतां वेपंतीं ततो भार्यामुवाच ह। अपि कीटपतंगानां मृगाणां चैव शोभने। स्त्रियो रक्ष्याश्च पोष्याश्च न चैवं वक्तुमर्हसि। अनुकंपो नरः पत्न्या पुष्टो रक्षित एव वा। प्रपतेद्य सोदीप्तान्न वल्लो कान्न वाप्नुयात्। इत्युक्ता सा ततः प्राह धर्मार्थौ नो समौ द्विज। सक्तुप्रस्थचतुर्भागं गृहाणेमं प्रसीद मे। सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जिताः। स्त्रीणां पतिसमाधीनं कांक्षितं च द्विजर्षभ। ऋतुर्मातुः पितुर्बीजं दैवतं परमं पतिः। भर्तुः प्रसादान्नारीणां रतिः पुत्रफलं तथा। पालनाद्धि पतिस्त्वं मे भर्त्तासि भरणाच्च मे। पुत्रप्रदानाद्वरदस्तस्मात्सक्तून्प्रयच्छ मे। जरापरिगतो वृद्धः क्षुधार्त्तो दुर्बलो भृशं। उपवासपरिश्रांतो यदा त्वमपि कर्षितः। इत्युक्तः स तया सक्तून्प्रगृह्येदं वचोऽब्रवीत्। द्विज सक्तूनिमान्भूयः प्रतिगृह्णीष्व सत्तम। सतान्गृह्य भुक्त्वा च न तुष्टिमगमद्द्विजः। तमुंछवृत्तिरालक्ष्य ततश्चिंतापरोऽभवत्। पुत्र उ॰। सक्तूनिमान्गृहीत्वा त्वं देहि विप्राय सत्तम। इत्येवं सुकृतं मन्ये तस्मादेतत्करोम्यहं। भवान्हि परिपाल्यो मे सर्वदैव प्रयत्नतः। साधूनां कांक्षितं यस्मात्पितुर्वृद्धस्य पालनं। पुत्रार्थो विहितो ह्येष वार्द्धके परिपालनं। श्रुतिरेषा हि विप्रर्षे त्रिषु लोकेषु शाश्वती। प्राणधारणमात्रेण शक्यं कर्तुं तपस्त्वया। प्राणो हि परमो धर्मः स्थितो देहेषु देहिनां। पितोवाच। अपि वर्षसहस्री त्वं बाल एव मतो मम। उत्पाद्य पुत्रं हि पिता कृतकृत्यो भवेत्सुतात्। बालानां क्षुद्बलवती जानाम्येतदहं प्रभो। वृद्धोऽहं धारयिष्यामि त्वं बली भव पुत्रक। जीर्णेन वयसा पुत्र न मां क्षुद्बाधते पि च। दीर्घकालं तपस्तप्तं न मे मरणतो भयं। पुत्र उ॰। अपत्यमस्मि ते पुत्र त्राणात्पुत्र इति स्मृतिः। आत्मा पुत्रः स्मृतस्तस्मात्त्राह्यात्मानमात्मना। पितोवाच। रूपेण सदृशस्त्वं मे शीलेन च दमेन वा। प्रश्रयेण तथा बुध्या धृत्या क्षांत्या सौ। इत्युक्त्वादाय तान्सक्तून्प्रीतात्मा द्विजसत्तमः। प्रहसन्निव विप्राय स तस्मै प्रददौ तदा। भुक्त्वा तानपि सक्तून्स नैव तुष्टो बभूव ह। उंछवृत्तिस्तु धर्मात्मा व्रीडामनुजगाम ह। तं वै वधूः स्थिता साध्वी ब्राह्मणप्रियकाम्यया।

तथैवच।२

नकुलख्या·

स

६४

पौत्रेण तानवाप्नोति यत्र गत्वा न शोचति। धर्मार्थाविह यात्रेताय क्रिन्ने तात थैव य। तथैव पुत्रपौत्राणां स्वर्गस्त्रेताक्रिख्यासया।२

शक्तूनादाय संहृष्टा श्वशुरं वाक्यमब्रवीत्। संतानात्तव संतानं मम विप्र भविष्यति। सक्तूनिमानतिथये गृहीत्वा संप्रयच्छ मे। तव प्रसादान्निर्वृत्ता मम लोकाः किलाक्षयाः। पितॄन् गुणान्तारयति पुत्रस्त्वनु शुश्रूमः। पुत्रपौत्रैश्च नियतं साधुलोकान्त्रपाश्नुते। श्वशुर उवाच। वातातपविशीर्णांगीं त्वां विवर्णां निरीक्ष्य वै कर्षितां सुव्रते वा रे क्षुधाविह्वलचेतसां। कथं सक्तून्ग्रहीष्यामि भूत्वा धर्मोपघातकः। कल्याणवृत्ते कल्याणि नैवं त्वं वक्तुमर्हसि। षष्ठे काले व्रतवतीं शौचशीलतपोन्वितां। कृच्छ्रवृत्तिं निराहारां द्रक्ष्यामि त्वां कथं शुभे। बाला क्षुधार्त्ता नारी च रक्ष्या त्वं सततं मया। उपवासपरिश्रांता त्वं हि बांधवनंदिनि। स्नुषोवाच। गुरोर्मम गुरुस्त्वं वै यतो दैवतदैवतं। देवातिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे प्रभो। देहः प्राणाश्च धर्मश्च शुश्रूषार्थमिदं गुरोः। तव विप्र प्रसादेन लोकान्प्राप्स्याम्यहं शुभान्। अवेक्ष्या इति कृत्वा त्वं दृढभक्तेति वा द्विज। चिंत्यामर्मेयमिति वा सक्तूनादातुमर्हसि। श्वशुर उ॰। अनेन नित्यं साध्वी त्वं शीलवृत्तेन शोभसे। या त्वं धर्मव्रतोपेता गुरुवृत्तिमवेक्षसे। तस्मात्सक्तून्ग्रहीष्यामि वधूर्नार्हसि वंचनां। गणयित्वा महाभागे त्वं हि धर्मभृतां वरे। इत्युक्त्वा तानुपादाय सक्तून्प्रादाद्द्विजातये। ततस्तुष्टोऽभवद्विप्रस्तस्य साधोर्महात्मनः। प्रीतात्मा स तु तं वाक्यमिदमाह द्विजर्षभं। वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः। शुद्धेन तव दानेन न्यायोपात्तेन धर्मतः। यथाशक्ति विसृष्टेन प्रीतोऽस्मि द्विजसत्तम। अहो दानं घुष्यते ते स्वर्गे स्वर्गनिवासिभिः। गगनात्पुष्पवर्षं च पश्य पतितं भुवि। सुरर्षिदेवगंधर्वा ये च देवपुरःसराः। स्तुवंतो देवदूताश्च स्थिता दानेन विस्मिताः। ब्रह्मर्षयो विमानस्था ब्रह्मलोकचराश्च ये। कांक्षंते दर्शनं तुभ्यं दिवं व्रज द्विजर्षभ। पितृलोकगताः सर्वे तारिताः पितरस्त्वया। अनागताश्च बहवः सुबहूनि युगान्युत। ब्रह्मचर्येण दानेन यज्ञेन तपसा तथा। असंकरेण धर्मेण तस्माद्गच्छ दिवं द्विज। श्रद्धया परया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुधानिर्णुदतिप्रज्ञांधर्म्यांबुद्धिंव्यपोहति।क्षुधापरिगतज्ञानोधृतिंत्यजतिचैवहि।क्षुधांजयतियस्तुसस्वर्गंजयतिध्रुवं।यदादानरुचिश्चैवतदा
धर्मोनसीदति।धर्ममेवगुरुंकृत्वात्वछ्लानगणितात्वया।१

अश्व॰
६५

यच्चत्वंतपश्चरसिसुव्रत।तस्माद्देवास्तवानेनप्रीताब्राह्मणसत्तम।सर्वमेतद्धियस्मात्तेव्यस्तंशुद्धेनचेतसा।कृच्छ्रकालेततःस्वर्गोविजितःकर्मणात्वया।इज्या
गमोनृणांश्रद्धःपात्रेदानंततःपरं।कालश्चपात्रेरादानाच्छ्रद्धाचैवततःपरा।स्वर्गद्वारंसुसूक्ष्मंहिनरैर्मोहान्नदृश्यते।स्वर्गार्गलंलोभवीजंरागगुप्तंदुरासदं
तंतुपश्यंतिपुरुषाजितक्रोधाजितेंद्रियाः।ब्राह्मणास्तपसायुक्तायथाशक्तिप्रदायिनः।सहस्रशक्तिश्चशतंशतशक्तिर्दशापिच।दद्यादपश्चयःशक्त्या
सर्वेतुल्यफलाःस्मृताः।रंतिदेवोहिनृपतिरपःप्रादादकिंचनं।शुद्धेनमनसाविप्रनाकपृष्ठंततोगतः।नधर्मःप्रीयतेतातदानैर्दत्तैर्महाफलैः।न्यायल
ब्धैर्यथासूक्ष्मैःश्रद्धापूतैःसतुष्यति।गोप्रदानसहस्राणिद्विजेभ्योदान्नृगोनृपः।एकांदत्वासपारक्यांनरकंसमपद्यत।आत्ममांसप्रदानेनशिविरौशी
नरोनृपः।प्राप्यपुण्यकृतांल्लोकान्मोदतेदिविसुव्रतः।विभवेननृणांपुण्यंस्वशक्त्यार्जितंसतां।नयज्ञैर्विविधैर्विप्रयथान्यायेनसंचितैः।क्रोधोदानफलंहं
तिलोभात्स्वर्गंनगच्छति।न्यायवृत्तिर्हितपसादानवित्स्वर्गमश्नुते।नराजसूयैर्बहुभिरिष्ट्वाविपुलदक्षिणैः।नचाश्वमेधैर्बहुभिःफलंसममिदंतव।स
क्तुप्रस्थेनविजितोब्रह्मलोकस्त्वयाक्षयः।विरजोब्रह्मसदनंगच्छविप्रयथासुखं।सर्वेषांवोद्विजश्रेष्ठदिव्यंयानमिदंस्थितं।आरोहतयथाकामंधर्मो
स्मिद्विजपश्यमां।तारितोहित्वयादेहोलोकेकीर्तिःस्थिराचते।सभार्यःसहपुत्रश्चसस्नुषश्चदिवंव्रज।इत्युक्तवाक्येधर्मेतुयानमारुह्यसद्विजः।सदार
ससुतश्चैवसस्नुषश्चदिवंगतः।तस्मिन्विप्रेगतेस्वर्गंससुतेसस्नुषेतदा।भार्याचतुर्थेधर्मज्ञेततोहंनिःसृतोबिलात्।ततस्तुसक्तुगंधेनक्लेदेनसलिलस्य
च।दिव्यपुष्पावमर्दाच्चसाधोर्दानलवैश्चतैः।विप्रस्यतपसातस्यशिरोमेकांचनीकृतं।तस्यसत्याभिसंधस्यसक्तुदानेनचैवहि।शरीरार्द्धंचमेविप्राःशातकुंभमयंकृतं।

न

६५

म

कथमेवंविधंमेस्यादन्यंपार्श्वमिदंद्विजाः।तपोवनानियज्ञांश्चहृष्टेभ्यःपुनःपुनः।यज्ञंचमपिमांश्रुत्वाकुरुराजस्यधीमतः।१

पश्यतेदंसुविपुलंतपसातस्यधीमतः।आशयापरयाप्राप्तोनचाहंकांचनीकृतः।ततोमयोक्तंतद्वाक्यंप्रहस्यब्राह्मणर्षभाः।सक्तुप्रस्थेनयज्ञोयंसंमितोने
तिसर्वथा।सक्तुप्रस्थलवैस्तैर्हितदाहंकांचनीकृतः।नहियज्ञोमहानेषसदृशस्तैर्मतोमम।इत्युक्त्वानकुलःसर्वान्यज्ञेद्विजवरांस्तदा।जगामादर्श
नंतेषांविप्रास्तेचययुर्गृहान्।।वैशं०।।एतत्तेसर्वमाख्यातंमयापरपुरंजय।यदाश्चर्यमभूत्तत्रवाजिमेधेमहाक्रतौ।नविस्मयस्तेनृपतेयज्ञेकार्य्यः
कथंचन।ऋषिकोटिसहस्राणितपोभिर्येदिवंगताः।अद्रोहःसर्वभूतेषुसंतोषःशीलमार्जवं।तपोदमश्चसत्यंचप्रदानंचेतिसंमतं।।इत्याश्वमे
धिके।।जनमेजयउवाच।।यज्ञेसक्तानृपतयस्तपःसक्तामहर्षयः।शांतिव्यवस्थिताविप्राःशमोदमइतिप्रभो।तस्माद्यज्ञफलैस्तुल्यंनकिं
चिदिहदृश्यते।इतितेवर्त्ततेबुद्धिस्तथाचैतदसंशयं।यज्ञैरिष्ट्वातुबहवोराजानोद्विजसत्तम।इहकीर्तिपरांप्राप्यप्रेत्यस्वर्गमवाप्नुयुः।देवराजः
सहस्राक्षःक्रतुभिर्भूरिदक्षिणैः।दे[illegible]नोद्विजसत्तम।इहकीर्तिपरांप्राप्यप्रेत्यस्वर्गमवाप्नुयु।देवराजःसहस्राक्षःक्रतुभि
र्भूरिदक्षिणैः।देवराज्यंमहातेजाःप्राप्तवानखिलंविभुः।यदायुधिष्ठिरोराजाभीमार्जुनपुरःसरः।सदृशोदेवराजेनसमृद्ध्याविक्रमेणवा।अथक
स्मात्सनकुलोगर्हयामासतंक्रतुं।अश्वमेधंमहायज्ञंराज्ञस्तस्यमहात्मनः।।वैशं०।।यज्ञस्यविधिमग्र्यंवैफलंचापिनराधिप।गदतःशृणुमेराज
न्यथावदिहभारत।पुराशक्रस्ययजतःशक्रंऋतुर्महर्षयः।ऋत्विक्षुकर्मव्यग्रेषुविततेयज्ञकर्मणि।हूयमानेतथावह्नौहोत्रेगुणसमन्विते।
देवेष्वाहूयमानेषुस्थितेषुपरमर्षिषु।सुप्रतीतैस्तथाविप्रैःस्वागमैःसुस्वरैर्नृप।अश्रांतैश्चापिलघुभिरध्वर्युवृषभैस्तथा।आरंभसमयेतस्मिन्गृही

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मु०लि

६६

तेषुपशुषुदया।महर्षयोमहाराजबभूवुःकृपयान्विताः॥ततोदीनान्पशून्दृष्ट्वाऋषयस्ते तपोधनाः।ऊचुःशक्रंसमागम्यनायंयज्ञविधिःशुभः।
अपरिज्ञानमेतत्तेमहांतंधर्ममिच्छतः॥नहियज्ञेपशुगणाविधिदृष्टाःपुरंदर।धर्मोपघातकस्त्वेषसमारंभस्तवप्रभो।नायंधर्मकृतोयज्ञोनहिंसा
धर्मउच्यते।आगमेनैवतेयज्ञंकुर्वंतुयदिचेच्छसि।विधिदृष्टेनयज्ञेनधर्मस्तेसुमहान्भवेत्।यजबीजैःसहस्राक्षत्रिवर्षपरमोषितैः।एषधर्मोमहा
ञ्छक्रमहागुणफलोदयः।शतक्रतुस्तुतद्वाक्यमृषिभिस्तत्त्वदर्शिभिः।उक्तंनप्रतिजग्राहमानान्मोहवशंगतः।तेषांविवादःसुमहाञ्छक्रयज्ञेप्रव
र्तितः।जंगमैःस्थावरैर्वापियष्टव्यमितिभारत।तेतुखिन्नाविवादेनऋषयस्तत्त्वदर्शिनः।तदासंधायशक्रेणपप्रच्छुर्नृपतिंवसुं।महाभागकथंय
ज्ञेष्वागमोनृपसत्तम।यष्टव्यंपशुभिर्मेध्यैरथोबीजैरजैरिति।तच्छ्रुत्वातुवसुस्तेषाम विचार्यबलाबलं।यथोपनीतैर्यष्टव्यमितिप्रोवाचपार्थिवः।
एवमुक्त्वासनृपतिःप्रविवेशरसातलं।उक्त्वेहवितथंप्रश्नंचेदीनामीश्वरःप्रभुः।तस्मान्नवाच्यंह्येकेनबहुज्ञेनापिसंशये।प्रजापतिमपाहायस्वयंभु
मृतेप्रभुं।तेनदत्तानिदानानिपापेनाशुद्धबुद्धिना।तानिसर्वमनादृत्यनश्यंतिविपुलान्यपि।तस्याधर्मप्रवृत्तस्यहिंसकस्यदुरात्मनः।दानेनकीर्ति
र्भवतिप्रेत्यचेहचदुर्मतेः।अन्यायोपगतंद्रव्यमभीक्ष्णंयोह्यपंडितः।धर्माभिशंकीयजतेनसधर्मफलंलभेत्।धर्मवैतंसिकोयस्तुपापात्मापुरुषा
धमः।ददातिदानंविप्रेभ्योलोकविश्वासकारणं।पापेनकर्मणाविप्रोधनंप्राप्यनिरंकुशः।रागमोहान्वितःसोंतेकलुषांगतिमश्नुते।अपिसंच
यबुद्धिर्हिलोभमोहवशंगतः।उद्वेजयतिभूतानिपापेनाशुद्धबुद्धिना।एवंलब्ध्वाधनंमोहाद्योहिदद्याद्यजेतवा।नतस्यसफलंप्रेत्यभुंक्तेपापधनागमः।

६६

०

षि५

मात्तःउञ्छंमूलंफलंशाकमुदपात्रंतपोधनाः।दानंविभवतोदत्त्वानराःस्वर्यांतिधार्मिकाः।एषधर्मोमहायोगोदानंभूतदयातथा।ब्रह्मचर्यंतथासत्यमनुक्रो
शोधृतिःक्षमा।सनातनस्यधर्मस्यमूलमेतत्सनातनं।श्रूयतेहिपुरावृत्ताविश्वामित्रादयोनृपाः।विश्वामित्रोसितश्चैवजनकश्चमहीपतिः।कक्षसेनार्ष्टिषे
णौचसिंधुद्वीपश्चपार्थिवः।एतेचान्येचबहवःसिद्धिंपरमिकांगताः।नृपाःसत्यैश्चदानैश्चन्यायलब्धैस्तपोधनाः।ब्राह्मणाःक्षत्रियावैश्याःशूद्रायेचाश्रि
तास्तपः।दानधर्माग्निनाशुद्धास्तेस्वर्गंयांतिभारत॥ इत्याश्वमेधिके॥ जनमेजयउ०॥धर्मागतेनत्यागेनभगवन्स्वर्गमस्तिचेत्।एतन्मेसर्वमाचक्ष्वकुश
लोह्यसिभाषितुं।तस्योञ्छवृत्तेर्यद्वृत्तंसक्तुदानेफलंमहत्।कथितंतुममब्रह्मंस्तथ्यमेतदसंशयं।कथंहिसर्वयज्ञेषुनिश्चयःपरमोभवेत्।एतदर्हसिवक्तुं
मेनिखिलेनद्विजर्षभ॥ वैशं०॥ अत्राप्युदाहरंतीममितिहासंपुरातनं।अगस्त्यस्यमहायज्ञेपुरावृत्तमरिंदम।पुरागस्त्योमहातेजादीक्षांद्वादशवार्षिकीं।प्र
विवेशमहाराजसर्वभूतहितेरतः।तत्राग्निकल्पाहोतारआसन्सत्रेमहात्मनः।मूलाहाराफलाहाराःसाश्मकुट्टामरीचिपाः।परिपृष्टिकावैघसिकाःसंप्रक्षा
लास्तथैवच।यतयोभिक्षवश्चात्रबभूवुःपर्यवस्थिताः।सर्वेप्रत्यक्षधर्माणोजितक्रोधाजितेंद्रियाः।दमेस्थिताश्चतेसर्वेहिंसादंभविवर्जिताः।वृत्तेशुद्धेस्थि
तानित्यमिंद्रियैश्चाप्यबाधिताः।उपासिष्ठंततंयज्ञंयजंतस्तेमहर्षयः।यथाशक्त्याभगवतातदन्नंसमुपार्जितं।तस्मिंसत्रेतुयद्वृत्तंतद्योग्यंचतदाभवत्॥त
थाह्यनेकैर्मुनिभिर्महांतःक्रतवःकृताः।एवंविधेत्वगस्त्यस्यवर्तमानेमहाध्वरे।नववर्षसहस्राक्षस्तदाभरतसत्तम।ततःकर्मांतरेराजन्नगस्त्यस्यमहात्मनः॥
कथेयमभिनिर्वृत्तामुनीनांभावितात्मनां।अगस्त्योयजमानोसौसदात्यर्थंविमत्सरः।नवर्षतिपर्जन्यःकथमन्नंभविष्यति।सत्रंचेदंमहद्विप्रामुनेर्द्वादशवार्षि
कं।नवर्षिष्यतिदेवश्चवर्षाण्येतानिद्वादश॥एतद्भवंतःसंचिंत्यमहर्षेरस्यधीमतः।अगस्त्यस्यातितपसःकर्तुमर्हंत्यनुग्रहं।इत्येवमुक्तेवचनेततोगस्त्यःप्रतापवान्।

०

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ॰श्व॰
९७

प्रोवाच वाक्यं स तदा प्रसाद्य शिरसा मुनीन्॥ यदि द्वादश वर्षाणि न वर्षिष्यति वासवः। चिंतायज्ञं करिष्यामि विधिरेष सनातनः॥ यदि द्वादश वर्षाणि न वर्षिष्य
ति वासवः। व्यायामेनाहरिष्यामि यज्ञानन्यानतिव्रतान्॥ बीजयज्ञो मयायं वै बहुवर्षसमाचितः। बीजैः कृतं करिष्यामि नात्र विघ्नो भविष्यति॥ नेदं शक्यं वृथा क
र्तुं मम सत्रं कथंचन। वर्षिष्यतीह वा देवो न वा देवो भविष्यति॥ अथ वाभ्यर्थनामिंद्रो न करिष्यति कामतः। स्वयमिंद्रो भविष्यामि जीवयिष्यामि वै प्रजाः॥ यो यस्याहा
रयातास्स तथैव भविष्यति। विशेषं चैव कर्तास्मि पुनः पुनरतीव हि॥ अद्येह स्वर्णमभ्येतु यच्चान्यद्वसु किंचन। त्रिषु लोकेषु यच्चास्ति तदिहागच्छतां स्वयं॥
दिव्याश्चाप्सरसंघाश्च गंधर्वाश्च सकिंनराः। विश्वावसुश्च ये चान्ये ते पुपासंतु मे मखं॥ उत्तरेभ्यः कुरुभ्यश्च यत्किंचिद्वसु विद्यते। सर्वं तदिह यज्ञेषु स्वयमेवोप
तिष्ठतु॥ स्वर्गः स्वर्गसदश्चैव धर्मश्च स्वयमेव तु॥ इत्युक्ते सर्वमेवैतदभवत्तपसा मुने॥ तस्य दीप्ताग्निमहसस्त्वगस्त्यस्यातितेजसः। ततस्ते मुनयो दृष्ट्वा दृष्टुस्तप
सो बलं। विस्मिता वचनं शाब्दरिदं सर्वे महार्थवत्॥ ॥ ऋषय ऊचुः॥ प्रीताः स्मस्तव वाक्येन न त्विच्छामस्तपो व्ययं। तैरेव यज्ञैस्तुष्टाः स्म न्यायेनेछामहे वयं॥
यज्ञान्दीक्षांस्तथा होमान्यच्चान्यन्मृगयामहे। न्यायेनोपार्जिताहाराः स्वकर्माभिरता वयं॥ वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे। न्यायेनोत्तरकालं च गृहेभ्यो निः
सृता वयं॥ धर्मदृष्टैर्विधिद्वारैस्तपस्तप्स्यामहे वयं। भवतः सम्यगिष्टा तु बुद्धिर्हिंसाविवर्जिता॥ एको हि विविधिमुक्तेषु ब्रूयास्त्वं सततं प्रभो। प्रीतास्ततो भविष्यामो
वयं द्विजसत्तम। विसर्जिताः समाप्ते च सत्रादस्माद्व्रजामहे॥ तथा कथयतां तेषां देवराजः पुरंदरः। ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलं॥ आसमाप्तेश्च यज्ञस्य
तस्यामितपराक्रम॥ निकामवर्षी पर्जन्यो बभूव जनमेजय। प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः॥ स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्पतिं। ततो यज्ञसमाप्तौ ता
न्विससर्ज महामुनीन्॥ अगस्त्यः परमः प्रीतः पूजयित्वा यथाविधि॥ ॥ जनमेजय उवाच॥ कोसौ नकुलरूपेण शिरसा कांचनेन वै। प्राह मानुषवद्वाचमेतत्पृष्टो वद

नू

९७

अ॰श्व॰
९८

स्व मे॥ वैशं॥ एतत्पूर्वं न पृष्टोहं न चास्माभिः प्रभाषितं। श्रूयतां नकुलो योसौ यथा वाक्तस्य मानुषी॥ श्राद्धं संकल्पयामास जमदग्निः पुरा किल। होमधेनुस्तमा
गाच्च स्वयमेव दुदोह तां॥ तत्पयः स्थापयामास नवे भांडे दृढे शुचौ। तस्य क्रोधः स्वरूपेण पिठरं धर्म आविशत्॥ जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्विप्रिये कृते। इति सं
चिंत्य धर्मः स धर्षयामास तत्पयः॥ तमाज्ञाय मुनिः क्रोधं नैवास्य समकोपह। स तु क्रोधस्ततो राजन्ब्राह्मणीं मूर्तिमास्थितः॥ जितस्तस्मिन्भृगुश्रेष्ठमभ्यभा
षदमर्षणः॥ जितोस्मीति भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः॥ लोके मिथ्याप्रवादोयं यत्त्वयास्मि विनिर्जितः। वशे स्थितोहं त्वय्यद्य क्षमावति महात्मनि॥ बिभे
मि तपसः साधो प्रसादं कुरु मे विभो॥ ॥ जमदग्निरुवाच॥ ॥ साक्षाद्दृष्टोसि मे क्रोध गच्छ त्वं विगतज्वरः। न त्वं मेपकृतं मेद्य न च मे मन्युरस्ति वै॥ यास्तु उद्दि
श्य संकल्पितं पयो मेस्य कृतो मया। पितरस्ते महाभागास्तेभ्यो बुध्यस्व गम्यतां॥ इत्युक्तो जातसंत्रासस्तत्रैवांतरधीयत। पितॄणामभिषंगात्तु नकुलत्वमु
पागतः॥ स तान्प्रसादयामास शापस्यांतो भवेदिति। तैश्चाप्युक्तः क्षिपन्धर्मं शापस्यांतमवाप्स्यसि॥ तैश्चोक्तो यज्ञियान्देशान्धर्मारण्यं तथैव च। जुगुप्स
मानो धावन्स तं यज्ञं समुपासदत्॥ धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः। मुक्तः शापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः॥ एवमेतत्तदा वृत्तं यज्ञे तस्य महा
त्मनः॥ पश्यतां चापि नस्तत्र नकुलोंतर्हितस्तदा॥ ॥ छ॥ ॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामाश्वमेधिकं समाप्तं॥ ॥ १४॥
अतः परं व्यासाश्रमं पर्व॥ तस्यायमाद्यः श्लोकः॥ जनमेजय उ॥ प्राप्य राज्यं महात्मानः पांडवा मे पितामहाः। कथमासन्महाराजे धृतराष्ट्रे महात्मनि॥

नू

९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्वमेध [illegible]
[illegible] जयरामसुत
[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 14:25
,TRANSFERRED=2019/07/24 at 14:44:08
,PAGES=70
,TYPE=STD
,NAME=S0001108
,Book Name=AASHVAMEDHIKPARV
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE70=00000070.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection